# MASTERS OF ARTS
# IN
# SANSKRIT

## VEDIC LANGUAGE & LITERATURE

**Paper-1**

NAAC ACCREDITED A+

## UTKAL UNIVERSITY

**VANI VIHAR, BHUBANESWAR, ODISHA-751004**

**Name of the Study Material:** Systems Language & Literature

**Author Name:** पं. ईश्वरचंद्र शास्त्री

Edition: 2019

Copyright © Laxmi Publications Pvt Ltd.

No part of this publication which is material protected by this copyright notice may be reproduced or transmitted or utilized or stored in any form or by any means now known or hereinafter invented, electronic, digital or mechanical, including photocopying, scanning, recording or by any information storage or retrieval system, without prior permission from the publisher.

Information contained in this book has been published by Laxmi Publications Pvt Ltd and has been obtained by its authors from sources believed to be reliable and are correct to the best of their knowledge. However, the publisher and its author shall in no event be liable for any errors, omissions or damages arising out of use of this information and specially disclaim and implied warranties or merchantability or fitness for any particular use.

**Printed and Published by:**
**Laxmi Publications Pvt Ltd.**
113, Golden House
Daryaganj, New Delhi-110 002.
Tel: 011-43532500, E-mail: info@laxmipublications.com

**For:**
**Directorate of Distance & Continuing Education**
Utkal University, Vaniihar, Bhunabeswar-7, Odisha
Email: helpline@ddceutkal.ac.in
Website: www.ddceutkal.ac.in

DUT-6526-124.10-VEDIC LANG LIT P-I SNK C–
Typeset at: Friends Enterprises, Delhi Printed at:

**DIRECTORATE OF DISTANCE & CONTINUING EDUCATION**
**UTKAL UNIVERSITY : VANI VIHAR**
**BHUBANESWAR-751007**

# From the Director's Desk

The Directorate of Distance & Continuing Education, originally established as the University Evening College way back in 1962 has travelled a long way in the last 52 years. 'EDUCATION FOR ALL' is our motto. Increasingly the Open and Distance Learning institutions are aspiring to provide education for anyone, anytime and anywhere. DDCE, Utkal University has been constantly striving to rise up to the challenges of Open Distance Learning system. Nearly one lakh students have passed through the portals of this great temple of learning. We may not have numerous great tales of outstanding academic achievements but we have great tales of success in life, of recovering lost opportunities, tremendous satisfaction in life, turning points in career and those who feel that without us they would not be where they are today. There are also flashes when our students figure in best ten in their honours subjects. Our students must be free from despair and negative attitude. They must be enthusiastic, full of energy and confident of their future. To meet the needs of quality enhancement and to address the quality concerns of our stake holders over the years, we are switching over to self instructional material printed courseware. We are sure that students would go beyond the course ware provided by us. We are aware that most of you are working and have also family responsibility. Please remember that only a busy person has time for everything and a lazy person has none. We are sure, that you will be able to chalk out a well planned programme to study the courseware. By choosing to pursue a course in distance mode, you have made a commitment for self improvement and acquiring higher educational qualification. You should rise up to your commitment. Every student must go beyond the standard books and self instructional course material. You should read number of books and use ICT learning resources like the internet, television and radio programmes etc. As only limited number of classes will be held, a student should come to the personal contact programme well prepared. The PCP should be used for clarification of doubt and counselling. This can only happen if you read the course material before PCP. You can always mail your feedback on the course ware to us. It is very important that one should discuss the contents of the course materials with other fellow learners.

We wish you happy reading.

**DIRECTOR**

# vuØef.kdk


| इकाई | | पृष्ठ संख्या |
|---|---|---|
| 1. | अग्नि 1.1 | 1 |
| | इन्द्रः 1.2 | 14 |
| | विश्वामित्र–नदि–संवादः 1.3 | 23 |
| | उषस् 1.4 | 32 |
| | सोमः 1.5 | 34 |
| | नासदीय सूक्त (सृष्ट्युत्पत्ति सूक्त) 1.6 | 36 |
| 2. | मेधाजन्म 1.1 | 46 |
| | वरुणः 1.2 | 61 |
| | राष्ट्रसभासूक्तम् 1.3 | 64 |
| | पृथ्वी 1.4 | 66 |
| | कालः 1.5 | 71 |
| 3. | हरिश्चन्द्रोपाख्यानम् | 78 |
| 4. | ईशावास्योपनिषद् | 103 |
| 5. | केनोपनिषद् | 114 |

# Paper-3. Vedic Language & Literature

Unit-I. Hymns from the Rgveda with Sayana's commentary on

- a) Agni (I.1)
- b) Indra (I.12)
- c) Vishvamitra-nadi Samvada (III.33),
- d) Usas (V.80),
- e) Soma (IX.80)
- f) Nasadiya suktam (X. 129).

Unit-II. Hymns from the Atharvaveda with Sayana's Commentary

- a) Medhajananam - (I.1)
- b) Satyanrtasamiksaka - Varuna - (IV.16),
- c) Rashtrasabha - (VII.12),
- d) Prithvi (XII.I) 1-20 mantras,
- e) Kala (XIX.53)

Unit-III. Aitareya Brahmana - Harischandra-Sunahsepa-upakhyana

Unit-IV. Ishavasyopanisad

Unit-V. Kenopanisad

**Books Recommended:**

1. The New Vedic Selection, Telang & Chaubey, Bharatiya Vidya Prakashan, Varanasi, Part-I & Part-II, 1973
2. Rksukta-Vaijayanti - H.D. Velankar, Vaidika Samshodhana Mandala, Pune, 1965
3. Rksuktashati - H.D. Velankar, Bharatiya Vidya Bhavan, Mumbai, 1972
4. Atharvaveda with Sayana's comm.- (4 vols.) published from V.V.R.I, Hoshiarpur, Punjab.
5. Vaidika Sahitya aur Samskrti, Baladev Upadhyay, Sharada Samsthan, 37 B, Rabindrapuri, Durgakunda, Varanasi
6. Vaidika-vanmayasyetihasah (in Sans), Acharya Jagadish Mishra, Chaukhamba Surabharati Prakashan, Varanasi
7. Ishavasyopanisad, Gita press, Gorakhpur, U.P.
8. Ishavasyopanisad, Sampurnananda Sanskrit University, Varanasi.
9. Kenopanisad, Gita Press, Gorakhapur, U.P.
10. The Harischandropakhyana (the story of Sunasepa) of the Aitareya Brahmana edited with Sayana's Comm, Trans., Ed. Umashankar Sharma, Chowkhamba Vidya Bhawan, Varanasi, 4th Edn. 1989

NOTES

# UNIT–I

# इकाई–प्रथम

## अग्नि १.१

**ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।। १।।**

ॐ अग्निम्। ईले। पुरःऽहितम्। यज्ञस्य। देवम्। ऋत्विजम्। होतारम्। रत्नऽधातमम्।। १।।

अग्निनामकं देवम् ᵛईले स्तौमि। 'ईड स्तुतौ।' इति धातुः। ढकारस्यलकारो बह्वृचाध्येतृसंप्रदायप्राप्तः। तथा च पठ्यते–'अज्मध्यस्थडकारस्य लकारं बह्वृचा जगुः। अज्मध्यस्थढकारस्य लहकारं यै यथाक्रमम्' इति।। मन्त्रस्य होत्रा प्रयोज्यत्वादहं होता स्तौमीति लभ्यते। कीदृशमग्निम्। ᵛयज्ञस्य ᵛपुरोहितम्। यथा राज्ञः पुरोहितस्तदभीष्टं संपादयति, तथाग्निरपि यज्ञस्यापेक्षितं होमं संपादयति। यद्वा। यज्ञस्य संबन्धिनि पूर्वभागे आवहनीयरूपेणावस्थितम् ᛉ। पुनः कीदृशम्। ᵛदेवं दानादिगुणयुक्तम्। पुनः कीदृशम्। ᵛहोतारम् ᵛऋत्विजम्। देवानां यज्ञेषु होतृनामक ऋत्विगग्निरेव। तथा च श्रूयते–'+अग्निवै देवानां होता' (ऐ. ब्रा. ३. १.४) इति। पुनरपि कीदृशम्। ᵛरत्नधातमं यागफलरूपाणां रत्नानामतिशयेन धारयितारं पोपयितारं वा। अत्राग्निशब्दस्य यास्को बहुधा निर्वचनं

---

*ठ–'अथवा यज्ञस्य देवमिति संबन्धः। यज्ञस्य प्रकाशकमित्यर्थः। पुरोहितमिति पृथग्विशेषणम्' इत्यधिकं 'अवस्थितम्' इत्यस्यानन्तरम्। + ठ–'अग्निर्वै देवानां ............ घाग्णितीरे पोषायितारं वा' इत्यस्य स्थाने–'अग्निर्वै देवानां होतासीत् इति। अथवा ऋत्विजं ऋत्विग्वेन यज्ञनिर्वाहकम्। होतारं देवानामाह्वातारम्। तथा रत्नघातमं यागफलरूपाणां रत्नानां रमणांयानां धनानां वा आतशयेन दातारं धारयितारं वा' इत्यधिकम्। १. ग–घ–ट–ठ–य–ततोऽनुक्रमेण। २. ट–ठ–पृथ्वीलोकावस्थिनोऽग्निः। ऋ. ५

NOTES

दर्शयति–'अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं. प्रथमं व्याख्यास्यामोऽग्निः कस्मादग्रणीर्भवत्यगं यज्ञेपु प्रणीयतेऽङ्गं नयति संनममानोऽक्रोपनो भवतीति स्थौलाष्ठीविर्न क्रोपयति न स्नेहयति त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिरितादक्ताद्दग्धाद्वा नीतात्स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परस्तस्यैपा भवत्यग्निमीले' (निरु. ७. १४) इति। अस्यायमर्थः। सामान्येन सर्वदेवतानां लक्षणस्याभिहितत्वादनन्तरं यतः प्रतिपदं विशेषेण वक्तव्यत्वमा-काङ्क्षितम् अतोऽनुक्रमेण वक्ष्यामः। तत्र पृथिवीलोके स्थितोऽग्निः प्रथमं व्याख्यास्यते। कस्मात् प्रवृत्तिनिमित्ताद्ग्निशब्देन देवताभिधीयत इति प्रश्नस्य 'अग्रणीः' इत्यादिकमुत्तरम्। देवसेनामग्रे स्वयं नयतीत्यग्रणीः। एतदेकमग्निशब्दस्य प्रवृत्तिनिमित्तम्। तथा च ब्राह्मणान्तरम्–'अग्निर्दैवानां सेनानीः' इति। एतदेवाभिप्रेत्य बह्वृचा मन्त्रब्राह्मणे आमनन्ति–'अग्निर्मुखं प्रथमो देवतानाम्' (ऐ. वा. १. ४) इति मन्त्रः। 'अग्निर्वै देवानामवमः' (ऐ. वा. १. १) इति ब्राह्मणम्। तथा तैत्तिरीयाश्चामनन्ति।–'अग्निरग्रे प्रथमो देवतानाम्' (तै. ब्रा. २. ४. ३. ३) इति। 'अग्निरवमो देवतानाम्' इति च। वाजसनेयिनस्त्वेवमामनन्ति–'स वा एपोऽग्रे देवतानामजायत तस्मादग्निर्निर्ना' इति। यज्ञेषु अग्निहोत्रेष्टिपशुसोमरूपेषु अग्रं पूर्वदिग्वर्त्याहवनीयदेशं प्रति गार्हपत्यात् प्रणीयते इति द्वितीयं प्रवृत्तिनिमित्तम्। संनममानः सम्यक् स्वयमेव प्रह्वीभवन् अङ्ग स्वकीयं शरीरं नयति काष्टदाहे हविव्याके च प्रेरयतीति तृतीयं प्रवृत्तिनिमित्तम्। स्थूलाष्टीवनामकस्य महर्षेः पुत्रो निरक्तकारः कश्चित् 'अंकोपनः' इति अग्निशब्दं निर्वक्ति। तत्र न क्रोपयतीत्युक्ते न स्नेयति, किंतु काष्ठादिकं रूक्षयतीत्युक्तं भवति। शाकपूणिनामको निरुक्तकारो धातुत्रयादग्निशब्दनिष्पत्तिं मन्यते। इतः 'इण् गतौ' इति धातुः। अक्तः 'अञ्जूव्यक्तिम्रक्षणकान्तिगतिपु' इति धातुः। दग्धः 'दह भस्मीकरणे' इति धातुः। नीतः 'णीञ् प्रापणे' इति धातुः। अग्निशब्दो हि अकारगकार-निशब्दानपेक्षमाणः एतिधातोरूपन्नात् अयनशब्दात् अकारमादत्ते। अनक्तिधातुगतस्य ककारस्य गकारादेशं कृत्वा तमादत्ते। यद्वहि दहति-धातुजन्यात् दग्धशब्दात् गकारमादत्ते। नीः इति नयति धातुः। स च ह्रस्वो भूत्वा परो भवति। ततो। धातुत्रयं मिलित्वा अग्निशब्दो भवति। यज्ञभूमिं गत्वा स्वकीयमङ्गं नयति काष्ठदाहे हविष्पाके च प्रेरयतीति समुदायार्थः। तस्य अग्निशब्दार्थस्य देवताविशेषस्य प्राधान्येन स्तुतिप्रदर्शनायैपा 'अग्निमीले' इति ऋक् भवतीति। तामेनां ऋचं यास्क एवं व्याख्यातवान्–'अग्निमीलेऽग्निं याचामीलिरध्येषणाकर्मा पूजाकर्मा वा पुरोहितो व्याख्यातो यज्ञस्य देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः सा देवता होतारं ह्वातारं जुहोतेर्होतेत्यौर्णवाभो

रत्नधातमं रमणीयानां धनानां दातृतमम्' (निरु. ७. १५) इति। अस्यायमर्थः– ईडतिघातोः स्तुत्यर्थत्वं प्रसिद्धम्। धातूनामनेकार्थत्वमिति न्यायमाश्रिस्य याञ्चाध्येपणापूजाः अप्यत्रोचितत्वात् तदर्थतया व्याख्याताः। पुरोहितशब्दो द्वितीयेऽध्याये 'यद्देवापिः शंतनवे पुरोहितः' इत्येतां ऋचमुदाहृत्य 'पुर एनं दधति' (निरु. २. १२) इति व्याख्यातः। तैत्तिरीयाश्च पौरोहित्ये स्पर्धमानस्य पश्वनुष्ठानं विधाय तत्फलत्वेन 'पुर एनं दधते' (तै. सं. २. १. २. ९) इत्यामनन्ति। देवशब्दो दानदीपनद्योतनानामन्यतममर्थमाचष्टे। यज्ञस्य दाता दीपयिता द्योतयितायमग्निरित्युक्तं भवति। दीपनद्योतनयोरेकार्थत्वेऽप्यस्ति धातुभेदः। यद्यप्यग्निः पृथिवीस्थानस्तथापि देवान् प्रति हविर्वहनात् द्युस्थानो भवति। देवशब्ददेवताशब्दयोः पर्यायत्वान्मन्त्रप्रतिपाद्या काचिदग्निव्यतिरिक्ता देवता नान्वेपणीया। होतृशब्दस्य ह्वयतिधातोरुत्पन्नत्वेन देवानामाह्वातारमिति। और्णवाभनामकस्तु मुनिः जुहोतिधातोरुत्पन्नो होतृशब्द इति मन्यते। अग्नेश्च होतृत्वं होमाधिकरणत्वेन द्रष्टव्यम्। रत्नशब्दो द्वितीयाध्याये 'मघम्' इत्यादिप्वष्टाविंशतौ धननामसु (नि. २. १०.७.) पठितः। रमणीयत्वात् रत्नत्वम्। दधातिधातुरत्र दानार्थवाचीति। तदिदं निरुक्तकारस्य यास्कस्य मन्त्रव्याख्यानम्।। अथ व्याकरणप्रकियोच्यते। अगिधातोर्गत्यर्थात् 'अङ्गेर्नलोपश्च' (उ. सू. ४. ४९०) इति औणादिकसूत्रेणं निप्रत्ययः। इदित्त्वान्नुमागेन प्राप्तस्य नकारस्य (पा. सू. ७.१.५८ ) लोपन्नु भवति। अङ्गति स्वर्गं गच्छति हविर्नेतुमित्यग्निः। तत्र 'धातोः' (पा. सू. ६. १. १६२) इति अकार उदात्तः। 'आद्युदात्तश्च' (पा. सू. ३. १. ३) इति प्रत्ययगत इकारोऽप्युदात्तः। 'अनुदात्तं पदमेकवर्जम्' (षा. सू. ६. १. १५८) इति द्वयोरन्यतरमुदात्तमवशेष्येतरस्यानुदात्तत्वं प्राप्तम्। तत्र धातुस्वरे प्रथमतोऽवस्थिते सति पश्चादुपदिश्यमानः प्रत्ययस्वरोऽवशिष्यते। 'सति शिष्टस्वरो बलीयान्' (पा. सू. ६. १.१५८. ९) इति हि न्यायः। ततोऽन्तोदात्तमग्निप्रातिपदिकम्। 'अनुदात्तौ सुप्पितौ' (पा. सू. ३. १. ४) इति अम् इत्येतत् द्वितीयेकवचनमनुदात्तम्। तस्य 'अमि पूर्वः' (पा. सू. ६. १. १०७) इति यत् पूर्वरूपं तदुदात्तम् 'एकादेश उदात्तेनोदात्तः' (पा. सू. ८. २. ५) इति सूत्रितत्वात्। अग्निशब्दो धातुजन्मेति मते सेयं प्रक्रिया सर्वापि द्रष्टव्या। मतद्वयं यास्केन प्रदर्शितं–'नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च न सर्वाणीति गार्ग्यो वैयाकरणानां चैके' (निरु. १. १२) इति। गार्ग्यस्य मतेऽग्निशब्दस्याखण्डप्रातिपदिकवात् 'फिपोऽन्त उदात्तः'

१. ग य–हविर्वहन्। २. त–उणादिसूत्रेण। ३. ठ–तयोरन्यतरदुदात्तमवशिष्टेतरदनुदात्तम्। ४. ठ–धातुजन्य इति। ५. ग–घ–छ–ण–य– प्वग्रणीत्यादिनि॰। ६. च–छ–ठ–त–थ–फ–तत्र।

NOTES

NOTES

(फि. सू. १) इत्यन्तोदात्तत्वम्। पूर्वोक्तेष्वग्रणीरिस्यादिनिर्वचनेषु प्रकृतिप्रत्ययाद्य-शेपप्रक्रिया यथोचित्तं कल्पनीया। एतदेवाभिप्रेत्य यास्क आह–'अथ निर्वचनं तद्येपु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्बृयादथानन्विते ऽर्थेऽग्रप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद्वृत्ति-सामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयान्नत्वेव न निर्ब्रूयात्' (निरु. २. ५) इति। अस्यायमर्थः–तैत्तत्र निर्वचनीयपदसमूहमध्ये येप्वग्न्यादिपदेषु पूर्वोक्तरीत्या स्वरस्संकारौ समर्थो व्याकरणसिद्धौ स्याताम्। स्वर उदात्तादिः संस्कारो निप्रत्ययादिः। किंच तौ स्वरसंस्कारौ प्रादेशिकेन गुणेनान्वितौ स्याताम्। शब्दस्यैकदेशः पूर्वोक्तोऽगिधातुः प्रदेशः। तत्र भवो गुणो गतिरूपोऽर्थः। तेनान्वितौ। तान्यग्न्यादिपदानि तथा व्याकरणानुसारेण निर्ब्रूयात्। तञ्च निर्वचन-मस्माभिः प्रदर्शितम्। अथ पूर्वोक्त वैलक्षण्येन कश्चित् स्वेन विवक्षितोऽर्थो नान्वितः तस्मिन् शब्देऽनुगतो न भवेत्। तस्यैव व्याख्यानम् 'अप्रादेशिके विकारे' इति। अग्रनयनादिरूपः क्रियाविशेषो विकारः। स च प्रदेशेनाग्निशब्दैक-देशेनान्न नाभिधीयते इत्यप्रादेशिकः। एवं सति यः पुमानर्थनित्यः स्वविवक्षितेऽर्थे नियतो निर्बन्धवान्। ब्राह्मणानुसारेण वा देवतान्तरविशेषणत्वेन योजयितुं वा स निर्बन्धैः। तदानीं स पुमान् केनचित् वृत्तिसामान्येन स्वविवक्षितमर्थं परीक्षेत, तस्मिन् शब्दे योजयेत्। वृत्तिः क्रिया। तद्रूपेण सामान्यं सादृश्यम्। अस्माभिश्च अग्रनयनादिरूपं क्रियात्वसामान्यमुपजीव्य अग्रणीत्वाद्यर्थो योजितः। तदिदं यास्काभिमतं निर्वचनम्। स्थौलाष्ठीविः अक्षरसाम्यान्निर्वक्ति। अक्नोपनशब्दस्यादौ निषेधार्थम् अकाररूपमक्षरं विद्यते। अग्निशब्दस्याप्यादौ अकारोऽस्ति। तदिदमक्षरसाम्यम्। शाकपूणिस्तु वर्णसाग्यान्निर्व्रूते–दग्धशब्दाग्निशब्दयोर्गकारवर्णेन साम्यम्। सर्वथापि निर्वचनं न त्याज्यमिति। ईले इत्येतत्पदं कृत्स्नमप्यैनुदात्तम्। 'तिङ्ङतिङः' (पा. सू. ८. १. २८) इति अतिङन्तादाग्निशब्दात् परस्य ईले इत्यस्य तिङन्तस्य निधातविधानात्। पदद्वयसंहिताकाले तु ईकारस्य धातुगतस्य उदान्तादनुदात्तस्य स्वरितः (पा. सू. ७. ४. ६६) इति स्वरितत्वम्। तस्मात् ऊर्ध्वभाविन एकारस्य तिङ्प्रत्ययरूपस्य 'स्वरितात्संहितायामनुदात्तानाम्' (पा. सू. १. २. ३.९) इति ऐकश्रुत्यं प्रचयनामकं भवति। पुरःशब्दोऽन्तोदात्तः। 'अयं पुरो भुवः' (तै. सं. ४. ३.२.१) इत्यत्र तथैवाग्नातग्वात्। 'पूर्वाधरावराणामसि पुरधवश्चैपाम्' (पा. सू. ५.३.३९) इति पूर्वशब्दात् अप्प्रत्ययः पुरादेशश्च। ततोऽत्र प्रत्ययस्वरः (पा. सू. ३.१.३)। धाप्नो निष्ठायां 'दधातेर्हिः' (पा. सू. ७.४.४२) इत्यादेशे सति प्रत्ययस्वरेणान्तोदात्तो हितशब्दः। तत्र समासान्तोदात्तत्वे (पा. सू. ६.१.२२३) प्राप्ते तदपवादत्वेन 'तत्पुरुषे तुल्यार्थ' (पा. सू. ६.२.२)

इत्यादिना अव्ययपूर्वपदप्रकृतिस्वरत्वम्। यद्वा। 'पुरोऽव्ययम्' (पा. सू. १. ४. ६७) इति गतिसंज्ञायां 'गतिरनन्तरः' (पा. सू. ६. २. ४९) इति पूर्वपदप्रकृतिस्तरत्वम्। तत ओकार उदात्तः अवशिष्टानामनुदात्तस्वरितप्रचयाः पूर्ववत् द्रष्टव्याः। आद्याक्षरस्य संहितायां प्रचयप्राप्तौ (पा. सू. १.२. ३९) 'उदात्तस्वरितपरस्य सन्नतरः' (पा. सू. १. २. ४०) इत्यतिनीचोऽनुदात्तः। 'यजयाच' (पा. सू. ३. ३. ९०) इत्यादिना यजतेः नङ्प्रत्यये सैति अन्तोदात्तो यज्ञशब्दः। विभक्तेः सुप्स्वरेणानुदात्तत्वे सति (पा. सू. ३. १. ४) पश्चात् स्वरितत्वम्। देवशब्दः पचाद्यजन्तः (पा. सू. ३. १. १३४)। स च फिट्स्वरेण (फि. सू. १) प्रत्ययस्वरेण (पा. सू. ३. १. ३) चित्स्वरेण (पा. सू. ३. १. १६३) वा अन्तोदात्तः। ऋत्विक्शब्दः 'ऋतौ यजति' इति विग्रहे सति 'ऋत्विग्दधृक्' (पा. सू. ३. २. ५९) इति निपातितः। 'गतिकारकोपपदास्कृत्' (पा. सू. ६. २. १३९) इति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः। विभक्तिस्वरः पूर्ववत्। होतृशब्दस्तृन्प्रत्ययान्तः (पा. सू. ३. २. १३५)। नित्स्वरेणाद्युदात्तः (पा. सू. ६. १. १९७)। स्वरितप्रचयौ पूर्ववत्। रत्नशब्दो 'नब्विपयस्यानिसन्तस्य' (फि. सू. २६) इत्याद्युदात्तः। तथा चाम्नायते–'रत्नं धाता' इति। रत्नानि दधातीति विग्रहः। समासत्वादन्तोदात्तो रत्नधाशब्दः। यद्वा कृदुत्तरपदप्रकृतिस्वरः। तमप्प्रत्ययस्य (पा. सू. ५. ३. ५५) पित्स्वरेणानुदात्ते सति (पा. सू. ३. १. ४) स्वरितप्रचयौ। संहितायामाद्याक्षरस्य प्रचयो द्वितीयाक्षरस्य सन्नतरत्वम्। 'वेदावतार आद्याया ऋचोऽर्थश्च प्रपञ्चितः। विज्ञातं वेदगाम्भीर्यमथ संक्षिप्य वर्ण्यते'।।

**अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भि॒रीड्यो॒ नूत॑नैरु॒त। स दे॒वाँ एह व॑क्षति॥ २॥**

अ॒ग्निः। पूर्वे॑भिः। ऋषि॑ऽभिः। ईड्यः॑। नूत॑नैः उ॒त। सः। दे॒वान्। आ। इ॒ह। व॒क्ष॒ति॒।। २।।

अयम् ᵛअग्निः ᵛपूर्वेभिः पुरातनैर्भृग्वङ्गिरःप्रभृतिभिः ᵛऋषिभिः ᵛईड्यः स्तुत्यः, ᵛनूतनैः ᵛउत इदानींतनैरस्माभिरपि स्तुल्यः। ᵛसः अग्निः स्तुतः सन् ᵛइह यज्ञे ᵛदेवान् हविर्भुजः ᵛआ ᵛवक्षति। 'वह प्रापणे' इति धातुः। आवहतु इत्यर्थः।। पूर्वेभिरित्यत्र 'बहुलं छन्दसि' (पा. सू. ७. १. १०) इति भिसऐसादेशाभावः। 'पूर्व पर्व अर्व पूरणे' इति धातुः। पूर्वतिधातोः अन्प्रत्यय औणादिकः।

---

१. ठ–निर्णयः। २. ग-थ-य-वृत्तिसाम्येन। ३. च-ठ-थ-फ-क्रियात्वसाम्यमुपजाव्य। ४. ठ-अक्नोपन इति तस्यादौ। ५. ठ-'अपि' नास्ति। ६. ठ-सति प्रत्ययस्वरेण अन्तोदात्तः। ७. त-थ-°णानुदात्तत्त्वे। ८. क-ख-झ-ण-न-श-स्वरितप्रचितौ।

NOTES

NOTES

इन्प्रत्ययान्त ऋषिशब्दः 'ऋष्यन्धक' (पा. सू. ४. १. ११४) इति निपातनात् लघूपधगुणाभावः (पा. सू. ७. ३. ८६)। कित्प्रत्ययो वात्र ज्ञेयः (उ. सू. ४. ५५९)। तौ शब्दौ नित्स्वरेणाद्युदात्तौ। ईड्यशब्दस्यण्यरप्रत्ययान्तत्वात् (पा. सू. ३. १. १२४) 'तित्वरितम्' (पा. सू. ६. १. १८५) इति स्वरिते शेषानुदातत्वे च प्राप्ते तदपवादत्वेन 'ईढवन्द' (पा. सू. ६. १. १८५) इति स्वरिते शेषानुदात्तत्वे च प्राप्ते तदपवादत्वेन 'ईढवन्द' (पा. सू. ६. १. २१४) इत्यादिनाद्युदात्तत्वम्। 'नवस्य नू रनप्तनग्वाश्च' (पा. सू ५. ४. ३०. ६) इति वार्तिकेन नवशब्दस्य नू इत्यादेशः तनन्प्रत्ययश्च महावार्तिके विहितः। ततो नित्स्वरेणाद्युदात्तः। अवशिष्टस्वरा अग्न्यादिपु नूतनान्तेषु पूर्ववदुन्नेयाः। उतशब्दो यद्यपि विकल्पार्थे प्रसिद्धस्तथापि निपातत्वेनानेकार्थत्वादौचित्येनात्र समुच्चयार्थो द्रष्टव्यः। 'उच्चावचेष्वर्थेपु निपतन्ति' इति निपातत्वम्। तर्हि 'निपाता आद्युदात्ताः' (फि. सू. ८०) इत्युकारस्योदात्तः प्राप्त इति चेत्। न। प्रातःशब्दवदन्तोदात्तवात्। यथा प्रातःशब्दोऽन्तोदात्तत्वेनैव स्वरादिपु (पा. सू. १. १. ३७) पठितः, एवमुतशब्दस्यापि पाठो द्रष्टव्यः, स्वरादेराकृतिगणत्वात्। येद्वा 'एवादीनामन्तः' (फि. सू. ८२) इत्यन्तोदात्तैः। स इत्यत्र फिट्स्वरः। देवशब्दः पूर्ववत्। देवान् इत्यस्य नकारस्य संहितायां 'दीर्घादटि' (पा. सू. ८. ३. ९) इति रुप्वम्। 'अन्नानुनासिकः' (पा. सू. ८. ३. २) इत्यनुवृत्तौ 'आतोऽटि नित्यम्' (पा. सू. ८. ३. ३) इत्याकारः सानुनासिकः। 'भोभगो' (पा. सू. ८. ३. १७) इति रीर्यकारः। स च 'लोपः शाकल्यस्य' (पा. सू. ८. ३. १९) इति लुप्यते। तस्यासिद्धत्वात् (पा. सू. ८. २. १) न पुनः संधिकार्यम्। आडो निपातत्वादाद्युदात्तत्वम्। इदमो हप्रत्यये सति निष्पन्नत्वात् (पा. सू. ५. ३. ११) इहशब्दं प्रत्ययस्वरः। वहति धातोर्लोडर्थे छान्दसो लृट्। तस्यै स्यप्रत्ययगतस्य यकारस्य लोपोऽपि छान्दसः। यद्वा। लेटि 'सिब्बहुलम्' (पा. सू. ३. १. ३४) इति सिप्प्रत्ययः। 'लेटोऽडाटौ' (पा. सू. ३. ४. ९४) इत्यडागमश्च। ततो वक्षतीति संपद्यते। तस्यै तिडन्तत्वान्निघातः। संहितास्वराः पूर्ववत्।।

आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या (आश्व, श्रौ. २. १)। सूक्तगना तृतीया।।

---

१. ग-घ-छ-ण-य-'यद्वा....... इत्यन्तोदात्तः' नास्ति; त-थ-'अन्तोदात्तः' इत्यस्व स्थाने 'अन्तोदात्वम्'। २. ठ-संधिः। ३. त-थ-ह इति हप्रत्यये। ४. ठ-त-थ-'तस्य' नास्ति। ५. त-थ-तस्य तिङ्ठतिष्ठः इति तिडन्तत्वान्निघातः। ६. ग-य-संपाद्यन्ते।

**अग्निना रयिमश्नवत्पोषमेव दिवेदिवे। यशसं वीरवत्तमम्॥ ३॥**

अग्निना। रयिम्। अश्नवत्। पोषम्। एव। दिवेऽदिवे। यशसम्। वीरवत्ऽतमम्॥ ३॥

योऽय होत्रा न्तुत्योऽग्निस्तेन 'अग्निना निमित्तभूतेन यजमानः 'रयिं धनम् 'अशनवत प्राप्नोति। कीदृशं रयिम्। 'दिवेदिवं 'पोपम् 'एव प्रतिदिनं पुण्यमाणतया वर्धमानमेव, न तु कदाचिदपि क्षीयमाणम्। 'यशसं दानादिना यशोयुक्तं 'वीरवत्तमम् अतिशयेन पुत्रनृत्यादिवीरपुरुषोपेतम्। सति हि धने पुरुषाः संपर्द्धन्ते। रसिशब्दो 'मघम्' इत्यादिघननामसु (नि. श्च. २. १०. ८) पठितः। तत्र फिट्स्वरः। अश्नोतेर्धातोर्लेटि व्यत्ययेन तिप्। 'इतश्च लोपः' (पा. सू. ३. ४. ९७) इति इकारलोपः। 'लेटोऽहाटौ' (पा. सू. ३. ४. ९४) इत्यडागमः। ततः 'अशनवत्' इति भवति। तस्य निघातः। घञन्तश्वात् (पा. सू. ६. १. १९७) पोपशब्द आद्युदात्तः। एवशब्दस्य निपातत्वेऽपि 'एवादीनामन्तं' (फि. सू. ८२) इत्यन्तोदात्तत्वम्। वकारान्तात् दिव्शब्दात परस्याः सप्तम्याः 'सुपां सुलुक्' (पा. सू. ७. १. ३९) इत्यादिना शेभावे सति 'सायेकाचः' (पा. सू. ६. १. १६८) इत्यादिना 'ऊडिदंपदात°' (पा. सू. ६. १. १७१) इत्यादिना वा तस्योदात्तत्वम्। 'नित्यवीप्सयोः' (पा. सू. ८. १. ४) इति द्विर्भावे सति उत्तरभागस्य 'अनुदात्तं च' (पा. सू. ८. ९. ३.) इत्यनुदात्तत्वम्। यशोऽस्यास्तीति विग्रहे सति 'अर्शआदिभ्योऽच्' (पा. सू. ५. २. १२७) इति अच्प्रत्ययः। चित्स्वरं व्यत्ययेन बाधित्वा मध्योदात्तव्यम्। फिट्स्वरेणान्तोदात्तात् वीरशब्दात् उत्तरयोर्मतुपृतमपोः पित्वादनुदात्तत्वम्। 'ह्रस्वनुड्म्र्याम्' (पा. सू. ६. १. १७६) इति तु न साववर्णान्तत्वात्। 'न गोश्वन्°' (पा. सू. ६. १. १८२) इति प्रतिपेधेः॥

अभिप्लवपडहस्य मध्यवर्तिपूक्थेषु तृतीययसवने मैत्रावरुणस्य 'अग्ने ये यज्ञम्' इत्यादिको बैकल्पिकोऽनुरूपस्तृचः। एतश्च सप्तमाध्याये 'एह्यपु' इत्यादिखण्डे सूत्रितम्–'अग्निं वो वृधन्तमग्ने यं यज्ञमध्वरम्' (आश्व. श्रौ. ७. ८) इति॥

**अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि। स इद्देवेपु गच्छति॥ ४॥**

---

१. ग-घ-च-छ-ठ-ण-त-थ-फ-य-'ह्रस्वनुङ्भ्यां.........प्रतिषेधः' नास्ति। २. ठ-'तस्मिन् तृचे या प्रथमा सा सूक्ते चतुर्थी' इत्यधिकं इतीत्यस्यानन्तरम्। ३. च-छ-ठ-ण-त-थ-फ-जनयितुम्। ४. ठ-प्रागादिचतुर्षु देशेषु। ५. ठ-प्रत्ययस्वरम्। ६. च-छ-त-थ-फ-चित्रकीर्ति। ७. ग-घ-च-छ-ण-त-थ-फ-य-'सत्सु साधुः...... निपातितः' नास्ति।

NOTES

NOTES

अग्ने। यम्। यज्ञम्। अध्वरम्। विश्वतः। परिऽभूः। असि सः। इत्। देवेषु। गच्छति ।। ४।।

हे ᵛअग्ने त्वं ᵛयं ᵛयज्ञं ᵛविश्वतः सर्वासु दिक्षु ᵛपरिभूः परितः प्राप्तवान् ᵛअसि ᵛसः ᵛइत् स एव यज्ञो ᵛदेवेषु तृप्तिं प्रणेतुं स्वर्गे गच्छति। प्राच्यादिचतुर्दिगन्तेपुं आहवनीयमार्जालीयगार्हपत्याग्नीध्रीयस्थानेषु अग्निरस्ति। परिशब्देन होत्रीयादिधिष्ण्यव्याप्तिर्विवक्षिता कीदृशं यज्ञम्। ᵛअध्वरं हिंसारहितम्। न ह्यग्निना सर्वतः पालितं यज्ञं राक्षसादयो हिंसितुं प्रभवन्ति।। अग्निशब्दस्य पाष्ठिकम् (पा. सू. ६. १. १९८) आमन्त्रिताद्युदात्तत्वम्। न विद्यते ध्वरोऽस्येति बहुव्रीहौ 'नञ्सुभ्याम्' (पा. सु. ६. २. १७२) इत्यन्तोदात्तत्वम्। विभतः इत्यत्र तसिलः प्रत्ययस्वरत्वं बाधित्वा पूर्ववर्णस्य 'लिति' (पा. सू. ६. १. १९३) इत्युदात्तत्वम्। परिभृरित्यत्र अव्ययपूर्वपदप्रकृतिस्वरत्वे प्राप्ते (पा. सू. ६. २. २) तदपवादत्वेन कृदुत्तरपदप्रकृतिस्वररत्वम् (पा. सू. ६. २. १३९)। असि इति तिङन्तम्य 'यद्वृत्तान्नित्यम्' (पा. सू. ८. १. ६६) इति निघाताभावः।।

**अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः। देवो देवेभिरा गमत्।। ५।।**

अग्निः । होता। कविऽक्रतुः। सत्यः। चित्रश्रवःऽतमः। देवः। देवेभिः। आ। गमत्।। ५।।

अयम् ᵛअग्निः ᵛदेवः अन्यैर्देवैर्हविर्भोजिभिः सह ᵛआ ᵛगमत् अस्मिन् यज्ञे समागच्छतु। कीदृशोऽग्निः। ᵛहोता होमनिप्पादकः ᵛकविक्रतुः। कविशब्दोऽत्र कान्तवचनो न तु मेधाविनाम। क्रतुः प्रज्ञानस्य कर्मगो वा नाम। ततः कान्तप्रज्ञः क्रान्तकर्मा या। ᵛसत्यः अनृतरहितः फलमवश्यं प्रयच्छतीत्यर्थः। ᵛचित्रश्रवस्तमः। श्रुयते इति श्रवः कीर्तिः। अतिशयेन विविधः कीर्तियुक्तः।। कविक्रतुः चित्रश्रवस्तमः इत्यत्रोभयत्र बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरत्वम् (पा. सू. ६. २. १)। सत्सु साधुः सत्यः 'सत्यादशपथे' (पा. सू. ५. ४. ६६) इत्यत्रान्तो- दात्तो हरदत्तेन निपातितः। लोडन्तस्य गच्छतु इति शब्दस्य छन्वाभावः। उकारलोपश्छान्दसः। ततो रूपं गमत् इति भवति। स्पष्टमन्यत्।। १।।

**यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि। तवेत्तत्सत्यमङ्गिरः।। ६।।**

यत्। अङ्ग। दाशुषे। त्वम्। अग्ने। भद्रम् करिष्यसि। तव। इत्। तत्। सत्यम्। अङ्गिरः ।। ६।।

अङ्ग इत्यभिमुखीकरणार्थो निपातः। ᵛअङ्ग ᵛअग्ने हे अग्ने त्वं ᵛदाशुषे हविर्दत्तवते यजमानाय तत्प्रीत्यर्थं ᵛयत् भद्रं वित्तगृहप्रजापशुरूपं कल्याणं

NOTES

ᵛकरिष्यसि ᵛतत् भद्रं ᵛतव ᵛइत् तवैव। सुखहेतुरिति शेषः। हे ᵛअङ्गिरः अग्ने एतञ्च ᵛसत्यं न त्वत्र विसंवादोऽस्ति। यजमानस्य वित्तादिसंपत्तौ सत्यामुत्तरकत्व-नुष्ठानेनाग्नेरेव सुखं भवति। भद्रशब्दार्थ शाट्यायनिनः समामनन्ति–'यद्वै पुरुषस्य वित्तं तद्भद्रं गृहा भद्रं प्रजा भद्रं पशवो भद्रम्' इति।। अङ्गशब्दस्य निपातत्वेऽपि अभ्यादित्वात् (फि. सू. ८१) अन्तोदात्तत्वम्। 'दाश्वान्साह्वान्' (पा. सू. ६. १. १२) इति सूत्रेण 'दाशृ दाने' इति धातोः कसुप्रत्ययो निपातितः। तत्र प्रत्ययस्वरः (पा. सू. ३. १. ३)। आमन्त्रितस्य अग्निशब्दस्य पदात्परत्वेन आष्टमिकानुदात्तत्वं (पा. सू. ८. १. १९) न शङ्कनीयम्, '°अपादादौ' (पा. सू. ८. १. १८) इति पर्युदस्तत्वात्। ततः पाष्ठिकम् (पा. सू. ६. १. १९८) आद्युदात्तत्वमेव। भद्रशब्दस्य नब्विपयत्वेन (फि. सू. २६) आद्युदात्तत्वप्रसक्तावपि 'भदि कल्याणे' इति घातोरुपरि रक्प्रत्ययेन निपातनादन्तो-दात्तत्वम्। अस्मिन् वाक्ये यच्छब्दप्रयोगात् 'निपातैर्यद्यदिहन्त°' (पा. सू. ८. १०. ३०) इति निघाते प्रतिपिद्धे स्यप्रत्ययस्वरेण सति शिटेन करिप्यसिशब्द उपान्त्योदात्तः। तवेत्यत्र 'युष्मदस्मदोर्ङसि' (पा. सू. ६. १. २११) इत्याद्युदात्तत्वम्। 'अङ्गिरा अङ्गाराः' (निरु. ३. १७) इति यास्कः। ऐतरेयिगोऽपि प्रजापति-दुहितृध्यानोपाख्याने समामनन्ति–'येऽङ्गाराः' आसंस्तेऽङ्गिरमोऽभवन्' (ऐ. ब्रा. ३. ३४) इति। तस्मात् अङ्गिरोनामकमुनिकारणत्वात् अङ्गाररूपस्याग्नेरङ्गिरस्त्वम्। अत्र पदात्परत्वेनाष्टमिकानुदात्तत्वम्।।

अग्नीपोमप्रणयने 'उप त्वाग्ने' इत्यादिकोऽनुवचनीयस्तृचः। एतञ्च ब्राह्मणे समाम्नातम्– 'उप त्वाग्ने' दिवेदिव उप प्रियं पनिप्नतमिति तिस्रश्चैकां चान्वाह' (ऐ. ब्रा. १. ३०) इति।।

**उप॑ त्वाग्ने दि॒वेदि॑वे दोषा॑वस्तर्धि॒या व॒यम्। नमो॒ भर॑न्त॒ एम॑सि।। ७।।**

उप॑। त्वा॒। अग्ने॒। दि॒वेऽदि॑वे दोषा॑ऽवस्तः। धि॒या। व॒यम्। नम॒ः। भर॑न्त॒ः। आ। इ॒म॒सि॒।। ७।।

हे ᵛअग्ने वयम् अनुष्ठातारः ᵛदिवेदिवे प्रतिदिनं ᵛदोषावस्तः रात्रावहनि च ᵛधिया बुद्धया ᵛनमः ᵛभरन्तः नमस्कारं संपादयन्तः ᵛउप समीपे ᵛत्वा ᵛएमसि त्वामागच्छामः।। उपशब्दस्य निपातस्वरः (फि. सू. ८०)। 'स्वामौ द्वितीयायाः' (पा. सू. ८. १. २३) इति युष्मच्छब्दस्यानुदात्तस्त्वादेशः। दोषःशब्दो रात्रिवाची। वस्तर् इति अहर्वाची। द्वन्द्वसमासे कार्तकौजपादित्वात् (पा. सू. ६. २. ३७)

१. ठ–विवादोऽस्ति। २. ठ–दाशुष इति शब्दो दाश्वान्साह्वान्; फ–दाशुषे। दाश्वान्साह्वान्। ३. ठ–ततः।

NOTES

आद्युदात्तः। 'सावेकाचः°' '(पा. सू. ६. १. १६८) इति धियो विभक्तिरुदात्ता। नम इति निपातः। भरन्त इत्यत्र शपः (पा. सू. ३. १. ६८) पित्त्वात् शतुर्लसार्वधातुकत्वाश्च अनुदात्तत्वे सति (पा. सू. ६. १. १८६) धातुस्वरः शिष्यते। इमसि इत्यत्र 'इदन्तो मसिः' (पा. सू. ७. ७. ४६) इत्यादेशो निघातश्च।

**राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानं स्वे दमे॥ ८॥**

राजन्तम्। अध्वराणाम्। गोपाम्। ऋतस्य। दीदिविम्। वर्धमानम्। स्वे। दमे।। ८।।

पूर्वमन्त्रे त्वामुपैम इत्यग्निमुद्दिश्योक्तम्। कीदृशं त्वाम्। ᵛराजन्तं दीप्यमानम् ᵛअध्वराणां राक्षसकृतहिंसारहितानां यज्ञानां ᵛगोपां रक्षकम् ᵛऋतस्य सत्यस्यावश्यंभाविनः कर्मफलस्य ᵛदीदिविं पौनः–पुन्येन भृशं वा द्योतकम्। आहुत्याधारमग्निं दृष्ट्वा शास्त्रप्रसिद्धं कर्मफलं स्मर्यते। ᵛस्वे ᵛदमे स्वकीयगृहे यज्ञशालायां हविर्भिः ᵛवर्धमानम्।। राजन्तं वर्धमानमित्यत्रोभयत्र पूर्ववत् धातुस्वरः शिष्यते। दीदिविशब्दस्य 'अभ्यस्तानामादिः' (पा. सू. ६. १. १७९) इत्याद्युदात्तत्वम्। दमशब्दो वृषादित्वात् (पा. सू. ६. १. २०३) आद्युदात्तः।।

**स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये॥ ९॥**

सः। नः। पिताऽइव। सूनवे। अग्ने। सुऽउपायनः। भव। सचस्व। नः। स्वस्तये।। ९।।

हे ᵛअग्ने सःᵛ त्वंः ᵛनः अस्मदर्थ सूपायनः शोभनप्राप्तियुक्तः ᵛभव। तथा नः अस्माकं ᵛस्वस्तये ᵛविनाशराहित्यार्थं ᵛसचस्व समवेतो भव। तत्रोभयत्र दृष्टान्तः। यथा ᵛसूनवे पुत्रार्थं पिता सुप्रापः प्रायेण समवेतो भवति तद्वत्।। अस्मच्छब्दादेशस्य न इत्येतस्य 'अनुदात्तं सर्वम्°' (पा. सू. ८. १. १८) इत्यनुदात्तत्वम्। 'चादयोऽनुदात्ताः' (फि. सू. ८४) इति इवशब्देऽनुदात्तः। 'इवेन नित्यसमासः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्' (पा. सू. २. १. ४. २) इति समस्तः पितेवेति शब्दो मध्योदात्तः। शोभनमुपायनं यस्येति बहुव्रीहौ 'नञ्सुभ्याम्' (पा. सू. ६. २. १७२) इत्यन्तोदात्तत्वम्। सचस्वेत्यत्र पदात्परत्वं नास्तीति न निघातः। लसार्वधातुकानुदात्तत्वे सति धातुस्वरावशेषः।। २।।

'अग्निमीले' इत्यादिसूक्तमग्निष्टोमस्य प्रातरनुवाके यथा विनियुक्तं तथा 'वायवा याहि' इत्यादयस्तृचाः प्रउगशस्त्रे विनियुक्ताः। तवेदं चिन्त्यते, शस्त्रं

---

१. ख–ग–घ–छ–ण–त–थ–फ–'अदृष्टफलम्' नास्ति।

NOTES

किं देवतास्मरणरूपसंस्कारकर्म किं वा अदृष्टफलं प्रधानकर्मेति। तत्र पूर्वपक्षं जैमिनिः (जै. सू. २. १. १३-२९) सूत्रयामास–

'स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधानत्वात्' इति।। 'आज्यैः स्तुवते पृष्ठैः स्तुवते प्रउगं शंसति निष्केवल्यं शंसति' इति श्रूयते। तत्र स्तुतिः शंसनं च गुणिनिष्ठगुणाभिधानम् 'इन्द्रस्य नु वीर्याणि प्र वोचम् (ऋ. सं. १. ३२. १)' इत्यत्र दृष्टवात्। एवं सति याज्यान्यायेन गुणिन्या देवताया अभिधायकत्वेन स्तुतशस्त्रयोः संस्काररूपत्वमभ्युपेथम्। याज्यायास्तद्रूपत्वं दशमाध्यायस्य चतुर्थपादं (जै. सू. १०. ४. ३९-४९) दृष्टार्थलाभेन निर्णीतम्। तद्वदत्रापि। तुशब्दः प्रधानकर्मत्वं व्यावर्तयति।। सिद्धान्ती तं पक्षं दूषयति–

'अर्थेन त्वपकृष्येत देवतानाम्नश्चोःदनार्थस्य गुणभूतत्वात्' इति। तुशब्देन संस्कारत्वं वारयति संस्कारपक्षे प्रयोजनवशेन मन्त्रः स्वस्थानादपकृष्येत। कुतः मन्त्रगतं देवतावाचकं यदिन्द्रादिनामास्ति तञ्चोदनया मन्त्ररूपया प्रतिपाद्यस्य देवतारूपस्यार्थस्य गुणभूतम्। तस्मात् यत्र प्रधानभूतदेवतास्ति तत्र गुणभूतो मन्त्रो नेतव्यः। तद्यथा माहेन्द्रग्रहसंनिधौ 'अभि त्वा शूर' (ऋ. सं. ७. ३२. २२) इत्ययं प्रगाथ आम्नातः। स चेन्द्रं प्रकाशयति न तु महेन्द्रम्। ततो यत्रैन्द्रं कर्म तत्रायं प्रगाथोऽपकर्षणीयः। तथा सति कमसंनिधी बाध्येयाताम्।। तदेतत् सिद्धान्तिनाभिहितं दूषणं पूर्वपक्षी समाधत्ते–

'वशावद्वा गुणार्थ स्यात्' इति। वाशब्दः प्रगाथस्यान्यत्रनयनं वारयति। मन्त्रे यदेनदिन्द्रशब्दाभिधानं तदेतन्महत्वगुणोपलक्षणार्थं स्यात्। यथा 'सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामा लभेत' (तै. सं. ३. ४. ३. २) इत्यत्र अजावशाशब्देन चोदिते कर्मणि छागशब्देन केवलेन युक्ता निगमा वशात्वगुणमप्युपलक्षयन्ति तद्वत्। तस्मात् महत्त्वगुणयुक्ते चोदिते कर्मणि निर्गुणेनेन्द्रशब्देधाननाभिमविरुद्धम्। लोकेऽपि महाराजे केवलराजशब्दप्रयोगमपि पश्यामः। तदेतत् समाधानं सिद्धान्ती दूषयति–

'न श्रुतिसमवायित्वात्' इति। यदुक्तं वशान्यायेन राजन्यायेन वास्य ग्रहस्येन्द्रो देवता युज्यते इति तत्र। देवतात्वस्य तद्धितश्रुतिसमवायित्वात्। माहेन्द्रग्रह इत्यत्र सास्य देवतेत्यस्मिन्नर्थे 'महेन्द्राद्घाणौ च' (पा. सू. ४. २. २९)

१. त-थ-पूर्वहेतुसमुचयार्थः। २. ग-घ-च-छ-ण-त-थ-फ-य-व्यावृत्यर्थः। ३. ग-व-च-छ-ण-य-प्रतीयेत। ४. ठ-मन्त्रेऽपि। ५. ग-घ-छ-ण-य-विधीयेत। ६. ठ-महेन्द्रकर्मण्येषा°। ७. ग-घ-च-छ-ठ-ण-फ-य-देवतानुस्मरण°।

NOTES

इति महेन्द्रशब्दात् अण्प्रत्ययो विहितः। तस्मात् महेन्द्र एव देवता न त्विन्द्रः।। विपक्षे बाघमाह–

'गुणश्चानर्थकः' इति। यदीन्द्रो देवता स्यात् तदानीम् ऐन्द्रग्रह इत्येतावतैव अर्थावगतौ माहेन्द इति महत्त्वगुणोऽनर्थकः स्यात। चकारः पूर्वहेतुनां समुञ्चयार्थः। हेत्वन्तरमाह–

'तथा याज्यापुरोरुचोः' इति इन्द्रमहेन्द्रयोर्देवतयोर्भेदे यथा महत्त्वगुणः सार्थकस्तथा याज्यापुरोनुवाक्ययोर्भेदोऽप्यस्मिन्नेव पक्षे उपपद्यते। 'एन्द्र सानसिम्' (ऋ. सं. १. ८. १) इत्यादिके इन्द्रस्य याज्यापुरोनुवाक्ये। 'महाँ इन्द्रो य ओजसा' (ऋ. सं. ८. ६. १) इत्यादिके महेन्द्रस्य।। पूर्वपक्षिणोक्ते वशादृष्टान्ते वैपन्यमाह–

'वशायामर्थसमवायात्' इति। या वशा विधिवाक्ये श्रुता तस्या एव निगमेषु छागशब्देन व्यवहारो न विरुद्धः। छागत्वलक्षणस्यार्थस्य वशायां समवेतत्वात्। तञ्च प्रत्यक्षेणोपलभ्यते। इन्द्रमहेन्द्रयोस्तु भेद उपपादितः। तस्मात् विषमो दृष्टान्तः। एवं संस्कारपक्षे प्रगाथस्यैन्द्रकर्मण्यपकर्पप्रसङ्गात् तद्वारयितुं स्तोत्रशस्त्रयोः प्रधानकर्मत्वमिति सिद्धान्तिनो मतम्।। पुनरपि पूर्वपक्षी तदेतन्मतं निराचष्टे–

'यत्रेति वार्थवत्त्वात्स्यात्' इति। वाशब्दः सिद्धान्तिमतव्यावृत्त्यर्थम्। यत्रैन्द्रं कर्म तत्र प्रगाथो नेतव्य इत्ययमेव पक्षः स्यात्। कुतः, अर्थवत्त्वात्। ऐन्द्रो मन्त्र इन्द्रं प्रकाशयितुं समर्थ इत्यर्थवान् स्यात् महेन्द्रं तु प्रकाशयितुमसमर्थत्वादानर्थक्यं प्रगाथस्य प्रसज्येत। तस्मात् देवताप्रकाशनरूपसंस्कारकर्मत्वमेव स्तोत्रशस्त्रयोर्युक्त-मिति स्थितः पूर्वपक्षः।। अथ सिद्धान्तमाह–

'अपि वा श्रुतिसंयोगात्प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्याताम्' इति। 'अपि वा' इत्यनेन संस्कारकर्मत्वं व्यावर्त्यते। स्तौतिधातुः शंसतिधातुश्चेत्येतावुभावपि स्वप्रकरणे एव कस्याश्चित् प्रधानक्रियाया उत्पत्तिं विदध्याताम्। कुतः, श्रुतिसंयोगात् तयोर्धात्वोर्वाच्योऽर्थः श्रुतिरित्युच्यते। तत्संयोगः प्रधानकर्मत्वे सिध्यति। तथा हि गुणिनमुपसर्जनीकृत्य तन्निष्ठानां गुणानां प्राधान्येन कथनं स्तुतिः। यो देवदत्तः स चतुर्वेदाभिज्ञ इत्युक्ते सर्वे जनाः स्तुतिमवगच्छन्ति। गुणस्योपसर्जनत्वे तु न स्तुतिः प्रतीयते। 'यश्चतुर्वेदा- भिज्ञस्तमाकारय' इत्युक्ते स्तुतिं न मन्यन्ते किंत्वाह्वानप्राधान्यमेव बुध्यन्ते। एवं मन्त्रेष्वपि या देवता सेयमीदृशैर्गुणैरुपेतेति गुणप्राधान्यविवक्षायां मुख्यः स्तोतिधात्वर्थो विधियते। त्वत्पक्षे तु येयमीदृग्गुणयुक्ता सेयं देवतेति देवतास्मरणस्य प्राधान्यादियं स्तुतिर्न स्यात्। ततः श्रुतिवशादेते प्रधानकर्मणी। तथा सति देवताप्रकाशने तात्पर्याभावात्

NOTES

ऐन्द्रोऽपि प्रगाथः स्वप्रकरणगते माहेन्द्रकर्मण्येवावतिष्ठते। यदि देवतास्मरणरूपं दृष्टं प्रयोजनं न लभ्येत तर्ह्यदृष्टमस्तु।। प्रधानकर्मत्वे हेत्वन्तरमाह–

'शब्दपृथक्त्वाच्च' इति। 'द्वादशाग्निष्टोमस्य तोत्राणि द्वादश शस्त्राणि' इत्यत्र द्वादशशब्देन स्तोत्राणां पृथक्त्वमवगम्यते। देवताप्रकाशनपक्षे सर्वेरपि मन्त्रसंघैः कृतस्य प्रकाशनस्यैकत्वेन द्वादशसंख्या न स्यात्। प्रधानकर्मणां तु आज्यस्तोत्रपृष्ठस्तोत्रादिनामकानां भिन्नत्वात् द्वादशत्वसंख्योपपद्यते। एवं शस्त्रवाक्येऽपि योज्यम्।। विपक्षे वाघमाह–

'अनर्थकं च तद्वचनम्' इति। अग्निष्टुति श्रयते–'आग्नेया ग्रहा भवन्ति' इति तत्रैव पुनरप्यन्यदुच्यते–'आग्नेयीषु स्तुवते। आग्नेयीः शंसन्ति' इति। त्वत्पक्षे तद्वचनमनर्थकं स्यात्। चोदकप्राप्तेषु स्तोत्रतशस्त्रमन्त्रेष्वाग्नेयग्रहानुसारेण देवतापदस्य ऊहे सति आग्नेयत्वसिद्धेः। प्रधानकर्मपक्षे तु देवताप्रकाशनरूपत्वाभावेन ऊहाभावात् आग्नेयमन्त्रान्तरविधिवचनमर्थवद्भवति।। पुनरपि हेत्वन्तरमाह–

'अन्यश्चार्थः प्रतीयते' इति। 'संबद्धे वै स्तोत्रशस्त्रे' इति ह्याम्नातम्। संबन्धश्च द्वयोर्भवति न त्वेस्य। तस्मात् स्तोत्रशस्त्रयोरर्थभेदः प्रतीयते। स च संस्कारपक्षे न संभवति। देवताप्रकाशनरूपस्यार्थस्यैकत्वात्। प्रधानकर्मपक्षे तु स्तोत्रकर्म शस्त्रकर्म चेत्यर्थभेद उपपद्यते। यद्यपि 'ष्टुञ् स्तुतौ', 'शंसु स्तुतौ' इत्येकार्थौ, तथापि 'प्रगीतमन्त्रसाध्यं स्तोत्रम्', 'अप्रगीतमन्त्रसाध्यं शस्त्रम्' इति तयोर्विवेकः।। हेत्वन्तरमाह–

'अभिधानं न कर्मवत्' इति। तथा प्रधानकर्म 'अग्निहोत्रं जुहोति' इति द्वितीयासंयोगेनाभिहितं, तथा 'प्रउगं शंसति' इत्यभिधीयते। अतम्तत्सादृश्यात् प्रधानकर्मत्वम्।। हेत्वन्तरमाह–

'फलनिर्वृत्तिश्च' इति। 'स्तुतस्य स्तुतमसि' (तै. सं. ३. २. ७. १) इति स्तोत्रानुमन्त्रणमाम्नाय वाक्यशेषे स्तोत्रफलमेवाग्नार्तम्–'इन्द्रियावन्तो वनामहे धुक्षीमहि प्रजामिपम्' (तै. सं. ३. २. ७. २) इति। न तु देवताप्रयुक्तं फलमाम्नातम्। अतो न देवतासंस्कारः किंतु प्रधानकर्मेति स्थितम्। अनेन तु निर्णयेन प्रयोजनं विकृतिपु ऊहाभावः। संस्कारपक्षे तु यस्यां विकृतौ देवतान्तरं तत्र तद्वाचकं पदमूहनीयं स्यात्। तन्मा भूदिति प्रधानकर्मत्वमुक्तम्। एतञ्च दशमाध्याये सूत्रितं–'ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यात्'

१. ठ–द्वादशसंख्यो°। २. च–छ–फ–अग्निस्तुतिः। ३. ठ–शंसति। ४. ठ–नपरत्वाभावेन। ५. ठ–स्तोत्रशस्त्रशब्दयो°। ६. घ–छ–स्तोत्रात् फलमेवाम्नातम्; ग–ठ–भ–स्तोत्रात् फलमेवमाम्नातम्। ७. क–ग–घ–ण–त–न–य–स्तुत्यादिने। ८. च–फ–एतञ्च। ऋ. ६

NOTES

(जै. सू. १०. ४. ४९) इति। अत्र संग्रहश्लोकौ–

**प्रउगं शंसतीत्यादौ गुणतोत प्रधानता।**
**दृष्टा देवस्मृतिस्तेन गुणता स्तोत्रशस्त्रयोः॥**

**स्मृत्यर्थत्वे स्तौतिशंस्योर्धात्वोः श्रौतार्थबाधनम्।**
**तेनादृष्टमुपेत्यापि प्राधान्यं श्रुतये मतम् (जै. न्या. २. १. ५) इति॥**

अग्निष्टोमे सुस्यादिने सूर्योदयात् पूर्वं प्रेषितो होता प्रातरनुवाकमनुब्रूयात्। एतञ्चैतरेयब्राह्मणे प्रपञ्चितं–'देवेभ्यः प्रातर्यावभ्यो होतरनुब्रूहीत्याहाध्वर्युः' (ऐ. ब्रा. २. १५) इत्यादि ब्राह्मणम्। तस्मिंश्च प्रातरनुवाके 'अग्निमीले' इस्यादिसूक्तमन्तर्भूतम्। तञ्च व्याख्यातम्। प्रातःसवने वैश्वदेवग्रहणादूर्ध्वं प्रउगशस्त्रं होत्रा शंसनीयम्। तच्च शस्त्रं 'वायवा याहि' इत्यादिसप्ततृचारमकम्। एतञ्च ब्राह्मणे 'ग्रहोक्थम्' (ऐ. ब्रा. ३. १) इत्यादिखण्डे प्रपञ्चितम्। तथा पञ्चमाध्याये 'स्तोत्रमग्रे शस्त्रात्' (आश्व. श्रौ. ५. १०) इत्यादिखण्डे सूत्रितं च। अत्रेयमनुक्रमणिका–'वायो वायव्यैन्द्रवायवमैत्रावरुणास्तृचा अश्विना द्वादशाश्विनैन्द्रवैश्वदेवसारस्वतास्तृचाः सप्तैताः प्रउगदेवताः।'

## इन्द्रः १.२

**अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम्॥ १॥**

अग्निम् दूतम् वृणीमहे होतारम् विश्वऽवेदसम्। अस्य यज्ञस्य सुऽक्रतुम्॥ १॥

अग्नेर्दूतत्वम् एतन्मन्त्रव्याख्याने तैत्तिरीयब्राह्मणे समाम्नायते–'अग्निर्देवानां दूत आसीदुशनाः काव्योऽसुराणाम्' (तै. सं. २. ५. ८. ५) इति। तादृशं देवदूतम् अग्निम् अस्मिन् कर्मणि वृणीमहे संभजामः। कीदृशम्। होतारं देवानामाह्वातारं विश्ववेदसं सर्वधनोपेतम् अस्य प्रवर्तमानस्य यज्ञस्य निष्पादकत्वेन सुकतुं शोभनकर्माणं शोभनप्रज्ञं वा। 'मघम्' इत्यादिप्ववटा-विंशतिसंख्याकेषु धननामसु वेदस्शब्दः (नि. २. १०. ४) पठितः। होतारम्। 'ह्वेञ् स्पर्धायां शब्दे च' ताच्छील्यादिपु तृन्। 'बहुलं छन्दसि' (पा. सू. ६. १. ३४) इति संप्रसारणे परपूर्वत्वे गुणः। निध्वादाद्युदात्तः। विश्ववेदसम्। 'बहुव्रीहौ विश्वं संज्ञायाम्' (पा. सू. ६. २. १०६) इति पूर्वपदान्तोदात्तत्वम्। अस्य। 'ऊडिदम्' (पा. सू. ६. १. १७१) इत्यादिना विभक्तेरुदात्तत्वम्। सुक्रतुम्क्तमुम्। 'क्रत्वादयश्च' (पा. सू. ६. २. ११८) इत्याद्युदात्तत्वम्॥

१. ठ–सहस्रादप्यतिशयेन। २. ठ–मन्त्रब्राह्मणे तैत्तिरीये।

**अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम्। हव्यवाहं पुरुप्रियम्॥ २॥**

अग्निम्ऽअग्निम्। हवीमऽभिः। सदा। हवन्त। विश्पतिम्। हव्यऽवाहम् पुरुऽप्रियम्॥ २॥

यद्यप्यग्निः स्वरूपेणैक एव तथापि प्रयोगभेदात् आहवनीयादिस्थानभेदात् पावकादिविशेषणभेदाद्वा बहुविधत्वमभिप्रेत्य 'अग्निमग्निम्' इति वीप्सा। तं ᵛहवीमभिः आह्वानकरणैर्मन्त्रैः ᵛसदा ᵛहवन्त निरन्तरमनुष्ठातार आह्वयन्ति। कीदृशम्। ᵛविश्पतिं विशां प्रजानां होत्रादीनां पालकं ᵛहव्यवाहं यजमानसमर्पितस्य हवियो देवान् प्रति वोढारम्। अत एव ᵛपुरुप्रियं बहूनां प्रीत्यास्पदम्॥ अग्निमग्निम्। 'नित्यवीप्सयोः' (पा. सू. ८. १. ४) इति वीप्सायां द्विर्भावः। 'तस्य परमाम्रेडितम्' (पा. सू. ८. १. २) इत्युत्तरस्य आम्रेडितसंज्ञायाम् 'अनुदात्तं च' (पा. सू. ८. १. ३) इत्यनुदात्तत्वम्। हवीमभिः। 'ह्वेञ् स्पर्धायां शब्दे च'। आह्वानकरणभूतेषु मन्त्रेषु स्वव्यापारस्वातन्त्यात् कर्तृत्वविवक्षया 'अन्येभ्योऽपि दृश्यन्ते' (पा. सू. ३. २. ७५) इति कर्तरि मनिम्। तस्य छान्दस ईडागमः। 'वहुलं छन्दसि' (पा. सू. ६. १. ३४) इति धातोः संप्रसारणं परपूर्वत्वं गुणावादेशौ। नित्वादाद्युदात्तत्वम्। सदा। 'संर्वैकान्य' (पा. सू. ५. ३. १५) इत्यादिना सर्वशब्दात् दाप्रत्ययः। 'सर्वस्व सोऽन्यतरस्यां दि' (पा. सू. ५. ३. ६) इति सभावः। व्यत्ययेनाद्युदात्तत्वम्। हवन्त। ह्वेञो लट्। झस्य अन्तादेशः। टेः एत्वाभावश्छान्दसः। शपि 'बहुलं छन्दसि' इति संप्रसारणम्। 'तिङ्ङतिङः' इति निघातः। विश्पतिम्। 'पत्यावैश्वर्ये' (पा. सू. ६. २. १८) इति पूर्वपदप्रकृतिस्वरे प्राप्ते 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम्॥ हव्यवाहम्। 'वह प्रापणे'। 'वहश्च' (पा. सू. ३. २. ६४) इति ण्विप्रत्ययः। कृदुत्तरपदप्रकृतिस्वरत्वम्। पुरुप्रियम्। पुरूणां प्रियम्। समासान्तोदात्तत्वम्॥

**अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे। असि होता न ईड्यः॥ ३॥**

अग्ने। देवान्। इह। आ। वह। जज्ञानः। वृक्तऽबर्हिषे। असि। होता। नः। ईड्यः॥ ३॥

हे ᵛअग्ने ᵛजज्ञानः अरण्योरुत्पन्नस्त्वं ᵛवृक्तबर्हिषे आस्तरणार्थं छिन्नेन बर्हिषा युक्ताय तं यजमानमनुग्रहीतुम् ᵛइह कर्मणि हविर्भुजः ᵛदेवान् ᵛआ ᵛवह। ᵛनः अस्मदर्थं ᵛहोता देवानामाह्वाता त्वम् ᵛईड्यः स्तुत्यः ᵛअसि॥ देवान् इत्यत्र

१. च-त-प-फ-'यस्मै' नास्ति।

ऋ. १५

NOTES

NOTES

संहितायां 'दीर्घादटि समानपादे' (पा. सू. ८. ३. ९) इति रुत्वम्। 'आतोऽटि नित्यम्' (पा. सू. ८. ३. ३) इत्यनुनासिकभावः। जज्ञानः। 'जनी प्रादुर्भावे'। लिटः कानच्। 'गमहन' (पा. सू. ६. ४. ९८) इत्युपधालोपः। 'द्विर्वचनेऽचि' (पा. सू. १. १. ५९) इति तस्य स्थानिवद्भावात् द्विर्वचनम्। चित्वादन्तोदात्तः। वृक्तबर्हिषे। 'ओव्रश्च छेदने'। 'निष्ठा' (पा. सू. ३. २. १०२) इति क्तप्रत्ययः। 'यस्य विभाषा' (पा. सू. ७. २. १५) इति इट्प्रतिषेधः। वृक्तं बर्हिर्यस्मै यज्ञमानाय येन वा ऋत्विजा। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। असि। अस्तेः सिप्। 'अदिप्रभृतिभ्यः शाः' इति शपो लुक्। 'तासस्त्योलोपः' (पा. सू. ७. ४. ५०) इति सकारस्य लोपः। पादादित्वात् न निघातः। होता। ह्वयतेस्ताच्छील्यादिपु तृन्। 'बहुलं छन्दसि' (पा. सू. ६. १. ३४) इति संप्रसारणम्। नित्वादाद्युदात्तः। ईऽयः। 'ईड स्तुतौ'। 'ऋहलोर्ण्यन्' (पा. सू. ३. १. १२४) तित्स्वरिते प्राप्ते 'ईडवन्दवृशंसदुहां ण्यतः' (पा. सू. ६. १. २१४) इत्याद्युदात्तत्वम्।।

**ताँ उंशतो वि बोंधय यदग्ने यासिं दूत्यंम्। देवैरा सत्सि बर्हिंपि।। ४।।**

तान्। उशतः। वि। बोधय। यत्। अग्नेः यासिं। दूल्यम्। देवैः। आ। सत्सिः। बर्हिंपिं।। ४।।

हे vअग्ने vयत् यस्मात् कारणात् vदूत्यं vयासि देवानां दूतकर्म प्राप्नोपि तस्मात् कारणात् vउशतः हविः कामयमानान् vतान् देवान् हविःस्वीकारार्थं vवि vबोधय। विबोध्य च vबर्हिषि अस्मिन् कर्मणि तैः vदेवैः सह vआ vसत्सि आसीद आगत्योपविश।। तान्। 'दीर्घादटि समानपादे' इति संहितायां रुत्वम्। 'आतोऽटि नित्यम्' इत्यनुनासिकभावः। उशतः। 'वश कान्तौ' लटः शतृ। 'अदिप्रभृतिभ्यः शपः' इति शपो लुक्। 'ग्रहिज्या°' (पा. सू. ६. १. १६) इत्यादिना संप्रसारणम्। 'शतुरनुमो नद्यजादी' (पा. सू. ६. १. १७३) इति विभक्तेरुदात्तत्वम्। यासि। 'यद्वृत्तान्नित्यम्' (पा. सू. ८. १. ६६) इति निघातप्रतिषेधः। दूतस्य भागः कर्म वा दूत्यम्। 'दूतस्य भागकर्मणी' (पा. सू. ४. ४. १२०) इति यत्। तस्य तित्स्वरितापवादत्वेन 'यतोऽनावः' इति प्राप्तमाद्युदात्तत्वं 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति निवर्तते। अतः 'तित्स्वरितम्' (पा. सू. ६. १. १८५) इत्येव भवति। शेषनिघातः। सत्सि सीदसि। 'पद्लृ विशरणगत्यवसादनेषु'। लटः सिपि शपो 'बहुलं छन्दसि' इति लुक्। 'न लुमताङ्गस्य' (पा. सू. १. १. ६३) इति प्रत्ययलक्षणप्रतिपेधात् 'पाघ्रा' (पा. सू. ७. ३. ७८) इत्यादिना सीदादेशो न भवति। बर्हिषि। 'बृह बृहि वृद्धौ'। 'बृहेर्नलोपश्च' (उ. सू. २. २६६) इति इसिप्रत्ययः। प्रत्ययस्वरेण इकार उदात्तः।।

NOTES

**घृताहवन दीदिवः। प्रति ष्म रिषतो दह। अग्ने त्वं रक्षस्विनः॥ ५॥**

घृतऽआहवन। दीदिऽवः। प्रति। स्म। रिषतः। दह। अग्ने। त्वम्। रक्षस्विनः॥ ५॥

हे ^घृताहवन घृतेनाहूयमान ^दीदिवः दीप्यमान ^अग्ने ^त्वं ^रक्षस्विनः रक्षोयुक्तान् ^रिषतः हिंसकान् शत्रून् ^प्रति अस्माकं प्रतिकूलान् ^दह ^स्म सर्वथा भस्मीकुरु॥ घृतेनाहूयतेऽस्मिन्निति 'करणाधिकरणयोश्च' (पा. सू. ३. ३. ११७) इत्यधिकरणे ल्युट्। अत्र जुहोतेः अविवक्षितकर्मत्वेन अकर्मकत्वात् घृतस्य करणत्वमेव न तु कर्मत्वम्। अतो नैषा 'तृतीया च होश्छन्दसि' (पा. सू. २. ३. ३) इति कर्मणि तृतीया। किंतु 'कर्तृकरणयोस्तृतीया' (पा. सू. २. ३. १८) इति करणवाचिन्येव। अतः 'कर्तृकरणे कृता बहुलम्' (पा. सू. २. १. ३२) इति समासः। तत्र पूर्वपदप्रकृतिस्वरापवादे कृदुत्तरपदप्रकृतिस्वरे प्रातिपदिकावस्थायामेव कृते सति पश्चात् विभक्तावुत्पन्नायाम् 'आमन्त्रितस्य च' (पा. सू. ६. १. १९८) इत्याद्युदात्तत्वम्। दीदिवः। दीव्यतेर्लिटः क्वसुः। तस्य 'वस्वेकाजाद्धसाम्' (पा. सू. ७. २. ६७) इति नियमात् इडभावः। द्विर्वचनम्। हलादिशेषः। उत्तरवकारस्य 'लोपो व्योर्वलि' (पा. सू. ६. १. ६६) इति लोपः। क्वसुः कित्त्वात् गुणाभावः। 'तुजादीनां दीर्घोऽभ्यासस्य' (पा. सू. ६. १. ७) इति दीर्घत्वमभ्यासस्य। संबुद्धौ 'उगिदत्वाम्' (पा. सू. ७. १. ७०) इति नुम्। 'संयोगान्तस्य लोपः' (पा. सू. ८. २. २३) इति सकारलोपे नकारस्य 'मतुवसो रु संबुद्धौ छन्दसि' (पा. सू. ८. ३. १) इति रुत्वम्। विसर्गः। पदात् परत्वात् आमन्त्रितनिघातः। ननु पूर्वामन्त्रितस्य अविद्यमानवत्वात् पादादित्वेन न निघातोपपत्तिः। न च 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' (पा. सू. ८. १. ७३) 'इत्यविद्यमानवश्वप्रतिषेधः' उभयोरग्निपदविशेषणत्वेन विशेषवचनत्वात्। अत एव परस्परमनन्बयेन असामर्थ्यात् 'समर्थः पद्विधिः' (पा. सू. २. १. १) इति च नियमात् पूर्वस्य न पराङ्गवद्भावो येन ऐकपद्येन निघातः स्यात्। अत एव हि 'इडे रन्तेऽदिते सरस्वति' (तै. सं. ७. १. ६. ८) इत्यादौ पृथक् पृथक् आद्युदात्तत्वमिति। उच्यते—अत्र 'दीदिवः' इति नाग्निपदस्य विशेषणं किंतु घृताहवनपदस्यैव द्योतनार्थम्; घृताहवन इति विशेष्यत्वेन विवक्षितत्वात्। विशिष्टस्य तु पश्चादग्निविशेषणता। तत्र दीदिवःपदं प्रति घृताहवनपदस्य विशेष्यत्वात् 'नामन्त्रिते समानाधिकरणे°' (पा. सू. ८. १. ७३) इत्यविद्यमानवत्त्वप्रतिषेधात् निघातोपपत्तिः अत एव परस्परविशेषणविशेष्यभावेन सामर्थ्यात् 'सुबामन्त्रिते' (पा. सू. २. १. २) इति पराङ्गवद्भावे शेषनिघातेनापि

NOTES

स्वरोपपत्तिरिति। 'इडे रन्ते' इत्यादौ तु नैवं परस्परान्वय इति वैषम्यम्। रिषतः। 'रुप रिप हिंसार्थाः' इति। भौवादिकस्य लटः शत्रादेशे शपि छान्दसो गुणाभावः। तौदादिकस्य वा 'रुश रिश हिंसायाम्' इत्यस्य छान्दसं पत्वम्। विकरणस्य शस्य ढित्वाद्गुणाभावः रक्षस्शब्दात् 'अस्मायामेधास्त्रजो विनिः' (पा. सू. ५. २. १२१) इति मत्वर्थीयो विनिः। तस्य प्रत्ययाद्युदात्तत्वम्।।

अग्निमन्थने 'अग्निनाग्निः समिध्यते' इत्येपानुवचनीया। 'प्रातर्वैश्वदेव्यां प्रेषितः' इति खण्डे सूत्रितम्–'अग्निनाग्निः समिध्यते त्वं ह्यग्ने अग्निना' (आश्व. श्रौ. २. १६) इति। एषैव अग्निमत इत्यस्य अनुवाक्या। 'अथाग्नेय्यः' इति खण्डे 'अग्नावग्निप्रणयने' इत्युपक्रम्य सूत्रितं–'यद्वो वयं प्रमिनाम व्रतान्यग्निनाग्निः समिध्यते' (आश्व. श्रौ. ३. १३) इति।।

**अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा। हव्यवाड् जुह्वास्यः।। ६।।**

अग्निना अग्निः। सम् इध्यते। कविः। गृहऽपतिः। युवा। हव्यऽवाट्। जुहुऽआस्यः।। ६।।

ᵛअग्निः आहवनीयाख्यः तस्मिन् प्रक्षिप्यमाणेन ᵛअग्निना। निर्मथ्येन प्रणीतेन वा सह समिध्यते। सम्यक् दीप्यते। कीदृशोऽग्निः। ᵛकविः मेधावी ᵛगृहपतिः यजमानगृहस्य पालकः ᵛयुवा नित्यतरुणः ᵛहव्यवाट् हविषो वोढा ᵛजुह्वास्यः जुहरूपेण मुखेन युक्तः।। गृहपतिः। 'पव्यावैश्वर्ये' (पा. सू. ६. २. १८) इति पूर्वपदप्रकृतिस्वरत्वम्। युवा। 'यु मिश्रणे'। 'कनिन्युवृपितक्षिराजि-धन्विद्युप्रतिदिवः' (उ. सू. १. १५४) इति कनिन् नित्वादाद्युदात्तः। हव्यं वहतीति हव्यवाट्। 'वहश्च' (पा. सू. ३. २. ६४) इति ण्विप्रत्ययः। णित्त्वादुपधावृद्धिः। गतिकारकोपपदात् कृदुत्तरपद्प्रकृतिस्वरत्वम्। जुह्वास्यः। हूयतेऽनयेति जुहूः। 'हुवः श्लुवच्च' (उ. सू. २. २१८) इति क्विप्। तसंनियोगात् दीर्घः। श्लुवद्भावात् द्विर्भावः। चुत्वजश्त्वे। प्रातिपदिकस्वरेणान्तोदात्तः। जुहूः आस्यं यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन स एव शिष्यते। शेषनिघातः। यणादेशे 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (पा. सू. ८. २. ४) इति आकारः स्वरितः।। २२।।

**कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे। देवममीवचातनम्।। ७।।**

कविम्। अग्निम्। उप। स्तुहि। सत्यऽधर्माणम्। अध्वरे। देवम्। अमीवऽचातनम्।। ७।।

हे स्तोतृसंघ ᵛअध्वरे ऋतौ ᵛअग्निम् ᵛउप ᵛस्तुहि उपेत्य स्तुतिं कुरु। कीदृशम्। ᵛकविं ᵛमेधाविनं ᵛसत्यधर्माणं सत्यवदनरूपेण धर्मेणोपेतं ᵛदेवं

द्योतमानम् अमीवचातनम् अमीवानां हिंसकानां शत्रूणां रोगाणां वा घातकम्।। सत्यं धर्मो यस्येति सत्यधर्मा। 'धर्मादनिच् केवलात्' (पा. सू. ५. ४. १२४) इति अनिच् समासान्तः। अन्तःपदेन तस्य समासत्वाभिधानात् बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे शेषनिघातेनानुदात्तत्वम्। अमीवशब्दः 'अम रोगे' इत्यस्मात् 'शेवयह्वजिह्वाग्रीवाप्वामीवाः' (उ. सू. १. १५२) इति वन्प्रत्यये ईडागमे च निपातितः। नित्त्वादाद्युदात्तः। 'चते चदे याचने च' इत्यस्मात् हिंसार्थात् णिजन्तात् नन्द्यादित्वात् ल्युः (पा. सू. ३. १. १३४)। योरनादेशः (पा. सू. ७. १. १)। 'णेरनिटि' (पा. ६. ४. ५१) इति णेर्लोपः। 'लिति' (पा. सू. ६. १. १९३) इति धातोः अकारस्योदात्तत्वम्। न च स्वर कर्तव्ये णिलोपस्य स्थानिवद्भावः 'न पदान्तद्विर्वचन' (पा. सू. १. १. ५८) इत्यादिजा प्रतिपेधात्। अमीवानां चातनः इति समासे कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते।।

**यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति। तस्य स्म प्राविता भव।। ८।।**

यः। त्वाम्। अग्ने। हविःऽपतिः। दूतम्। देव। सपर्यति। तस्य। स्म। प्रऽअविता। भव।। ८।।

हे अग्ने देव यः हविष्पतिः यजमानः देवदूतं त्वां सपर्यति एरिचरति तस्य यजमानस्य प्राविता भव स्म अवश्यं रक्षको भव।। हूयते इति हविः। 'अर्चिशुचि' (उ. सू. २. २६५) इत्यादिना इसिः। प्रत्ययस्वरेण इकार उदात्तः। हविषः पतिर्हविप्पतिः। 'नित्यं समासेऽनुत्तरपदस्थस्य' (पा. सू. ८. ३. ४५) इति पत्वम्। 'पत्यावैश्वर्ये' (पा. सू. ६. २. १८) इति पूर्वपदप्रकृतिस्वरत्वम्। सपरशब्दात् 'कण्ड्वादिभ्यो यक्' (पा. सू. ३. १. २७) इति यक्। धातुप्रकरणात् गुणप्रतिषेधाद्यर्थात् यकः कित्त्वाञ्च सपरशब्दस्य धातुत्वात् ततो विहितस्य यकः आर्धधातुकत्वे सति 'अतो लोपः' (पा. सू. ६. ४. ४८) इति लोपः। 'सनाद्यन्ता धातवः' (पा. सू. ३. १. ३२) इति धातुसंज्ञायां तिप्। कर्तरि शप्। तस्मिन् पूर्वस्य 'अतो गुणे' (पा. सू. ६. १. ९७) इति परपूर्वत्वम्। यकः प्रत्ययस्वरेणोदात्तत्वम्। रुपा सह एकादेशस्य 'एकादेश उदात्तेनोदात्तः' (पा. सू. ८. २. ५) इत्युदात्तत्वम्। 'तिङ्ङतिङः' इति निघातो न भवति 'यद्वृत्तान्नित्वम्' (पा. सू. ८. १. ६६) इति प्रतिपेघात्।।

गार्हपत्याहवनीययोः परस्परसंसर्गे विहितस्य हविषो याज्यौ 'यो अग्नि देववीतये' इत्येषा। 'अथाग्नेय्य इष्टयः' इति खण्डे सूत्रितं–'यो अग्निं देवतीतये कुवित्सु नो गविष्टये' (आश्व. श्रौ. ३. १३) इति।।

---

१. ठ–दूतम्। २. श–सपर पूजायाम्। सपरशब्दात्। ३. च–फ–पुरोनुवाक्या।

NOTES

NOTES

**यो अग्निं देववीतये हविष्मा आविवासति। तस्मै पावक मृलय॥ ९॥**

यः। अग्निम्। देवऽवीतये। हविष्मान्। आऽविवासति। तस्मै। पावक। मृलय॥ ९॥

ᵛहविष्मान् हविर्युक्तः ᵛयः यजमानः ᵛदेववीतये देवानां हविर्भक्षणहेतुयागार्थम् ᵛअग्निम् ᵛआविवासति अग्नेः समीपे विशेषेणागत्य परिचर्यां करोति। हे ᵛपावक अग्ने ᵛतस्मै ᵛमृलय तं यजमानं सुखय॥ देववीतये। 'वी गतिप्रजनकान्त्यशनखादनेषु' इत्यस्मात् अशनार्थात् क्तिन्। देवानां वीतिर्यस्मिन् यागे स देववीतिः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। हविष्मान्। 'नब्विपयस्यानिसन्तस्य' (फि. सू. २६) इति पर्युदासात् हविःशब्दोऽन्तोदात्तः। मनुपः सर्वानुदात्तत्वात् स एव शिष्यते। आविवासति। 'वा गतिगन्धनयोः'। अस्मात् अन्तर्भावितण्यर्थात् आगमयितु-मिच्छतीत्यर्थे सन्। आह्वानेच्छा परिचर्यायां पर्यवस्यतीति विवासतिशब्दः परिचर्यार्थे निघण्टौ (नि. ३. ५. १०) पठितः। द्विर्भावः। अभ्यासस्य ह्रस्वः। 'सन्यतः' (पा. सू. ७. ४. ७९) इति इत्वम्। 'ञ्मिस्यादिर्नित्यम्' (पा. सू. ६. १. १९७) इत्याद्युदात्तत्वम्। 'तिङ्ङतिङ' इति निघातो न भवति 'यद्वृत्तान्नित्यम्' (पा. सू. ८. १. ६६) इति प्रतिपेधात्। 'तिङि चोदात्तवति' (पा. सू. ८. १. ७१) इति आङो निघातः। 'सह सुपा' (पा. सू. २. १. ४) इत्यत्र सहेति योगाविभागात् आङतिकासह समासे समासान्तोदात्तत्वे प्राप्ते 'परादिश्छन्दसि बहुलम्' (पा. सू. ६. २. १९९) इत्युत्तरपदाद्युदात्तश्वम्। तस्मै। 'क्रियाग्रहणं कर्तव्यम्' (पा. म. १. ४. ३२. १) इति संप्रदाने चतुर्थी॥

पवमानेष्टौ अग्नेः पावकस्यानुवाक्या 'स नः पावक दीदिवः' इति। 'पौर्णमासेनेष्टिपशुसोमा उपदिष्टाः' इति खण्डे सूत्रितं–'स नः पावक दीदिवोऽग्ने पावक रोचिपा' (आश्व. श्रौ. २. १) इति॥

**स नः पावक दीदिवोऽग्ने देवाँ इहा वह। उप यज्ञं हविश्च नः॥ १०॥**

सः। नः। पावक। दीदिऽवः। अग्ने। देवान्। इह। आ। वह। उप। यज्ञम्। हविः। च। नः॥ १०॥

हे ᵛदीदिवः दीप्यमान ᵛपावक शोधक ᵛअग्ने ᵛसः त्वं ᵛनः अस्मदर्थम् ᵛइह देवयजनदेशे ᵛदेवान् ᵛआ ᵛवह। ततः ᵛनः अस्मदीयं ᵛयज्ञं तत्रत्यं ᵛहविश्च ᵛउप देवसमीपे प्रापयेति शेपः॥ दीदिवः। 'दिवु क्रीडादौ'। 'छन्दसि लुङ्लङ्लिटः' (पा. सू. ३. ४. ६) इति वर्तमाने लिट्। क्वसुः। द्विर्भावो हलादिशेपः।

१. ठ-संप्रदानत्वात्। २. च-त-फ-श-इति। ३. ठ-वीरपुत्रभृत्ययुक्ताम्।

NOTES

'तुजादीमां दीर्घोऽभ्यासस्य' (पा. सू. ६. १. ७) इत्यभ्यासस्य दीर्धत्वम्। 'वस्वेकाजाद्धसाम्' (पा. सू. ७. २. ६७) इति नियमात् वसोः इट्प्रतिषेधः। 'लोपो व्योर्वलि' (पा. सू. ६. १. ६६) इति वकारलोपः। संबुद्धौ 'उगिदचां' (पा. सू. ७. १. ७०) इत्यौदिना नुम्। हल्ङ्याब्भ्यो दीर्घात् इत्यादिलोपः संयोगान्तलोपः। 'मतुवसोः' इति रुत्वम्। विसर्गः। अग्ने। पादादित्वात् न निघातः। देवाँ इहेत्यत्र 'दीर्घादटि समानपादे' (पा. सू. ८. ३. ९) इति रुत्वम्। 'आतोऽटि नित्यम्' इति आकारस्यानुनासिकः। 'भोभगोअघोअपूर्वस्य योऽशि' (पा. सू. ८. ३. १७) इति रोर्यकारः। 'लोपः शाकल्यस्य' (पा. सू. ८. ३. १९) इति यकारलोपः। तस्यासिद्धात्वात् आद्गुणो न भवति। इह। 'इदमो हः' (पा. सू. ५. ३. ११) इति सप्तम्यन्तात् हप्रत्ययः। 'इदम् इश्' (पा. सू. ५. ३. ३)। तद्धितान्तत्वात् प्रातिपदिकत्वे 'सुपो धातुप्रातिपदिकयोः' (पा. सू. २. ४. ७१) इति सप्तम्या लुक्। 'तद्धितश्चासर्वविभक्तिः' (पा. सू. १. १. ३८) इत्यव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' (पा. सू. २. ४. ८२) इत्युत्तरस्याः सप्तम्या लुक्। अकारः प्रत्ययस्वरेणोदात्तः।।

**स नः स्तवान आ भर गायत्रेण नवीयसा। रयिं वीरवतीमिषम्।। ११।।**

सः। नः। स्तवानः। आ। भर। गायत्रेण। नवीयसा। रयिम् वीरऽवतीम्। इषम्।। १।।

हे अग्ने नवीयसा नवतरेण पूर्वैरप्यसंपादितेन गायत्रेण गायत्रीच्छन्दस्केनानेन सूक्तेन स्तवानः स्तूयमानः सः त्वं नः अस्मदर्थं रयिं धनं वीरवतीं शूरपुत्रप्रभृत्यपत्वयुक्ताम् इषम् अन्नं च आ भर संपादय।। स्तवानः। 'ष्टुञ् स्तुतौ'। 'धात्वादेः षः सः'। 'स्वरितञितः' (पा. सू. १. ३. ७२) इत्यात्मनेपदम्। लटः शानच्। कर्तरि शप्। 'बहुलं छन्दसि' (पा. सू. २. ४. ७३) इति लुगभावः। गुणावादेशौ। 'आने मुक्' (पा. सू. ७. २. ८२) इति मुक् न भवति, 'अनित्यमागमशासनम्' (परिमा. ९६) इत्यागमानुशासनस्य अनित्यत्वात्। शपः पित्त्वादनुदात्तत्वम्। शानचश्चित्त्वादन्तोदात्तस्य अनुपदेशात् शपः परत्वात् लसार्वधातुकानुदात्तत्वम्। धातुस्वर एव शिष्यते। भर। 'हृग्रहोर्भ श्छन्दसि' (पा. सू. ८. २. ३२. १) इति भत्वम्। गायत्रेण गायत्र्याः संबन्धि गायत्रम्। 'तस्येदम्' (पा. सू. ४. ३. १२०) इति अण्प्रत्ययः। प्रत्ययस्वरः। नवीयसा। नवशब्दात् आतिशायनिकः ईयसुन्प्रत्ययः। निरवादाद्युदात्तः। वीरवतीम्। मतुब्ङीपोः पित्त्वादनुदात्तत्वम्। अकारः प्रातिपदिकस्वरेणोदात्तः।।

NOTES

**अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः। इमं स्तोमं जुषस्व नः॥ १२॥**

अग्ने। शुक्रेण। शोचिषा। विश्वाभिः। देवहूतिऽभिः। इमम्। स्तोमम्। जुषस्व। नः ॥ १२॥

हे 'अग्ने 'शुक्रेण 'शोचिषा त्वदीयश्वेतवर्णदीप्त्या 'विश्वाभिर्देवहूतिभिः त्वत्कृतसर्वदेवताह्वानसाधनस्तोत्रैश्च युक्तस्त्वं 'नः अस्मदीयम् 'इमं 'स्तोमं स्तोत्रविशेषं 'जुषस्व सेवस्व॥ विश्वशब्दो विशेः क्वनन्तो नित्वादाद्युदात्तः। देवहूतिभिः। देवशब्दः पचाद्यजन्तः। चित्त्वादन्तोदात्तः। देवानां हूतय आह्वानान्यासु स्तुतिष्विति देवहूतयः न्तुतयः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। स्तूयतेऽनेनेति स्तोमः। 'अर्तिस्तुसु' (उ. सू. १. १३७) इत्यादिना मन्। नित्त्वादाद्युदात्तः ॥२३॥

'सुससिद्धः' इत्यादिकं द्वादशर्चं द्वितीयमाप्रीसूक्तम्। तस्य काण्वो मेघातिथिर्ऋषिः। गायत्रं छन्दः। प्रयूचं प्रतीयमानाः समिद्धैतनूनपादादिका द्वादश देवताः। तथा च अनुक्रमणिकायाम् ऋक्संख्यामृपिं छन्दश्च अनुवृत्तिबलात् सिद्धवस्कृत्य देवता उदाहृताः–'सुसमिद्ध इतीधाः समिद्धो वाग्निस्तनूनपान्नराशंस इलो वर्हिर्देवीर्द्धार उपासमानक्ता दैव्यौ होतारौ प्रचेतसौ तिस्रो देव्यः सरस्वतीतभारत्यतष्टा वनस्पतिः स्वाहाकृतय इति प्रत्यृचं देवता एतदाप्रीसूक्तम्' इति। विनियोगस्तु–पशौ 'सुसमिद्धो न आ वा' इति काण्वमाप्रीसूक्तम्। 'एकादश प्रयाजाः' इति खण्डे सूचितं–'समिद्धो अद्येति सर्वेषां यथर्पि वा' (आश्व. श्रौ. ३. २) इति॥

**सुसमिद्धो न आ वह देवाँ अग्ने हविष्मते। होतः पावक यक्षि च॥ १॥**

सुऽसमिद्धः। नः। आ। वह। देवान्। अग्ने। हविष्मते। होतरिति। पावक। यक्षि। च॥ १॥

हे 'अग्ने सुसप्रसिद्धनामकत्वं 'नः अस्मदीयाय 'हविष्मते यजमानाय तदनुग्रहार्थं 'देवान् 'आ 'वह। हे 'पावक शोधक 'होतः होमनिष्पादकाग्ने 'यक्षि 'च यज च॥ सुसमिद्धः समः क्रियाविशेषणत्वेन रातिसंज्ञकत्वात् आदिसमापः। शोभनवाचिनः सुशब्दस्य तु 'विशेषणं विशेष्येण बहुलम्' (पा. सू. २. १. ५७) इति समिद्धपदेन कर्मधारयसमासः। सुशब्दः प्रातिपदिकस्वरेणोदात्तः। 'कर्मधारयेऽनिष्ठा' (पा. सू. ६. २. ४६) इति पूर्वपदप्रकृतिस्वरत्वम्। क्रियाविशेषणत्वे हि सुशब्दस्य गतित्वात् त्रादिसमासे 'गतिरनन्तरः' (पा सू. ६. २. ४९) इति समो यदु

---

१. च-छ-त-फ-श-अण्। २. च-छ-फ-श-सुसमिद्ध॰। ३. ठ-सुसमिद्धः सुससिद्ध॰।

NOTES

# विश्वामित्र-नदि-संवादः १.३

'प्र पर्वतानाम्' इति त्रयोदशर्चं चतुर्थं सूक्तम्। अत्रेयमनुक्रमणिका–'प्र पर्वतानां सप्तोना संवादो नदीभिर्विश्वामित्रस्योत्तितीर्षोस्तत्र नदीवाक्यं चतुर्थीपष्ठयष्टमीदशम्यः पष्ठीसप्तम्योस्त्विन्द्रस्तुतिरन्त्यानुष्टुप्' इति। अत्र चतुर्थीषष्ठयष्टमीदशमीनां नदीवाक्यत्वान्नद्य एव ऋषयः शिष्टानां विश्वामित्र-वाक्यवात्स एव ऋषिः। अन्त्यानुष्टुप् शिष्टास्त्रिष्टुभः। इन्द्रो देवता। यद्यपि पष्ठयां सप्तम्यां च विश्वामित्रो नद्यश्च स्तूयन्ते तथापीन्द्र एव देवता। सूक्तविनियोगो लैङ्गिकः।। पुरा किल विश्वामित्रः पैजवनस्य सुदासो राज्ञः पुरोहितो बभूव। सच पौरोहित्येन लब्धधनः सर्वं धनमादाय विपाट्छुतुद्योः संभेदमाययौ अनुययुरितरे। अथोत्तितीर्षुर्विश्वामित्रः अगाधजले ते नद्यौ दृष्ट्वा उत्तरणार्थम् आद्याभिः तिसृभिस्तुष्टाव।।

**प्र पर्वतानामुशती उपस्थादश्वेइव विषिते हासमाने।**
**गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते।। १।।**

प्र। पर्वतानाम्। उशती इति। उपऽस्थात्।

अश्वे इवेत्यश्वेऽइव। विसिते इति विऽसिते। हासमाने इति।

ᵛपर्वतानां गिरीणां शैलानाम् ᵛउपस्थात् उत्सङ्गान्निर्गत्य ᵛउशती समुद्रगमनं कामयमाने। गमने दृष्टान्तः। ᵛअश्वेइव। यथा ᵛविपिते मन्दुरातो विमुक्ते ᵛहासमाने अन्योन्यजवेन स्पर्धमाने। यद्वा हृष्यन्त्यावश्वे इव वडवेइव त्वरया गच्छन्त्यौ परस्परं हृष्यन्त्यौ। तथा ᵛगावेव ᵛशुभ्रे। यथा द्वौ गावौ शोभमानौ वर्तेते तद्वच्छुभ्रे शोभमाने। किंच ᵛमातरा। यथा मातरौ धेनू ᵛरिहाणे। अन्तर्णीतसन्नर्थो लिहिः। वत्सं जिह्वया लेढुमिच्छन्त्यौ शीघ्रं गच्छतस्तद्वत् समुद्रं गन्तुं जवात् गच्छन्त्यौ ᵛपयसा संयुक्ते ᵛविपाट्। कूलविपाटनात् विपाशनाद्वा विमोचनाद्वा विपाट्। ᵛशुतुद्री। शुक्षिप्रं तु तुन्ना तुन्नेव द्रवति गच्छतीति शुतुद्री। एतन्नामके नद्यौ ᵛप्र ᵛजवेते समुद्रं प्रति शीघ्रं गच्छतः। अत्र निरुक्तं–'पर्वतानाभुपस्थादुपस्थानादुशत्यौ कामयमाने अश्वे इव विमुक्ते इति वा विपण्णे इति वा हासमाने हासतिः स्पर्धायां हर्षमाणे वा गावाविव शुभ्रे शोभने मातरौ संरिहाणे विपाट्छुतुद्रयौ पयसा प्रजवेते' (निरु. ९. ३९) इति।। उशती। 'वश कान्तौ'। अस्य शतुर्ङित्त्वात् 'ग्रहिज्यावयि' इत्यादिना संप्रसारणम्। विषिते। 'पिञ् बन्धने' इत्यस्य कर्मणि निष्ठा। संहितायां 'परिनिविभ्यः सेवसितसयसिवुसह' इत्यादिना पत्वम्। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरः। हासमाने। हासतिः स्पर्धाकर्मा हसे हसने

NOTES

वा। शानच्। तस्य लसार्वधातुकस्वरे कृते धातुस्वरः। रिहाणे। 'लिह आस्वादने'। स्वरितेत्त्वादुभयपदी। शानच्। अदादित्वाच्छपो लुक्। लकारस्य रेफश्छान्दसः। रेफमवलम्ब्य णत्वम्। चित्त्वादन्तोदात्तः। विपाट्। 'पट गतौ' 'पश बाधनस्पर्शनयोः' इति वा ण्यन्तावेतौ विपूर्वौ। शकारस्य व्रश्चादिना पत्वम्। शुतुद्री। छान्दसी रूपसिद्धिः। जवेते। 'जुङ् गतौ' भौवादिः। ङित्त्वादात्मनेपदम्।' 'आतो इतः इति इयादेशः। निघातः।।

**इन्द्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः।**
**समाराणे ऊर्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे।। २।।**

इन्द्रेषिते इतीन्द्रऽइषिते। प्रऽसवम्। भिक्षमाणे इति। अच्छ। समुद्रम्। रथ्याऽइव। याथः। समाराणे इति सम्ऽआराणे। ऊर्मिऽभिः। पिन्वमाने इति।

अन्या वाम्। अन्याम्। अपि। एति। शुभ्रे इति ।।२।।

हे नद्यौ ᵛइन्द्रेपिते इन्द्रेण प्रेषिते ᵛप्रसवं तम्येन्द्रस्यानुज्ञां ᵛभिक्षमाणे प्रार्थयमाने युवां ᵛसमुद्रम् ᵛअच्छ आभिमुख्येन ᵛयाथः गच्छथः। तत्र दृष्टान्तः। ᵛरथ्येव इति। यथा रथिनौ लक्ष्यं देशमभिगच्छतस्तद्वत्। किं कुर्वत्यौ। ᵛसमाराणे परस्परं संगच्छन्त्यौ ᵛऊर्मिभिः तरङ्गैः ᵛपिन्वमाने परिसरप्रदेशं संतर्पयन्त्यौ ᵛशुभ्रे शोभमाने। युवां समुद्रं गच्छथ इति पूर्वेणान्वयः। तथा ᵛवां युवयोर्मर्ध्य ᵛअन्या एका ᵛअन्याम् अपरां नदीम् ᵛअप्येति अपिगच्छति। परस्परमैक्यमापद्यत?

'तृतीया कर्मणि' इति पूर्वपदस्वरः। प्रसवम्। 'पू प्रेरणे' इत्यस्य अप्। याथादिस्वरः। भिक्षमाणे। 'भिक्ष याच्ञायाम्'। आत्मनेपदी। शानचो लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः। रथ्येव। रथस्येमौ। तस्येदम् इत्यर्थे 'रथाद्यत्' इति यत्प्रत्ययः। तित्स्वरितः। इवेन विभक्त्यलोपः इत्यादि। याथः। यातेर्लटि रूपम्। समाराणे। 'ऋ गतौ' इत्यस्य लिट्। संपूर्वस्यार्तेः 'समो गमि' इत्यादिना आत्मनेपदत्वात् तस्य कानजादेशः। 'ऋच्छत्यताम्' इति गुणः। पिन्वमाने। 'पिवि सेचने'। भूवादिः। लसार्वधातुकस्वरेण शानचोऽनुदात्तत्वे धातुस्वरः।।

**अच्छा सिन्धुं मातृतमामयासं विपाशमुर्वी सुभगामगन्म।**
**वत्समिव मातरा संरिहाणे समानं योनिमनु संचरन्ती।। ३।।**

अच्छ। सिन्धुम्। मातृऽतमाम्। अयासम्। विऽपाशम्। उर्वीम्। सुऽभगाम्। अगन्म। वत्सम्ऽइव। मातरा। संरिहाणे इति सम्ऽरिहाणे।

समानम्। योनिम्। अनु। संचरन्ती इति सम्ऽचरन्ती।। ३।।

हे नद्यौ मातृतमाम् अतिशयेन मातरं सिन्धुं स्रवन्तीं शुतुद्रीं त्वाम् अच्छ आभिमुख्येन अयासं विश्वामित्रोऽहं प्राप्तोऽभूवम्। उर्वो महतीं सुभगां सौभाग्यवतीं विपाशं त्वाम् अगन्म वयं प्राप्ताः स्मः। किं कुर्वत्यौ। मातरा मातरौ द्वे धेनू वत्समिव संरिहाणे। अन्तर्णीतसन्नर्थो लिहिः। जिह्वया लेढुमिच्छन्त्यौ यथा वत्समनुगच्छतस्तद्वत् समानम् एकं योनिं स्थानं समुद्रम् अनु अभिलक्ष्य संचरन्ती सम्यक् चरन्त्यौ। युवामयासिषमिति पूर्वेणान्वयः।। अयासम्। 'या प्रापणे' इत्यस्य रूपम्। इडभावश्छान्दसः। अगन्म। गमेर्लङि 'बहुलं छन्दसि' इति शपो लुक्। 'म्वोश्च' इति मकारस्य नकारः। निघातः। संचरन्ती। चरतिर्गत्यर्थः। तृतीयायुक्तत्वाभावात आत्मनेपदाभावः। शतुर्लसार्वधातुक-स्वरेणानुदात्तत्वे कृते धातुस्वरः ।।

**एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरन्तीः।**
**न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति।। ४।।**

एना। वयम्। पयसा। पिन्वमानाः। अनु। योनिम्। देवऽकृतम्। चरन्तीः।

न। वर्तवे। प्रऽसवः। सर्गऽतक्तः। किम्ऽयुः। विप्रः। नद्यः। जोहवीति।। ४।।

द्वयोर्बहुवचनं पूजार्थम्। तासामस्माकं सर्गतक्तः सर्गे गमने प्रवृत्तः प्रसवः उद्योगः न वर्तवे निवर्तनाय न भवति। किंयुः किमिच्छन् असौ विप्रः ब्राह्मणः नद्यः नदीः अस्मान् जोहवीति भृशमाह्वयति।। एना। एतच्छब्दस्य तृतीयाया एनादेशः। 'सुपां सुलुक्°' इति तृतीयाया आजादेशः। 'ऊडिदम्°' इति विभक्तेरुदात्तत्वम्। पिन्वमानाः। 'पिवि सेचने'। देवकृतम्। 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरः। वर्तवे। 'वृतु वर्तने'। तुमर्थे तवेन्प्रत्ययः। नित्स्वरः। सर्गतक्तः। 'क्ते च' इति पूर्वपदप्रकृतिस्वरः। किंयुः। किमिच्छन्। 'क्यचि मान्ताव्ययप्रतिषेधः' (पा. सू. ३. १. ८. १) इति छान्दसत्वादत्र प्रतिषेधो न भवतीति क्यच्। 'क्याच्छन्दसि' इत्युप्रत्ययः। प्रत्ययस्वरः। नद्यः छान्दसो यणादेशः। जोहवीति। ह्वेञः यङ्लुकि 'अभ्यस्तस्य च' इति संप्रसारणे कृते 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणः। 'यङो वा' इति इडागमः। गुणः। निघातः।।

**रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः।**
**प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः।। ५।।**

रमध्वम्। मे। वचसे। सोम्याय। ऋतऽवरीः। उप। मुहूर्तम्। एवैः।

प्र। सिन्धुम्। अच्छ। बृहती। मनीषा। अवस्युः। अह्वे। कुशिकस्य। सूनुः।। ५।।

NOTES

NOTES

विश्वामित्रो नदीः प्रति ब्रूते। vऋतावरीः। ऋतमुदकम्। तद्वत्यो हे नद्यो यूयं vमे विश्वामित्रस्य मम vसोम्याय। उत्तीर्याहं सोमं संपादयामीत्येवं सोमसंपादिने vवचसे तदर्थम् vएवैः। पञ्चम्यर्थ तृतीया। शीघ्रगमनेभ्यः vमुहूर्तं मुहूर्तमात्रम् vउप vरमध्वम्। उपपूर्वो रमिरुपसंहारे वर्तते। क्षणमात्रं शीघ्रगमनादुपरता भवत। सामान्येन° नदीषूच्यमानासु समीहितं प्रयोजनमकुर्वतीषु पुरोवर्तिनीं शुतुद्रीं प्रति ब्रते। vकुशिकस्य राजर्षेः vसूनुः विश्वामित्रोऽहं vबृहती महत्या vमनीषा मनीषया स्तुत्या vअवस्युः आत्मनो रक्षणमिच्छन् सन् vसिन्धुं शुतुद्रींत्वाम् vअच्छ आभिमुख्येन vप्र vअह्वे प्रकर्षेणाह्वयामि। अत्र निरुक्तम्–'उपरमध्वं मे वचसे सोम्याय सोमसंपादिन ऋतावरीर्ऋतवस्य ऋतमित्युदकनाम प्रत्यृतं भवति मुहूर्तमेवैरयनैरवनैर्वा। प्राभिह्वयामि सिन्धुं बृहत्या महत्या मनीषया मनस ईषया स्तुत्या प्रज्ञया वावनाय कुशिकस्य सूनुः। कुशिको राजा बभूव' (निरु. २. २५) इति।। रमध्वम्। 'रमु उपरमे'। उपपूर्वाद्रमतेः 'विभाषाकर्मकात्' (पा. सू. १. ३. ८५) इत्यात्मनेपदम्। ऋतावरीः। ऋतशब्दान्मत्वर्थे 'छन्दसीवनिपौ' इति वनिप्। 'वनोर च' इति ङीप् रेफश्चन्तादेशः। 'वा छन्दसि' इति सवर्णदीर्घः। आमन्त्रितस्य पादादित्वात् षाष्ठिकमाधुदात्तत्वम्। एवैः। 'इण् गतौ'। 'इण्शीङ्भ्यां वन्'। आर्धधातुकलक्षणो गुणः। नित्स्वरः। बृहती ????

**इन्द्रो॑ अ॒स्माँ अ॑रद॒द्वज्र॑बाहु॒रपा॑हन्वृ॒त्रं प॑रि॒धिं न॒दीना॑म्।**
**दे॒वो॑ऽनयत्सवि॒ता सु॑पा॒णिस्तस्य॑ व॒यं प्र॑स॒वे या॑म उ॒र्वीः॥ ६॥**

इन्द्रः॑। अ॒स्मान्। अ॒रद॒त्। वज्र॑ऽबाहुः। अप॑। अ॒ह॒न्। वृ॒त्रम्। प॒रि॒ऽधिम्। न॒दीना॑म्। दे॒वः। अ॒न॒य॒त्। स॒वि॒ता। सु॒ऽपा॒णिः। तस्य॑। व॒यम्। प्र॒ऽस॒वे। या॒मः। उ॒र्वीः॥ ६॥

नद्यः प्रत्यूचुः। हे विश्वामित्र vवज्रबाहुः। वज्रयुक्तो बाहुर्यस्यासौ वज्रबाहुः। तादृशो बलवान् vइन्द्रः नदीः vअस्मान् vअरदत्। रदतिः खनतिकर्मा। अखनत्। कथमखनत्। उच्यते। vनदीनां शब्दकारिणीनामपां vपरिधिं परितो निहितमुदकमन्तः कृत्वा परितो वर्तमानमित्यर्थः। तादृशं vवृत्रम्। वृणोत्याकाशमिति वृत्रो मेघः। ते मेघम् vअपाहन् जघान। तस्मिन् हते आपः पतिताः। ताभिर्गच्छन्तीभिर्वयं ग्वाताः। एवं मेघहननद्वारेणाग्वनत्। न केवलमखनत् किं तर्हि vसविता सर्वस्य जगतः प्रेरकः vसुपाणिः शोभनहस्तः उत्पत्तिस्थितिकर्तृत्वात्तादृशः vदेवः द्योतमानः इन्द्रः अस्मान् vअनयत्। मेघभेदनं कृत्वोदकप्रेरणेन समुद्रमपूरयत्। vतस्य तादृशसामर्थ्योपेतस्य इन्द्रस्य vप्रमवे अभ्यनुज्ञायां वर्तमानाः vउर्वीः उदकैः प्रभूताः vवयं vयामः गच्छामः। न तत्र वचनादुपरमामहे। उक्तार्थं यास्को

NOTES

ब्रवीति—'इन्द्रो अस्मानरदद्वज्रबाहु रदतिः खनतिकर्मापाहवृत्रं परिधिं नदीनामिति व्याख्यातम्। देवोऽनयत्सविता सुपाणिः कल्याणपाणिः। पाणिः पणायतेः पूजाकर्मणः प्रगृह्य पाणी देवान् पूजयन्ति। तस्य प्रसवे याम उर्वोरुर्व्यः' (निरु. २. २६) इति।। अरदत्। रदतेर्लङि रूपम्। वज्रबाहुः। बहुव्रीहौ पूर्वपदस्वरः। अहन्। हन्तेर्लङि रूपम्। निघातः। परिधिम्। 'डुधाञ् धारणपोषणयोः' इत्यस्मात् कर्मण्युपसर्गे 'घोः किः' इति किप्रत्ययः। आतो लोपः। कृदुत्तरपदस्वरः। अनयत्। नयतेर्लङि रूपम्। सुपाणिः। 'पण व्यवहारे स्तुतौ च'। 'अशिपणाय्यो रुडायलुकौ च' (उ. सू. ४. ५७२) इतीण्। आयलुक्। बहुव्रीहौ 'नञ्सुभ्याम्' इति स्वरः। प्रसवे। 'पू प्रेरणे'। 'ऋदोरप्' इति भावेऽप्प्रत्ययः। 'थाथघञ्क्ता°' 'इत्युत्तरपदान्तोदात्तत्वम्'। यामः। 'या प्रापणे' इत्यस्य लटि रूपम्। निघातः। उर्वीः। उरुशब्दात 'वोतो गुणवचनात्' इति ङीप्। 'वा छन्दसि' इति सवर्णदीर्घः। प्रत्ययस्वरः ।।

**प्रवाच्यं॑ शश्व॒धा वी॒र्यं१॒ तदिन्द्र॑स्य॒ कर्म॒ यदहिं॑ विवृ॒श्चत्।**
**वि वज्रे॑ण परि॒षदो॑ जघा॒नाय॒न्नापोऽय॑नमि॒च्छमा॑नाः॥ ७॥**

प्र॒ऽवाच्य॑म्। श॒श्व॒धा। वी॒र्य॑म्। तत्। इन्द्र॑स्य। कर्म॑। यत्। अहि॑म्। वि॒ऽवृ॒श्चत्।

वि। वज्रे॑ण। प॒रि॒ऽसदः॑। ज॒घा॒न॒। आय॑न्। आपः॑। अय॑नम्। इ॒च्छमा॑नाः॥ ७॥

ᵛइच्छप्ताना: इच्छन्त्यः ᵛआपः ᵛआयन् यान्ति।। प्रवाच्यम्। 'वच परिभाषणे' इत्यस्मात् 'ऋहलोर्ण्यत्' इति ण्यत्। णित्त्वादुपधावृद्धिः। 'वचोऽशब्दसंज्ञायाम्' (पा. सू. ७. ३. ६७) इति कुत्वाभावः। व्यत्ययेनाद्युदात्तत्वम्। यद्वा वाचयतेः 'अचो यत्'। 'यतोऽनावः' इति स्वरः। शश्वधा। शश्वच्छब्दात् स्वार्थे धाप्रत्ययस्तकारलोपश्च द्रष्टव्यः। विवृश्चत्। 'ओव्रश्चूछेदने'। तुदादिः। लङि 'ग्रहिज्यावयि°' इत्यादिना संप्रसारणम्। 'सह सुपा' इत्यत्र सहेति योगविभागात् समासः। समासस्वरः। परिषदः। क्विप्। संहितायां 'सदिरप्रतेः' इति षत्वम्। जघान। हन्तेर्लिटि णलि रूपम्। निघातः। आयन्। 'अय गतौ' इत्यस्य लङि रूपम्। पादादित्वादनिघातः। इच्छमानाः। 'इषु इच्छायाम्' इत्यस्मात् व्यत्ययेन शानच्। तस्य लसार्वधातुकस्वरे कृते प्रत्ययस्वरः।।

**ए॒तद्वचो॑ जरित॒र्मापि॑ मृष्ठा॒ आ यत्ते॒ घोषा॒नुत्त॑रा यु॒गानि॑।**
**उ॒क्थेषु॑ कारो॒ प्रति॑ नो जुषस्व॒ मा नो॒ नि कः॑ पुरुष॒त्रा नम॑स्ते॥ ८॥**

ए॒तत्। वचः॑। ज॒रि॒तः॒। मा। अपि॑। मृ॒ष्ठाः॒। आ। यत्। ते॒। घोषा॑न्। उत्ऽत॑रा। यु॒गानि॑। उ॒क्थेषु॑। का॒रो॒ इति॑। प्रति॑। न॒ः। जु॒ष॒स्व॒।

NOTES

मा। नः। नि। करिर्ति कः। पुरुषऽत्रा। नमः। ते॥ ८॥

नद्यः प्रसङ्गादिन्द्रस्तोत्रं कृत्वा विश्वामित्रं प्रत्यूचुः। ᵛजरितः स्तोतर्हे विश्वामित्र ᵛते त्वदीयं ᵛयत् संवादात्मकं ᵛवचः त्वं ᵛनः अभीत्या ᵛघोपान् उद्धोपयन् वर्तसे तद्वचः ᵛमापि ᵛमृष्ठाः मा विस्मार्षोः। किं कारणम्। ᵛउत्तरा ᵛयुगानि उत्तरेषु याज्ञिकेषु युगेषु अहःसु ᵛउक्थेषु ᵛकारो शस्त्राणां कर्तस्त्वं ᵛनः अस्मान् ᵛप्रति ᵛजुषस्व संवादात्मकेन तेन वाक्येन प्रतिसेवत्व। इदानी ᵛनः अस्मान् ᵛपुरुषत्रा पुरुषेषु ᵛमा ᵛनि ᵛकः। उक्तिप्रत्युक्तिरूपसंवादवाक्याप्यापनेन निग्गं पुंवत् प्रागल्भाः मा कार्षीः। ᵛते तुभ्यं ᵛनमः॥ मृष्ठाः। 'मृजूष् शुद्धौ' इत्यस्य लङि व्यत्ययेन आत्मनेपदम्। अदादित्वाच्छपो लुक्। व्रश्चादिना पत्वम्। निघातः। घोषान्। 'घुषिर् संशब्दने' इत्यस्य शतरि सर्वविधीनां छन्दसि विकल्पितत्वात् 'अतो गुणे' इति पररूपत्वाभावः। सवर्ण दीर्घः। शतुर्लसार्वधातुकस्वरे कृते धातुस्वरः। युगानि। 'युजिर् योगे'। उञ्छादिषु घञन्तत्वेन निपातनादगुणत्वम्। विशिष्टविषयं च निपातनमिष्यते। 'कालविशेषे रथाद्युपकरणे च' इति तत्र पाठादेवान्तोदात्तत्वम्। 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया। कारो। करोतेः 'कृवापाजिमि' इत्यादिना उण्प्रत्ययः। आमन्त्रितत्वान्निघातः। कः। करोतेर्लुङिच्लेः 'मन्त्रे घस°' इत्यादिना लुक्। इल्ङयादिना सिचो लोपः। 'न माङ्योगे' इत्यडभावः। पुरुषत्रा। 'देव ????'

**ओ षु स्वसारः कारवें शृणोत ययौ वो दूरादनसा रथेंन।**
**नि षू नंमध्वं भवंता सुपारा अंधोअक्षाः सिन्धवः स्त्रोत्याभिः॥ ९॥**

ओ इति। सु। स्वसारः। कारवें। शृणोत। ययौ। वः। दूरात्। अनसा। रथेंन।

नि। सु। नमध्वम्। भवंत। सुऽपाराः। अधःऽअक्षाः। सिन्धवः। स्त्रोत्याभिः॥ ९॥

विश्वामित्रो नदीः प्रत्युवाच। ᵛस्वसारः भगिन्यः ᵛसिन्धवः हे नद्यः ᵛकारवे स्तोत्रं कुर्वाणस्य मम वचनं ᵛसु सुष्ठु ᵛओ ᵛशृणोत शृणुतैव। ᵛअनसा शकटेन ᵛरथेन च सह ᵛदूरात् विप्रकृष्टाद्दशात् ᵛवः युष्मान् ᵛययौ प्राप्तोऽस्मि। यूयं ᵛसु सुष्ठु ᵛनि ᵛनमध्वम् आत्मना स्वयं प्रह्वाः ᵛभवत। तथा ᵛसुपाराः। रथादीनां तीरात् सुखेनावरोहणारोहणे यथा स्यातां तथा शोभनरोधसश्च भवत। किंच यूयं ᵛस्त्रोत्याभिः स्त्रवणशीलाभिरद्भिः ᵛअधोअक्षाः रथाङ्गस्याक्षस्याधस्ताद्भवत। यदापोऽक्षस्याधस्ताद्भवन्ति तदा रथादीनि नेतुं शक्यन्ते। तस्मात् तत्परिमाणोदकाः भवतेति अर्थाभिप्रायः॥ ओ इति प्रगृह्यसंज्ञा। शृणोत। 'श्रु श्रवणे' इत्यस्य लोटि तप्रत्ययस्य 'तप्तनप्तनथनाश्च' इति तबादेशः। पित्त्वाद्गुणः। निघातः। ययौ। 'या प्रापणे' इत्यस्य भूतमात्रे लिटयुत्तमे णलि 'आत औ णलः' इत्यौकारः।

NOTES

एकादेशस्वरः। वः। युष्मच्छब्दस्य द्वितीयायाः 'बहुवचनस्य वस्नसौ' इति वसादेशः। षू। 'निपातस्य°' इति संहितायां दीर्घः। नमध्वम्। 'णमु प्रह्वत्वे शब्दे च' इत्यस्य कर्मकर्तरि 'न दुहस्नुनमां यक्चिणौ' इति प्रतिषेधात् यगभावः। अधोअक्षाः। अधरशब्दस्य 'पूर्वाधरावराणामसि पुरधवश्चैषाम्' इत्यसिप्रत्ययोऽधा-देशश्च। अक्षशब्दः 'अशू व्याप्तौ' इत्यस्मात् 'अशेर्देवने' (उ. सू. ३. ३४५) इति सप्रत्ययान्तः। कृदुत्तरपदप्रकृतिस्वरः। सिन्धवः। आमन्त्रितत्वान्निघातः। स्रोत्याभिः। स्रोतःशब्दात् 'स्रोतसो विभाषा ड्यड्ड्यौ' (पा. सू. ४. ४. ११३) इति ड्यप्रत्ययः। डित्त्वात् टिलोपः। प्रत्ययस्वरः।।

**आ तें कारो शृणवामा वचोंसि ययाथ दूरादनसा रथेंन।**
**नि तें नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै तें।। १०।।**

आ। ते। कारो इति। शृणवाम। वचोंसि। ययाथ। दूरात्। अनसा। रथेंन।

नि। ते। नंसै। पीप्यानाऽइव। योषा। मर्यायऽइव। कन्या। शश्वचै। त इति ते।। १०।।

नद्यः पूर्व विश्वामित्रं प्रत्याख्यायानयर्चा तस्य वाक्यमाशुश्रुवुः। ᵛकारो स्तोत्रं कुर्वाण ???

तत्र दृष्टान्तः। ᵛपीप्यानेव ᵛयोषा। पीप्याना पुत्रं स्तनं पाययन्ती योषा माता यथा प्रह्वीभवति। दृष्टान्तान्तरम्। यथा ᵛकन्या युवतिः ᵛमर्यायेव मनुष्याय पित्रे भ्रात्रे वा ᵛशश्वचै परिप्वजनाय नम्रीभवति तद्वत् ᵛते त्वदर्थं प्रह्वह्वीभवामः। ते इति पुनरुक्तिरादरार्थम्। एतामृचं यास्क एवं व्याचष्टे– 'आशृणवाम ते कारो वचनानि याहि दूरादनसा च रथेन च निनमाम ते पाययमानेव योषा पुत्रं मर्यायेव कन्या परिप्वजनाय निनमा इति वा' (निरु. २. २७) इति।। कारो। 'संबुद्धौ शाकल्यस्येतौ°' (पा. सू. १. १. १६) इति प्रगृह्यसंज्ञा। शृणवाम। 'श्रु श्रवणे' इत्यस्य लोटि 'आडुत्तमस्य पिश्च' इत्याडागमः। पित्त्वात् गुणः। निघातः। ययाथ। 'या प्रापणे' इत्यस्य भूतमात्रे लिटि थलि 'एकाच उपदेशेऽनुदात्तात्' इतीट्प्रतिषेधः। लित्स्वरः। अनसा। सहार्थे तृतीया। नंसै। 'णमु प्रह्वत्वे' इत्यस्य लेटयुत्तमे लेटि सिब्बहुलमिति सिप्। 'वैतोऽन्यत्र' इत्यैकारादेशः। निघातः। पीप्यानेव। 'पीङ् पाने' इत्यस्यान्तर्भावितण्यर्थस्य लिटि कानचि रूपम्। चित्स्वरः। योषा। 'यु मिश्रणे'। 'वृतॄवदिहनि°' (उ. सू. ३. ३४२) इत्यादिना सप्रत्ययः। यौतीति योषा। वृषादित्वादाद्युदात्तः। शश्वचै। 'प्वश्च परिष्वङ्गे' इत्यम्मात् संपदादिलक्षणो भावे क्विप्। पृषोदरादित्वादिष्टरूपसिद्धि-रन्तोदात्तश्च।। १३।।

NOTES

**यदङ्ग त्वा भरताः संतरेयुर्गव्यन्ग्राम इषित इन्द्रजूतः।**
**अर्षादह प्रसवः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानाम्॥ ११॥**

यत्। अङ्ग। त्वा। भरताः। सम्ऽतरेयुः। गव्यन्। ग्रामः। इषितः। इन्द्रऽजूतः।

अर्षात्। अह। प्रऽसवः। सर्गऽतक्तः। आ। वः। वृणे। सुऽमतिम्। यज्ञियानाम्॥ ११॥

विश्वामित्रो नदीः प्रत्युवाच। ᵛअङ्ग इत्यामन्त्रणे। हे नद्यः ᵛयत् यस्मात् युष्माभिरुत्तितीर्षोः ममोत्तरणमभ्यनुज्ञातं तस्मात् ᵛभरताः भरतकुलजा मदीयाः सर्वे ᵛत्वा परस्परमेकतामापन्नां नदीं त्वां ᵛसंतरेयुः सम्यगुत्तीर्णा भवेयुः। तदेव विशिनष्टि। ᵛगव्यन् गा उदकानि तरीतुमिच्छन् ᵛइषितः त्वयाभ्यनुज्ञातः ᵛइन्द्रजूतः युष्माकं प्रवर्तकेनेन्द्रेण च प्रेरितः ᵛग्रामः भरतानां संघः ᵛअर्षात् संतरेत। यतः ᵛसर्गतक्तः गमनाय प्रवृत्तः ᵛप्रसवः तेषामुद्योगः ᵛअह पूर्वं युष्माभिरनुज्ञातः। अहं तु ᵛयज्ञियानां यज्ञार्हाणां ᵛवः युष्माकं ᵛसुमतिं शोभनां स्तुतिम् ᵛआ ᵛवृणे सर्वतः संभजे।। भरताः। भरतशब्दादुत्सादित्वादञ्। तस्य 'यञञोश्च' इति लुक्। अतचूप्रत्ययस्वरः। संतरेयुः। तरतेर्लिङि जुसि रूपम्। झेर्लसार्वधातुकस्वरे धातुस्वरः। 'तिङि चोदात्तवति' इति गतेर्निघातः। गव्यन्। गा आत्मन इच्छन्। सुपः क्यच्। एकादेशम्वरः। ग्रामः। 'ग्रसतेरा च' (उ. सू. १. १४०) इति मन्प्रत्यय आकारादेशश्च। नित्स्वरः। इन्द्रजूतः। जू इति सौत्रो धातुर्गत्यर्थः। 'श्रयुकः किति' इति निष्टायामिट्प्रतिषेधः। 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरः। अर्षात्। 'ऋ गतौ' इत्यस्य लेटि तिपि 'सिब्बह्लम्°' इति सिप्। लेट आडागमः। 'एकाचः°' इतीट्प्रतिषेधः। गुणः।

**अतारिषुर्भरता गव्यवः सभभक्त विप्रः सुमतिं नदीनाम्।**
**प्र पिन्वध्वमिषयन्तीः सुराधा आ वृक्षणाः पृणध्वं यात शीभम्॥ १२॥**

अतारिषुः। भरताः। गव्यवः। सम्। अभक्त। विप्रः। सुऽमतिम्। नदीनाम्।

प्र। पिन्वध्वम्। इषयन्तीः। सुऽराधाः। आ। वक्षणाः। पृणध्वम्। यात। शीभम्॥ १२॥

ᵛगव्यवः गा आत्मन इच्छन्तः ᵛभरताः भरतकुलजाः सर्वे ᵛअतारिषुः तां नदीं समतरन्। ᵛविप्रः मेधावी विश्वामित्रः ᵛनदीनां ᵛसुमतिं शोभनां स्तुतिं ᵛसमभक्त समभजत। यूयं तु यथापूर्वम् ᵛइषयन्तीः कुल्यादिद्वारा अन्नं कुर्वाणा अत एव ᵛसुराधाः शोभनधनोपेता यूयं ᵛवक्षणाः कृत्रिमसरितः कुल्याः ᵛप्र ᵛपिन्वध्वं प्रकर्षेण तर्पयत। ᵛआ ᵛपृणध्वं ताः सर्वतः पूरयत च। ᵛशीभं शीघ्रं

ᵛयात गच्छत च।। अतारिषुः। 'तॄ प्लवनतरणयोः' इत्यस्य लुङि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः। अडागमस्वरः। गव्यवः। सुपः क्यच्। 'क्याच्छन्दसि' इत्युप्रत्ययः। तस्य स्वरः। अभक्त। 'भज सेवायाम्' इत्यस्य लुङि सिचः 'झलो झलि' इति लोपः। पादादित्वादनिघातः। पिन्वध्वम्। 'पिवि सेचने' इत्यस्य लोटि रूपम्। निघातः। इषयन्तीः। इषं कुर्वत्यः। 'तत्करोति°' इति णिच्। 'णाविष्ठवत्प्रातिपदिकस्य' इति इष्टवद्भावात् 'टेः' इति टिलोपः। 'वा छन्दसि' इति सवर्णदीर्घः। प्रत्ययस्वरः। पृणध्वम्। 'पृण प्रीणने'। लोटि रूपम्। व्यत्ययेनात्मनेपदम्। वाक्यभेदादनिघातः। यात। 'या प्रापणे' इत्यस्य लोटि रूपम्। अत्रापि न निघातः। शीभम्। 'शीभृ कत्थने'। श्लाध्यतेऽनेन तद्वानिति करणे घञ्। ञित्स्वरः।।

**उद्व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत।**
**मादुष्कृतौ व्येनसाघ्न्यौ शूनमारताम्।। १३।।**

उत्। वः। ऊर्मिः। शम्याः। हन्तु। आपः। योक्त्राणि। मुञ्चत।

मा। अदुःऽकृतौ। विऽएनसा। अघ्न्यौ। शूनम्। आ। अरताम्।। १३।।

पूर्वमुवितीर्षुर्विश्वामित्रो नदीरुक्त्वा अधुना उत्तितीर्षुः पुनराह। हे नद्यः ᵛवः युष्माकम् ᵛऊर्मिः। तरङ्गः ᵛशम्याः युग्यकण्ठपार्श्वादिसंलग्ना रज्जवः ᵛउत् ऊर्ध्वं यथा भवन्ति तथा ᵛहन्तु गच्छतु। स तरङ्गो रज्जूनामधो गच्छत्वित्यभिप्रायः। तथा हे ᵛआपः यूयं ᵛयोक्त्राणि ता रज्जूः ᵛमूञ्चत। यथा न स्पृशन्ति तथा यान्त्वित्यभिप्रायः। ᵛव्येनसा विगतपापे अत एव ᵛअदुष्कृतौ कल्याणकर्मकारिण्यौ ??

गत्योः' इत्यस्य लोटि रूपम्। निघातः। योक्त्राणि। 'युजिर् योगे'। करणे 'दान्नीशसयुयुज°' इत्यादिना ष्ट्रन्प्रत्ययः। नित्स्वरः। मुञ्चत। 'मुल्लचमोक्षणे'। निघातः। अदुष्कृतौ। 'इसुसोः सामर्थ्ये' इति विसर्जनीयस्य पत्वम्। व्येनसा। बहुव्रीहौ पूर्वपदस्वरः। सुपो डादेशः। अघ्न्यौ। 'हन हिंसागत्योः' इत्यस्य नञ्पूर्वस्य 'अघ्न्यादयश्च' इति निपातनात् यक्। कित्त्वादुपधालोपः। 'हो हन्तेः°' इति घत्वम्। सर्वविधीनां छन्दसि विकल्पितत्वादत्र औङः शीभावाभावः। एकादेशस्वरः। शूनम्। श्वयतेः 'नपुंसके भावे क्तः' इति क्तः। यजादित्वात् संप्रसारणम्। 'हलः' इति दीर्घत्वम्। 'ओदितश्च' इति निष्ठानत्वम्। 'निष्ठा च द्वषजनात्' इत्याद्युदात्तः। अरताम्। 'ऋ गतौ' इत्यस्य लुङि च्लेः 'सर्तिशास्त्यर्तिभ्यश्च' इत्यङादेशः। 'ऋदृशोऽङिगुणः'। 'न माङ्योगे' इत्यडभावः। निघातः।। १४।।

NOTES

NOTES

'इन्द्रः पूर्भित्' इत्येकादशर्चं पञ्चमं सूक्तं वैश्वामित्रं त्रैष्टुभमैन्द्रम्। अत्रानुक्रमणिका–'इन्द्रः पूर्भिदेकादश' इति। अग्निष्टोमे माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रे 'इन्द्रः पूर्भित्' इति सूक्तम्। 'होत्रकाणाम्' इति खण्डे सूत्रितम्–'इन्द्रः पूर्भिदुदु ब्रह्माणि' (आश्व. श्रौ. ५. १६) इति। पृष्ठपाभिप्लवषडहयोः प्रथमेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रे चातुर्विंशिकातिदिष्टम्य अहीनसूक्तस्य स्थाने त्रीणि संपातसूक्तानि। तत्रेदं प्रथमम्। 'इन्द्रः पूर्भिद्य एक इद्यस्तिग्मशृङ्गः' (आश्व. श्रौ. ७. ५) इति। उद्भिद्बलभिदोर्निष्केवल्ये एतत्सूक्तं निविन्द्धानीयम्। सूत्रितं च– 'इन्द्र सोममिन्द्रः पूर्भिदिति मध्यंदिनः' (आश्व. श्रौ. १. ८) इति।।

# उषस् १.४

**द्युतद्यामानं बृहतीमृतेन ऋतावरीमरुणप्सुं विभातीं।**
**देवीमुषसं स्वरावहंतीं प्रति विप्रासो मतिभिर्जरंते।। १।।**

द्युतत्ऽयामानं। बृहतीं। ऋतेन। ऋतऽवरीं। अरुणऽप्सुं। विऽभातीं।

देवीं। उषसं। स्वः। आऽवहंतीं। प्रति। विप्रासः मतिऽभिः। जरंते।। १।।

द्युतद्यामानं दीप्तरथां बृहतीं महतीमृतेन सत्वेन यञ्चेन वर्तावरीमृतवती–मरुणप्सुमरुणरूपां विभाती व्युच्छ्ंतीं देवीं द्योतमानामुपसं स्वरावहंतीं सूर्य गच्छ्तीं। एवं महानुभावामुषसं विप्रासो मेधाविन ऋत्विजो मतिभिः स्तुतिभिः प्रति जरंते। स्तुवंति।।

**एषा जनं दर्शता बोधयंती सुगान्पथः कृण्वती यात्यग्रें।**
**बृहद्रथा बृहती विश्वमिन्वोषा ज्योतिर्यच्छत्यग्रे अह्नों।। २।।**

एषा। जनं। दर्शता। बोधयंती। मुऽगान्। पथः। कृण्वती। याति। अग्रें।

बृहत्ऽरथा। बृहती। विश्वंऽइन्वा। उषाः। ज्योतिः। यच्छति। अग्रें। अह्नों।। २।।

दर्शता दर्शनीयेषोषा बोधयंती। कं। जनं। प्रसुप्तमित्यर्थः। पथः सुगान् सुगमनान् कृण्वत्धग्रे सूर्यस्य पुरस्ताद्याति। गच्छ्ति। कीदृभ्युषाः। बृहद्रथा प्रभूतरथा बृहती महती विश्वमिन्वा विश्वं व्याप्नुवाना विश्वतर्पणा वा। ईदृभ्युषा अन्हामग्रे ज्योतिस्तेजो यच्छ्ति।।

**एषा गोभिररुणेभिर्युजानास्रेधंती रयिमप्रायु चक्रे।**
**पथो रदंती सुवितायं देवी पुरुष्टुता विश्ववारा वि भाति।। ३।।**

NOTES

एषा। गोभिः। अरुणेभिः। युजाना। अस्रेधंती। रयिं। अप्रऽआयु। चक्रे।

पथः। रदंती। सुविताय। देवी। पुरुऽस्तुता। विश्वऽवारा। वि। भाति।। ३।।

एषोषा अरुणेभिररुणवर्णैर्गोभिर्वलीवर्दै रथं युजाना योजयंत्यस्रेधंत्यशुष्यंत्यक्षीणा वा। किं। रयिं धनमप्राध्वप्रगंतृ अविचलितं चक्रे। करोति। किं कुर्वती। पथो मार्गान् रदंती प्रकाशयंती। किमर्थं। सुविताय सुष्ठु गमनाय देवी द्योतमाना पुरुष्टुता वङभिः स्तुता विश्ववारा सर्वैर्वरणीया वि भाति। प्रकाशं करोति।।

**एषा व्येनी भवति द्विबर्हा आविष्कृण्वाना तन्वं पुरस्तात्।**
**ऋतस्य पंथामन्वेति साधु प्रजानतीव न दिशो मिनाति।। ४।।**

एषा। विऽएनी। भवति। द्विऽवर्हाः। आविःऽकृण्वाना। तन्वं। पुरस्तात्।

ऋतस्य। पंथां। अनु। एति। साधु। प्रजानतीऽइव। न। दिशः। मिनाति।। ४।।

एषोषा व्येनी भवति विशेषेणश्वेता भवति द्विबही द्वयोः प्रथममध्यमयोः परिवृढोषाः पश्चात्तन्वं स्वीयां तनूमाविष्कृण्वाना प्रकटीकुर्वती। कुच। पुरस्तात् पूर्वस्यां दिशि। किंच ऋतस्यादित्यस्य पंथां पंथानं साधु सम्यगन्वेति। किंच प्रजानतीव विश्वं प्रज्ञापयंती। इवेति संप्रत्यर्थे। न दिशो मिनाति। न हिनस्ति। प्रत्युत दिशः प्रकाशयति। अथवा प्रजानतीवानुगंतव्यमिति प्रकर्षेणवगच्छंती चर्तस्य पंथामन्वेति।।

**एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो अस्थात्।**
**अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात्।। ५।।**

एषा। शुभ्रा। न। तन्वः। विदाना। ऊर्ध्वाऽइव। स्नाती। दृशये। नः। अस्थात्।

अप द्वेषः। बाधमाना। तमांसि। उषाः। दिवः। दुहिता। ज्योतिषा आ। अगात्।। ५।।

एषोषाः शुभ्रा न शुभ्रवर्णा निर्मला स्वलंकृता योषिदिव तन्वोऽगानि विदाना प्रज्ञापयंती स्नाती स्नानं कुर्वाणोर्ध्वेवोव्रतेव स्नानादुत्तिष्ठंतीव नोऽस्त्रदर्थमस्प्राकं पुरतो वा दृशये सर्वेषां दर्शनायोदस्थात्। पूर्वस्वां दिश्युत्तिष्ठति। किं कुर्वती। द्वेषो द्वेष्याणि तमांस्यप बाधमाना दिवो दुहितोषा ज्योतिषा तेजस्रा मह्वावात्। आगच्छति।।

**एषा प्रतीची दुहिता दिवो नॄन्योषेव भद्रा नि रिणीते अप्सः।**
**व्यूर्ण्वती दाशुषे वार्याणि पुनर्ज्योतिर्युवतिः पूर्वथाकः।। ६।।**

NOTES

एषा। प्रतीची। दुहिता। दिवः। नॄन् योषाऽइव। भद्रा। नि। रिणीते। अप्तः।

विऽऊर्ण्वती। दाशुषे। वार्याणि। पुनः। ज्योतिः। युवतिः। पूर्वऽथा। अकरित्यकः।। ६।।

एषोषाः प्रतीअभिमुखा सती दिवो दुहिता नॄन् सर्वान् प्राणिनः प्रति भद्रा योषेव कल्वाणवेषा योषिदिवाप्सो रूपं नि रिणीते। प्रेरयति। किंच दाशुषे हविर्ददवि यजमानाय वार्याणि वरणीयानि धनानि व्यूर्ण्वती प्रयच्छंती युवतिर्नित्ययौवना सर्वत्र मिश्रयंती वा पुनरद्यापि पूर्वथा पूर्वमिव ज्योतिस्तेजोऽकः। करोति।। २३।।

युंजते मन इति पंचर्चं नवमं सूक्तं। अत्रेयमनुक्रमणिका। युंजते पंच श्वावाश्वः सावित्रं तु जागतमिति। ध्यावाश्वो नामात्रेय ऋषिः। जगती छंदः। सविता देवता।। पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि वैश्वदेवशस्त्रे साविचनिविद्वानमिदं। सूचितं च। युंजते मन द्हेह व इति चतस्रः। आ°. ७. ४.। इति।। आद्या ग्रावस्तोत्रेऽपि। सूचितं च। युंजते मन उत युंजते धिय आ तू न इंद्र क्षुमंतं।। आ° ४. १२.। इति।।

## सोमः १.५

सोमस्य धारेति पंचर्चं त्रयोदशं मूक्तं भारद्वाजस्य वमुनाम्र आर्थं जागतं पवमानसोमदेवताकं। तथा चानुक्रांतं। सोमस्य वसुर्भारद्वाज इति। गतो विनियोगः।

**सोमस्य धारा पवते नृचक्षस ऋतेन देवान्हवते दिवस्परि।**
**बृहस्पते रवथेना वि दिद्युते समुद्रासो न सवनानि विव्यचुः।। १।।**

**सोमस्य। धारा। पवते। नृऽचक्षसः। ऋतेन। देवान्। हवते। दिवः। परि।**
**बृहस्पतेः। रवथेन। वि। दिद्युते। समुद्रासः। न। सवनानि। विव्यचुः।। १।।**

सोमस्याभिषूयमाणस्य धारा पवते। द्योतते। कीदृशस्य सोमस्य। नृचक्षसो नृणां यजमानानां द्रष्टुः। स चर्तेन यज्ञेन देवान्सोमभाज इंद्रादीन्हवते। कुच। दिवस्परि द्युलोकस्योपरि वर्तमानान्। बृहस्पतेर्मंचपालकस्य स्तोतू रवथेन शब्देन स्तोचेण वि दिद्युते। विद्योतते। समुद्रासो न समुद्रा इव पृथिवीं सवनानि यज्ञसंबंधीनि विव्यचुः। व्याप्नुवंति।।

**यं त्वा वाजिन्नघ्न्या अभ्यनूषतायोहतं योनिमा रोहसि द्युमान्।**
**मघोनामायुः प्रतिरन्महि श्रव इंद्राय सोम पवसे वृषा मदः।। २।।**

यं। त्वा। वाजिन्। अघ्न्याः। अभि। अनूषत। अयःऽहतं। योनिं। आ। रोहसि। द्युऽमान्।

मघोनां। आयुः। प्रऽतिरन्। महि। श्रवः। इंद्राय। सोम। पवसे। वृषा। मदः।। २।।

हे वाजिन्नन्नवन् सोम यं त्वा त्वामघ्न्या अहननीया गावोऽभ्यनूषत अभिष्टुवंति। आशिरार्थं स्थिताः शब्दायंत इत्यर्थः। स त्वमयोहतं। अय इति हिरण्यनाम। तेन तद्वान्पाणिर्लक्ष्यते। हिरण्मयेन पाणिना हतं संस्कृतं योनिं स्थानमा रोहसि द्युमान्दीप्तः सन्। अभि योनिमयोहतं। ऋ°. ९. १. २.। इति ह्युक्तं। किंच हे सोम मघोनां हविष्मतां यजमानानामायुरायुष्यं महि महच्छ्रवोऽन्नं यशो वा प्रतिरन्वर्धयन्निंद्रायेंद्रार्थं पवसे। पूयसे। वृषा वर्षको मदो मदकरश्च त्वं।।

**एंद्रस्य कुक्षा पवते मदिंतम ऊर्जं वसानः श्रवसे सुमंगलः।**
**प्रत्यङ् स विश्वा भुवनाभि पप्रथे क्रीळन्हरिरत्यः स्यंदते वृषा।। ३।।**

आ। इंद्रस्य। कुक्षा। पवते। मदिन्ऽतमः। ऊर्जं। वसानः। श्रवसे। सुऽमंगलः।

प्रत्यङ्। सः। विश्वा। भुवना। अभि। पप्रथे। क्रीळन्। हरिः। अत्यः। स्यंदते। वृषा।। ३।।

अयं सोम इंद्रस्य कुक्षा कुक्षावा पवते। आसिच्यते। किमर्थं। श्रवसे तस्यान्नाय यष्टुर्वान्नसिद्ध्यर्थं। सोमो विशेष्यते। मदिंतमो मादयितृतम ऊर्जं वसानो बलकरं रसमाच्छादयन्। अपो वसानः। ऋ°. ९. ७८. १ इति ह्युक्तं। सुमंगलः शोभनमंगलप्रदः। स सोमः प्रत्यङ् विश्वा भुवना सर्वाणि भूतजातान्यभि पप्रथे। अभिप्रथयति। दिव्युदितः सन् क्रीळन् वेद्यां स क्रीडमानो हरिर्हरितवर्णोऽत्योऽतनकुशलो वृषा वर्षकः स्यंदते रसरूपेण।।

**तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः।**
**नृभिः सोम प्रच्युतो यावभिः सुतो विश्वान्देवाँ आ पवस्वा सहस्रजित्।। ४।।**

तं। त्वा। देवेभ्यः। मधुमत्ऽतमं। नरः। सहस्रधारं। दुहते। दश। क्षिपः।

नृऽभिः। सोम। प्रऽच्युतः। यावऽभिः। सुतः। विश्वान्। देवान्। आ। पवस्व। सहस्रऽजित्।। ४।।

हे सोम तं तादृशं त्वा त्वां देवेभ्य इंद्राद्यर्थं मधुमत्तममतिशयेन मधुमंतं सहस्रधारं बडधारायुक्तं दुहते। दुहंति। के। नरो नेतार ऋत्विजो दश क्षिपस्तेषां

NOTES

NOTES

दशसंख्याका अंगुलयश्च। हे सोम नृभिर्मनुष्यैः प्रच्युतो ग्रावभिः सुतोऽभिषुतस्त्वं सहस्त्रजित् सहस्त्रसंख्याकधनस्य जेता मन् विश्वान्देवाना पवस्व।।

**तं त्वां हस्तिनो मधुमंतमद्रिभिर्दुहंत्यप्सु वृषभं दश क्षिपः।**

**इंद्रं सोम मादयन्दैव्यं जनं सिंधोरिवोर्मिः पवमानो अर्षसि।। ५।।**

तं। त्वा। हस्तिनः। मधुऽमंतं। अद्रिऽभिः। दुहंति। अप्ऽसु। वृषभं। दश। क्षिपः।

इंद्रं सोम। मादयन्। दैव्यं। जनं। सिंधोःऽइव। ऊर्मिः। पवमानः। अर्षसि।। ५।।

तं तादृशं मधुमंतं मधुररसं वृषभं कामानां वर्षकं त्वा त्वां हस्तिनः सुहस्तस्य दश क्षिपोऽंगुलयोऽद्रिभिर्ग्रावभिरप्सु दुहंति। तादृश हे सोम इंद्रमन्यं दैव्यं जनं देवसंबंधिनं संघं मादयन् सिंधोरूर्मिरिव पवमानः पूयमानः सन्नर्षसि। गच्छसि।। ५।।

# नासदीय सूक्त (सृष्ट्युत्पत्ति सूक्त) १.६

**मण्डल १०** **सूक्त १२९**

**ऋषि**–परमेष्ठी प्रजापति **देवता**–सृष्टि-स्थति-प्रलय कर्ता परमात्मा

**छन्द**–त्रिष्टुप्।

**संहिता–पाठः**

१. **नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।**
**किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्।।**

**पद-पाठ**

न। असत्। आसीत्। नो इति। सत्। आसीत्। तदानीम्।
न। आसीत्। रजः। नो इति। विऽओम। परः। यत्।
किम्। आ। अवरीवरिति। कुह कस्य। शर्मन्।
अम्भः। किम्। आसीत्। गहनम्। गभीरम्।। १।।

**अन्वय**–तदानीम् असत् न आसीत्, सत् नो आसीत्, रजः न आसीत्, व्योम नो यत् परः। किम् आवरीवः? कुह? कस्य शर्मन्? गहनम् गभीरम् अम्भः किम् आसीत्?

NOTES

**सायण**–तपसस्तन्महिनाजायतैकमित्यादिनाग्रे सृष्टिः प्रतिपादयिष्यते। अधुना ततः प्रागवस्था निरस्तसमस्तप्रपञ्चा वा प्रलयावस्था सा निरूप्यते। तदानीं प्रलयदशायामवस्थितं यदस्व जगतो मूलकारणं तदसच्छशविषाणवन्निरूपाख्यं नासीत्। न हि तादृशात्कारणादस्य सतो जगत उत्पत्तिः संभवति। तथा नो सन्नैव सदात्मवत्सत्त्वेन निर्वाच्यमासीत्। यद्यपि सदसदात्मकं प्रत्येकं विलक्षणं भवति तथापि भावाभावयोः सहावस्थानमति संभवति। कुतस्तयोस्तादात्म्यमिति उभयविलक्षणमनिर्वाच्यमेवासीदित्यर्थः। ननु नो सदिति पारमार्थिकसत्त्वस्य निषेधः। तर्ह्यात्मनाऽप्यनिर्वाच्यत्वप्रसङ्गः। अथोच्येत। न। आनीदवातमिति तस्य सत्त्वमग्रे वक्ष्यते। परिशेषान्मायाया एवात्र सत्त्वं निषिध्यत इति। एवमपि तदानीमिति विशेषणानर्थक्यं व्यवहारदशायामपि तस्याः पारमर्थिकसत्त्वाभावात्। अथ व्यावहारिकसतां पृथिव्यादीनां भावानां विद्यमानत्वात् कथं नो सदिति निषेधः। तत्राह। नासीद्रज इत्यादि। लोका रजांस्युच्यन्ते। (नि. ४-१९) इति यास्कः। अत्र च सामान्यापेक्षमेकवचनम्। व्योम्नो वक्ष्यमाणत्वात्तस्याधस्तना पातालादयः पृथिव्यन्ता नासन्नित्यर्थः। तथा व्योमान्तरिक्षं तदपि नो नैवासीत्। पर इति सकारान्तं परस्तादित्यर्थे वर्तते। परशब्दाच्छान्दसोऽस्तातेरर्थेऽसि प्रत्ययः। परो व्योम्नः परस्तादुपरिदेशे द्युलोकप्रभृति सत्यलोकान्तं यदपि तदपि नासीदित्यर्थः। अनेन चतुर्दशभुवनगर्भं ब्रह्माण्डं स्वरूपेण निषिद्धं भवति। अथ तदावरकत्वेन पुराणेषु प्रसिद्धानि यानि वियदादिभूतानि तेषामवस्थानप्रदेशं तदावरणनिमित्तं चापेक्षमुखेन क्रमेण निषेधयति किमावरीवरिति। किमावरणीयं तत्त्वमावरकभूत-जातमावरीवः। अत्यन्तमावृणुयात्। आवार्याभावात्तदावरकमपि नासीदित्यर्थः। वृणोतेर्यङ्लुडन्ताच्छान्दसे लङि तिपि रूपमेतत् यद्वा किमिति प्रथमैव। किं तत्त्वमावरकमावृणुयात्। आवार्याभावादाव्रियमाणवत्तदपि स्वरूपेण नासीदित्यर्थः। आवृण्वत्तत्त्वं कुह कुत्र देशेऽवस्थायावृणोति। आधारभूतस्तादृशो देशोऽपि नासीदित्यर्थः। कि शब्दात् सप्तम्यर्थे ह प्रत्ययः। कुतिहोः। (पा. ७-२-१०४) इति। प्रकृतेः क्वादेशः। कस्य शर्मन् कस्य वा भोक्तुर्जीवस्य शर्मणि सुखदुःखसाक्षात्कारलक्षणे वा निमित्तभूते सति तदावरकं तत्त्वमावृणुयात्। जीवानामुपभोगार्था हि सृष्टिः। तस्यां हि सत्यां ब्रह्माण्डस्य भूतैरावरणं प्रलयदशायां च भोक्तारो जीवा उपाधिविलयात्प्रलीना इति कस्य कश्चिदपि भोक्ता न संभवतीत्यावरणस्य निमित्ताभावादपि तन्न घटत इत्यर्थः। एतेन भोग्यप्रपञ्चवद्भोक्तृप्रपञ्चोऽपि तदानीं नासीदित्युक्तं भवति। किं शब्दादुत्तरस्य ङसः सावेकाच इति प्राप्तस्योदात्तत्वस्य न गोश्वन्साववर्णेति प्रतिषेधः। सुपां

NOTES

सुलुगिनि शर्मणः सप्तम्या लुक्। यद्यपि सावरणस्य ब्रह्माण्डस्य निषेधेन तदन्तर्गतमप्सत्त्वमपि निराकृतं तथाप्यापो वा इदमग्रे सलिमासीत् (तै. स. ७. १. ५. १)। इत्यादि श्रुत्वा कश्चिदपां सद्भावमाशंकेत। तं प्रत्याचष्टेऽम्भः किमासीदिति। गहनं दुष्प्रवेशं गभीर दुःस्थानमत्यगाधम् ईदृशमग्धः किमासीत्। तदपि नैवासीदित्यर्थः। श्रुतिस्त्ववान्तरप्रलयविषया।

**२. न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः।**
**आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास॥**

**पद-पाठ**

न। मृत्युः। आसीत्। अमृतम्। न। तर्हि।
न। रात्र्याः। अह्नः। आसीत्। प्रऽकेतः।
आनीत्। अवातम्। स्वधया। तत्। एकम्।
तस्मात् ह। अन्यत्। न। परः। किम्। चन। आस॥ २॥

**अन्वय**—तर्हि मृत्युः न आसीत्, न अमृतम्, रात्र्याः अह्नः प्रकेतः न आसीत्। तत् आनीत् अवातम्, स्वधया, एकम्। ह तस्मात् अन्यत् किञ्चन न आस न परः।

**सायण**—ननूक्तस्य प्रतिसंहारस्य संहर्त्रपेक्षत्वात् स एव संहर्ता मृत्युर्विद्यत इत्यत आह। न मृत्युरासीदिति ननु यदि स नासीत् तर्हि तदभावकृतममृतममरणं प्राणिनामवस्थानं तदानीमपि स्यात् तत्राह। अमृतं न तर्हीति। तर्हि तस्मिन्प्रतिहारसमये। अयं भावः। सर्वेषां प्राणिनां परिपक्वं भोगहेतुभूतं सर्वं कर्म यदोपभुक्तमासीत् तदा भोगाभावान्निष्प्रयोजनमिदं जगदिति परमेश्वरस्य मनसि संजिहीर्षा जायते। तथैव स मृत्युः सर्वं जगत्संहरत इति किमनेन मृत्युना संहर्त्रा तदभावकृतं वा कथममरणं स्वादिति। एतदेवाभिप्रेत्य कठैराम्नायते। यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनम्। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स। (क. उ. २-२५) इति। नन्वेतस्य सर्वस्याधिकरणभूतः कालो विद्यत इत्यत आह। न रात्र्या इति। न रात्र्या अह्नश्च प्रकेतः प्रज्ञानमासीत्। तद्धेतुभूतयोः सूर्याचन्द्रमसोरभावात्। एतेनाहोरात्रनिषेधेन तदात्मको मासर्तुसंवत्सरप्रभृतिकः सर्वः कालः प्रत्याख्यातः। कथं तर्हि नो सदासीत्तदानीमिति कालवाची प्रत्ययः। उपचारादिति ब्रूमः। यथेदानीन्तननिषेधस्य कालोऽवच्छेदकस्तथा मायापि तदवच्छेदहेतुरित्यवच्छेद-कत्वसाम्येनाकालेऽपि कालवाची प्रत्ययः। यदवादिष्म ब्रह्मणः परमार्थसत्त्वमग्ने

वक्ष्यत इति तदिदानीं दर्शयत्यानीदिति। तत्सकलवेदान्तप्रसिद्धं ब्रह्मतत्त्वमानीत्। प्राणितवत्। नन्वेवं प्राणनकर्तुर्जीवभावापन्नस्य ब्रह्मणः सत्वं स्यात् न विवक्षितस्य निरुपाधिकस्य ब्रह्मणः। अप्राणो ह्यमनाः शुद्ध इति तस्य प्राणसम्बन्धाभावात् तत्राहानीदवातमिति। अयमाशयः। आनीदित्यत्र घात्वर्थक्रिया तत्कर्ता तस्य च भूतकालसम्बन्ध इति त्रयोऽर्थाः प्रतीयन्ते। तत्र समुदायो न विधीयते यथाग्नेयोऽष्टाकपाल इति येन ब्रह्मणः सत्त्वं न स्यात्। कि तर्ह्यनेन कर्तृत्वमनूद्य भूतकालसत्तालक्षणो गुणो विधीयते दध्ना जुहोतीति वाक्यान्तरविहिताग्निहोत्रानुवादेन तत्र गुणविधानम्। तत्राप्यनेन कर्तृविशिष्टस्य न पूर्वकालसत्ता विधीयते तन्निषेधानुपपत्तिप्रसङ्गात् अतोऽनेन कर्तृत्वेनेदानीन्तनेनोप- लक्षितं यन्निरुपाधिकं परं ब्रह्म तस्यैव भूतकालसत्ता विघीयत इति न कश्चिद्दोष इति। नन्वीदृशस्य ब्रह्मणे मायया सह सम्बन्धसम्भवात्सांख्याभिमता स्वतन्त्रा सद्रूपा सत्त्वरजस्तमोगुणात्मिका मूलप्रकृतिरेवाभिमतेति कथं नो सदिति निषेधः। तत्राह स्वधयेति। स्वस्मिन् धीयते ध्रियत आश्रित्य वर्तते इति स्वघा माया। तया तद्ब्रह्मैकमविभागापन्नमासीत्। सहयुक्तेऽप्रधाने। (पा. २. ३. १९) इति तृतीया सहशब्दयोगाभावेऽपि सहार्थयोगे भवति वृद्धो यूना (पा. १. २. ६५) इति निपातनाल्लिङ्गात्। अत्र प्रकृतिप्रत्ययाभ्यां तस्यां स्वातन्त्र्यं निवार्यते। यद्यप्यसङ्गस्य ब्रह्मणस्तया सह सम्बन्धो न सम्भवति तथापि तस्मिन्नविद्यया तत्स्वरूपमिव सम्बन्धोऽप्यध्यस्यते यथा शुक्तिकायां रजतस्य। एतेन सद्रूपत्वमपि तस्याः प्रत्याख्यातम्। ननु यदि माया ब्रह्मणा सहाविभागापन्ना तर्हि तस्या अनिर्वाच्यत्वाद् ब्रह्मणोऽपि तत्प्रसङ्ग इति कथं तस्य सत्त्वमुक्तमानीदवातमिति। ब्रह्मणो वा सत्त्वात्तस्या अपि सत्त्वप्रसङ्ग इति कथं नोऽसदादीदिति सत्त्वप्रतिषेधः। मैवं। अयुक्तिदृष्ट्यैक्यावभासेऽपि युक्त्या विविच्य मायांशस्यानिर्वाच्यत्वं ब्रह्मणः सत्त्वं च प्रतिपादितम्। ननु दृग्दृश्याविति द्वावेव पदार्थावानीदवातं स्वधयेति तौ चेदङ्गीक्रियते तत्किमपरमवशिष्यते नासीद्रज इत्यादिना प्रतिषिध्येत तत्राह तस्मादिति। तस्माद्ध तस्मात्खलु पूर्वोक्तान्मायासहिताद् ब्रह्मणोऽन्यत्किंचन किमपि वस्तु भूतभौतिकात्मकं जगन्नास। न बभूव। छन्दस्युभयथेति लिट सार्वधातुकत्वादस्तेर्भूभावाभवः। ननु तदानीमन्यस्य सत्त्वनिषेधो न शंक्यः। असत्त्वे चाप्रसक्तत्वान्न निषेधोपयोग इत्यत आह पर इति। परः परस्तात् सृष्टेरूर्ध्वं वर्तमानभिदं जगत्तदानीं न बभूवेत्यर्थः। अन्यथोक्तरीत्या क्वचिदपि निषेधो न स्यादिति भावः।

NOTES

NOTES

**३. तम॑ आसी॒त्तम॑सा गू॒ल्हमग्रे॑ऽप्रके॒तं स॑लि॒लं सर्व॑मा इ॒दम्।**
**तु॒च्छ्येना॒भ्वपि॑हितं॒ यदासी॒त्तप॑स॒स्तन्म॑हि॒नाजा॑य॒तैक॑म्॥**

**पद-पाठ**

आ॒सी॒त्। तम॑सा। गू॒ल्हम्। अग्रे॑।
अ॒प्र॒ऽके॒तम्। स॒लि॒लम्। सर्व॑म्। आ॒ः। इ॒दम्।
तु॒च्छ्येन॑। आ॒भु। अपि॑ऽहितम्। यत्। आसी॑त्।
तम॑सः। तत्। म॒हि॒ना। अ॒जा॒य॒त॒। एक॑म्॥ ३॥

**अन्वय**–अग्रे तमसा गूल्हम् तमः आसीत् अप्रकेतम् इदम् सर्वम् सलिलम् आः। यत् आभु तुच्छ्येन अपिहितम् आसीत्, तत् एकम् तमसः महिना अजायत।

**सायण**–ननूक्तप्रकारेण यदि पूर्वमिदं जगन्नासीत्कथं तर्हि तस्य जन्म। जायमानस्य जनिक्रियायां कर्तृत्वेन कारकत्वात् कारकं च कारणावान्तरविशेष इति कारकस्य सतो नियतपूर्वक्षणवर्तित्वस्यावश्यंभावात्। अथैतद्दोषपरिजिहीर्षया जनिक्रियायाः प्रागपि तद्विद्यत इत्युच्यते। कथं तस्य जन्म। अत आह। तमसा गूल्हमग्र इति। अग्ने सृष्टेः प्राक् प्रलयदशायां भूतभौतिकं सर्वं जगत्तमसा गूल्हम्। यथा नैशं तमः सर्वपदार्थजातमावृणोति तद्वत्। आत्मतत्त्वस्यावरकत्वान्माया-परसंज्ञं भावरूपाज्ञानमत्र तम इत्युच्यते। तेन तमसा निगूढं संवृतं कारणभूतेन तेनाच्छादितं भवति। आच्छादकात्तस्मात्तमसो नामरूपाभ्यां यदाविर्भवनं तदेव तस्य जन्मेत्युच्यते। एतेन कारणावस्थायामसदेव कार्यमुत्पद्यत इत्यसद्वादिनोऽ-सत्कार्यवादिनो ये मन्यते ते प्रत्याख्याताः। ननु कारणे तमसि तज्जगदात्मकं विद्यते चेत् कथं नासीद्रज इत्यादिनिषेधः। तत्राह तम आसीदिति। तमो भावरूपाज्ञानं मूलकारणम्। तद्रूपता तदात्मनाम्। यतः सर्वं जगत्प्राक् तम आसीदतो निषिध्यत इत्यर्थः। नन्वावरकत्वादावरकं तमः कर्तृ आवार्यत्वाज्जगत्कर्म। कथं तयोः कर्मकर्त्रोस्तादात्म्यम्। तत्राह। अप्रकेतमिति। अप्रकेतमप्रज्ञायमानम्। अयमर्थः। यद्यपि जगतस्तमसश्च कर्मकर्तृभावो यौक्तिको विद्यते तथापि व्यहारदशायामिव तस्यां दशायां नामरूपाभ्यां विसृष्टं न ज्ञायत इति तादात्म्यवर्णनम्। अत एव मनुना स्मर्यते। आसीदिदं तमोभूतमप्रज्ञातलक्षणम्। अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः। (मनु. १.५) इति। कुतो वा न प्रज्ञायते तत्राह। सलिलम्। सल गतौ। औणदिक इलच्। इदं दृश्मानं सर्वं जगत्सलिलं कारणेन सङ्गतम-विभागापन्नमाः आसीत्। अस्तेर्लङि तिपि बहुलं छन्दसीतीऽभावे हल्ङ्याब्भ्य

इति तिलोपे तिप्यनस्तेः। (पा. ८. २. ७३) इति पर्युदासाद्दकाराभावः। यद्वा सलिलमिति लुप्तोपमम्। सलिलमिव। यथा क्षीरेणाविभागापन्नं नीरं दुर्विज्ञानं तथा तमसाविभागापन्नं जगन्न शक्यविज्ञानमित्यर्थः। ननु विविधविचित्ररूपभूयसः। प्रपञ्चस्य कथमतितुच्छेन तमसा क्षीरेण नीरस्येवाभिभवः। तथा तमोऽपि क्षीरवद् बलवदित्येवोच्यते। तर्हि दुर्बलस्य जगतः सर्गसमयेऽपि नोद्भवसंभव इत्यत आह। तुच्छ्येनेति। आ समन्ताद्भवतीत्याभु तुच्छ्येन। छान्दसो यकारोपजनः। तुच्छेन तुच्छकल्पेन सदसद्विलक्षणेन भावरूपाज्ञानेनापिहितं छादितमासीत्। दधातेः कर्मणि निष्ठा। दधातेर्हि। गतिरनन्तर इति गतेः प्रकृतिस्वरत्वम्। एकमेकीभूतं कारणेन तमसाविभागतां प्राप्तमपि तत्कार्यजातं तपसः स्रष्टव्यपर्यालोचनरूपस्य महिना माहात्म्येनाजायत। उत्पन्नम्। तमसः स्रष्टव्यपर्यालोचनरूपत्वं चान्यत्राम्नायते। यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। (मु. उ. १. १. ९) इति।

NOTES

**संहिता-पाठः**

**४. कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।**
**सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा॥**

**नासदीय सूक्त**

**पद-पाठ**

कामः। तत्। अग्रे। सम्। अवर्तत। अधि।
मनसः। रेतः। प्रथमम्। यत्। आसीत्।
सतः। बन्धुम्। असति। निः। अविन्दन्।
हृदि। प्रतिऽइष्य। कवयः। मनीषा॥ ४॥

**अन्वय**–अग्रे तत् कामः सम् अवर्तत यत् मनसः अधि प्रथमम् रेतः आसीत्। सतः बन्धुम् कवयः मनीषा हृदि प्रतीष्य असति निरविन्दन्।

**सायणः**–ननूक्तरीत्या यदीश्वरस्य पर्यालोचनं जगतः पुनरुत्पत्तौ कारणं तदेव किंनिबन्धनमित्यत आह कामस्तदग्र इति। अग्रेऽस्य विकारजातस्य सृष्टेः प्रागवस्थायां परमेश्वरस्य मनसि कामः समवर्तत। सम्यगजायत। सिसृक्षा जातेत्यर्थः। ईश्वरस्य सिसृक्षा वा। किंहेतुकेत्यत आह मनस इति। मनसोऽन्तःकरणस्य सम्बन्धि वासनाशेषेण मायायां विलीनेऽन्तःकरणे समवेतम्। सामान्योपेक्षमेकवचनम्। सर्वप्राण्यन्तःकरणेषु समवेतमित्यर्थः। एतेनात्मनो गुणाधारत्वं

NOTES

प्रत्याख्यातम्। तादृशं रेतो भाविनः प्रपञ्चस्य बीजभूतं प्रथममतीते कल्पे प्राणिभिः कृतं पुण्यात्मकं कर्म यद्यतः कारणात्सृष्टिसमये आसीत् अभवत्। भूष्णु वर्णिष्णवजायत परिपक्वं सत्फलोन्मुखमासीदित्यर्थः। तत्ततो हेतोः फलप्रदस्य सर्वसाक्षिणः कर्माध्यक्षस्य परमश्वेरस्य मनसि सिसृक्षाजायतेत्यर्थः। तस्यां च जातायां स्रष्टव्यं पर्यालोच्य ततः सर्वं जगत् सृजति। तथा चाम्नायते। सोऽकामयत बहु स्यां प्रजायेयेति सो तपोऽतप्यत स तपस्तप्त्वेदं सर्वमसृजत यदिदं किञ्च। (तै. आ. ८-६)। इति श्रुत्यात्मनेत्थमवगमितेऽर्थे विद्वदनुभवत्यनुग्राहकत्वेन प्रमाणयति सत इति। सतः सत्त्वेनेदानीमनुभूयमानस्य सर्वस्य जगतो बन्धुं बन्धकं हेतुभूतं कल्पान्तरे प्राण्यनुष्ठितं कर्मसमूहं कवयः कान्तदर्शना अतीतानागतवर्तमानाभिज्ञा योगिनो हृदि हृदये निरुद्धया मनीषा मनीषया बुद्ध्या। सुपां सुलुगिति तृतीयाया लुक्। प्रतीष्य विचार्य। अन्येषामपीति सांहितिको दीर्घः। असति सद्विलक्षणेऽव्याकृते कारणे निरविन्दन्। निष्कृष्यालभन्त। विविच्याजानन्नित्यर्थः।

### संहिता-पाठः

**५. तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त्।**
**रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात्॥**

### पद-पाठ

तिरश्चीनः। विऽततः। रश्मिः। एषाम्।
अधः। स्वित्। आसी३त्। उपरि। स्वित्। आसी३त्।
रेतःऽधाः। आसन्। महिमानः। आसन्।
स्वधा। अवस्तात् प्रऽयतिः। परस्तात्॥ ५॥

**अन्वय**—एषाम् रश्मिः विततः तिरश्चीनः अधः स्वित्? आसीत् उपरि स्वित् आसीत्? रेतोधाः आसन् महिमानः आसन् स्वधा अवस्तात् प्रयतिः परस्तात्।

**सायणः**—एवमविद्याकामकर्माणि सृष्टेर्हेतुत्वेनोक्तानि। अधुना तेषां स्वकार्यजनने शैघ्र्यं प्रतिपाद्यते। येयं नासदासीदित्यविद्या प्रतिपादिता यश्च कामस्तदग्र इति कामो मनसो रेतः प्रथमं यदासीदिति यत्कर्मैषामविद्याकामकर्मणां विपदादिभूतजातानि सृजतां रश्मी रश्मसदृशो यथा सूर्यरश्मिरुदयानन्तरं निमेषमात्रेण युगपत् सर्वं जगद् व्याप्नोति तथा शीघ्रं सर्वत्र व्याप्नुवन् यः कार्यवर्गो विवतो विस्तृत आसीत्। स्विदासीदिति वक्ष्यमाणमत्रापि सम्बध्यते। विचार्यमाणानाम्।

(पा. ८-२-९७) इति प्लुतः। तत्रोदात्त इत्यनुवृत्तेः स चोदात्तः। स्विदिति वितर्के। स कार्यवर्गः किं प्रथमतः तिरश्चीनस्तिर्यगवस्थितो मध्ये स्थित आसीत् किंवाधोऽधस्तादासीत्। आहोस्विदुपर्युपरिष्ठात् किमासीत्। उपरि स्विदासीदिति च (पा. ८-२-१०२) इति अनुदात्तः प्लुतः। आत्मनः आकाशः संभूत आकाशाद्वायुर्वायोरग्निः। (तै. आ. ८-१) इत्यादिकया पञ्चमीश्रुत्वा तत उद्‌गातारं ततो होतारमितिवत्क्रमप्रतिपत्तौ सत्यामपि विद्युत्प्रकाशवत्सर्गस्य शीघ्रव्यापनेन तस्य क्रमस्य दुर्लक्षणत्वादेतेषु त्रिषु स्थानेषु प्राथम्यं कुत्रेति विचार्यते। एवं नाम शीघ्रं सर्वतो दिक्षु सर्गो निष्पन्नः इत्यर्थः। एतदेव विभजते। सृष्टेषु कार्येषु मध्ये कोचिद्भावा रेतोधा रेतसो बीजभूतस्य कर्मणो विधातारः कर्तारो भोक्तारश्च जीवा आसन् अन्ये भावा महिमानः। स्वार्थिक इमनिच्। महान्तो वियदादयो भोग्या आसन्। एवं मायासहितः परमेश्वरः सर्व जगत् सृष्ट्वा स्वयं चानुप्रविश्य भोक्तृभोग्यादिरूपेण विभागं कृतवानित्यर्थः अयमेवार्थस्तैत्तिरीयके तत्सृष्ट्वा तदेवानुप्राविशत् (तै. आ. ८-६) इत्यारभ्य प्रतिपाद्यते। तत्र च भोक्तृभोग्योर्मध्ये स्वधा। अन्ननामैतत्। भोग्यप्रपञ्चोऽवस्तादवरो निकृष्ट आसीत्। प्रयतिः प्रयतिता भोक्ता परस्तात्पर उत्कृष्ट आसीत्। भोग्यप्रपञ्च भोक्तृप्रपञ्चस्य शेषभूतं कृतवानित्यर्थः। विभाषा परावराभ्याम्। (पा. ५. ३. २९) इति प्रथमार्थेऽस्तातिः। अस्ताति च। (पा. ५. ३. ४०) इत्यवरशब्दस्यावादेशः। अवस्तादिति संहितायामीषाअक्षादित्वात् प्रकृतिभावः।

### संहिता-पाठः

**६. को अ॒द्धा वे॑द॒ क इ॒ह प्र वो॑च॒त्कुत॒ आजा॑ता॒ कुत॑ इ॒यं विसृ॑ष्टिः।**
**अ॒र्वाग्दे॒वा अ॒स्य वि॒सर्ज॑ने॒नाथा॒ को वे॑द॒ यत॑ आब॒भूव॑॥**

### पद-पाठः

कः। अ॒द्धा। वे॒द। कः। इ॒ह। प्र। वो॒च॒त्।
कुत॑ः। आऽजा॑ता। कुत॑ः इ॒यम्। विऽसृ॑ष्टिः।
अ॒र्वाक्। दे॒वाः। अ॒स्य। वि॒ऽसर्जनेन।
अथ॑। कः। वे॒द। यत॑ः। आऽब॒भूव॑॥ ६॥

**अन्वय**—कः अद्धा वेद, कः इह प्र वोचत्, इयम् विसृष्टिः कुतः आजाता। देवाः अस्य विसर्जनेन अर्वाक्। अथ कः वेद यतः आ बभूव।

NOTES

NOTES

**सायणः**–एवं भोक्तृभोग्यरूपेण सृष्टिः संग्रहेण प्रतिपादिता। एतावद्धा इदमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नाद इतिवत्। अथेदानीं सा सृष्टि र्दुर्विज्ञानेति न विस्तरेणाभिहितेत्याह। को अद्धेति। कः पुरुषोऽद्धा पारमार्थ्येन वेद। जानाति। को वेहास्मिंल्लोके प्र वोचत्। प्रब्रूयात् इयं दृश्यमाना विसृष्टिर्विविधा भूतभौतिकभोक्तृभोग्यादिरूपेण बहुप्रकारा सृष्टिः कुतः कस्मादुपादानकारणात् कुतः कस्माच्च निमित्तकारणादाजाता। समन्ताज्जाता। प्रादुर्भूता।

एतदुभयं सम्यक्को वेद को वा विस्तरेण वक्तुं शक्नुयादित्यर्थः। ननु देवा अजानन्तः। सर्वज्ञास्ते ज्ञास्यन्ति वक्तुं च शक्नुवन्तीत्यत आह। अर्वागिति। देवाश्चास्य जगतो विसर्जनेन वियदादिभूतोत्पत्त्यनन्तरं विविधं यद्भौतिकं सर्जनं सृष्टिस्तेनार्वागर्वाचीनाः कृताः। भूतसृष्टेः पश्चाज्जाता इत्यर्थः। तथाविधास्ते कथं स्वोत्पत्तेः पूर्वकालीनां सृष्टिं जानीयुः। अजानन्तो वा कथं प्रब्रूयुः। उक्तं दुर्विजानत्वं निर्गमयति। अथैवं सति देवा अपि न जानन्ति किल। तद्व्यतिरिक्तः को नाम मनुष्यादिर्वेद यज्जगत्कारणं जानाति। यतः कारणात्कृत्स्नं जगदाबभूव अजायत।

**संहिता-पाठः**

**७. इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।**
**यो अस्याध्यक्षः परमे व्योमन् सो अङ्ग वेद यदि वा न वेद॥**

**पद-पाठः**

इयम्। विऽसृष्टिः। यतः। आऽबभूव।
यदि। वा। दधे। यदि। वा। न।
यः। अस्य। अधिऽअक्षः। परमे। विऽओमन्।
सः। अङ्ग। वेद। यदि। वा। न। वेद॥ ७॥

**अन्वय**–इयम् विसृष्टिः यतः आबभूव यदि वा दधे यदि वा न। अस्य यः अध्यक्षः परमे व्योमन् अङ्ग सः वेद यदि वा न वेद।

**सायण**–उक्तप्रकारेण यथेदं जगत्सर्जनं दुर्विज्ञानमेवं सृष्टं तज्जगद्दुर्धरम-पीत्याह। इयमिति। यत उपादानभूतात्परमात्मन इयं विसृष्टिर्विविधा गिरिनदीसमुद्रादिरूपेण विचित्रा सृष्टिराबभूव आजाता सोऽपि किल यदि वा दधे धारयति यदि वा न धारयति। एवं च को नामान्यो धर्तुं शक्नुयात्। यदि

NOTES

धारयेदीश्वर एव धारयेन्नान्य इत्यर्थः। एतेन कार्यस्य धारयितृत्वप्रतिपादनेन ब्राह्मण उपादानकारणत्वमुक्तं भवति। तथा च पारमार्षं सूक्तम्। प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्। (वेदा १. ४. २३) इति। यद्वा अनेनार्धर्चेन पूर्वोक्तं सृष्टेर्ज्ञानत्वमेव दृढयति। वेदेत्यनुवर्तते। इयं विविधा सृष्टिर्यत आबभूव आ समन्तादजायतेति को वेदा न कोऽपि। नास्त्येव जगतो जन्म कदाचिदनीदृशं जगदिति बहवो भ्रान्ता भवन्त्यपि। यतः। जनिकर्तुः प्रकृतिः। (पा. १. ४. ३०) इत्यपादानसंज्ञायां पञ्चम्यास्तसिल्। यस्मात्परमात्मन उपादानभूतादाबभूव तं परमात्मानं को वेद। न कोऽपि। प्रकृतितः परमाणुभ्यो वा जगज्जन्मेति हि बहवो भ्रान्ताः। यथा स एवोपादानभूतः परमात्मा स्वयमेव निमित्तभूतोऽपि सन् यदि वा दधे विदध इदं जगत्ससर्ज यदि वा न ससर्ज। असन्दिग्धे सन्दिग्धवचनमेतच्छास्त्राणि चेत्प्रमाणं स्युरिति यथा। स एव विदधे। तं को वेद। अजानन्तोऽपि बहवो जडात्प्रधानादकर्तृकमेवेदं जगत्स्वयमजायतेति विपरीतं प्रतिपन्ना विदधतो विधानमजानन्तोऽपि। स एवोपादानभूत इत्यपि को वेद। न कोऽपि उपादानादन्यस्तटस्थ एवेश्वरो विदध इति हि बहवः प्रतिपन्ना। देवा अपि यन्न जानन्ति तदर्वाचीनानामेषां तत्परिज्ञाने कैव कथेत्यर्थः। यद्येवं जगत्सृष्टिरत्यन्तदुरवबोधना तर्हि सा प्रमाणपद्धतिमध्यास्त इत्याशङ्क्य तत्सद्भाव ईश्वरो वेदं प्रमाणयति। यो अस्येति। अस्य भूतभौतिकात्मकस्य जगतो योऽध्यक्ष ईश्वरः परम उत्कृष्टे सत्यभूते व्योमन् व्योम्न्याकाश आकाशवन्निर्मले स्वप्रकाशे। यद्वा। अवतेस्तर्पणार्थादन्येभ्योऽपि दृश्यन्त इति मनिन्। नेड्वशि कृतीतीट्प्रतिषेधः। ज्वरत्वरेत्यादिना बकारोपधयोरूट्। सप्तम्या लुक्। न ङिसम्बुद्ध्योरिति न लोपप्रतिषेधः। व्योमनि विशेषेण तृप्ते। निरतिशयानन्दस्वरूप इत्यर्थः। यद्वा अवतिर्गत्यर्थः। व्योमनि विशेषेण गन्तव्ये। देशकालवस्तुभिरपरिच्छिन्न इत्यर्थः। अथवा अवतिर्ज्ञानार्थः। व्योमनि विशेषेण ज्ञातरि विशिष्टज्ञानात्मनि। ईदृशे स्वात्मनि प्रतिष्ठितः। श्रूयते हि सनत्कुमारनारदयोः संवादे। स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि। (छा. उ. ७. २४. १)। इति। ईदृशो यः परमेश्वरः सो अङ्ग। अङ्गेति प्रसिद्धौ। सोऽपि नाम वेद जानाति। यदि वा न वेद न जानाति। को नामान्यो जानीयात्। सर्वज्ञ ईश्वर एव तां सृष्टिं जानीयात् नान्य इत्यर्थः।

❑❑❑

NOTES

UNIT–II

# इकाई–द्वितीय

## मेधाजन्म १.१

## अथर्वसंहिताभाष्ये

तद् एवम् आथर्वणमन्त्राणां सिञ्चमन्त्रत्वेन अपरिमितवीर्यत्वप्रदर्शनार्थम् आदिमसूक्तस्य विस्तरतः सर्वेषु कर्मषु उपलक्षणत्वेन सूत्रकृता विनियोगोभ्यधायि। ततः सर्वेषां मन्त्राणाम् अभिलषितसर्वफलसाधनत्वं प्रत्येतव्यम्।। ननु मन्त्राणाम् अनुष्ठेयार्थप्रकाशकत्वस्य ''तदर्थशास्त्रात्'' (जै. १. २. ३९) इत्यधिकरणेन स्थापितत्वात् तत्तल्लिङ्गानुसारेण विनियोगो वक्तव्यः। इतरथा अग्निना सिञ्चेदितिवत् असमर्थविधानं प्रसज्येत। नायं दोषः। ऐन्द्र्या गार्हपत्यम् उपतिष्ठते इतिवद् वलीयस्या श्रुत्या लिङ्गं वाधित्वा गुणकल्पनयापि विनियोगसंभवात्। तत्र हि ऐन्द्रमन्त्रे इन्द्रशब्दस्य गौणीं वृत्तिम् आश्रित्य गार्हपत्योपस्थाने विनियोगः कृतः। एवम् अत्रापि गोपथब्राह्मणश्रुत्वा उदीरितनिखिलकर्मसु विनियोगः कृत इति तत्तत्क्रमानुसारेण मन्त्रलिङ्गानां गौण्यादिवृत्त्याश्रयेण विनियोज्यार्थपरता वोद्धव्या।।

### तत्र प्रथमा।।

**ॐ ये त्रिषप्ताः परियन्ति विश्वा रूपाणि विभ्रतः।**
**वाचस्पतिर्वला तेषां तन्वोऽ अद्य दधातु मे।। १।।**

ये। त्रिऽसप्ताः। परिऽयन्ति। विश्वा। रूपाणि। विभ्रतः।

वाचः। पतिः। वला। तेषाम् तन्वऽः। अद्य। दधातु। मे।। १।।

NOTES

यच्छब्दोत्र प्रसिद्धार्थवाची। ''सर्वनाम प्रसिद्धार्थं प्रसाध्यार्थविघातकृत्'' इति न्यायात्। ये लोकवेदप्रसिद्धाः त्रिसप्ताः। त्रयो वा सप्त वा भा-वाः। ⌛संख्ययाव्ययासन्नादूराधिकसंख्याः। संख्येये इति अन्यपदार्थे बहुव्रीहिः। अन्यपदार्थश्च अत्र वार्थः। स च विकल्पः संशयो वा संभवति। अत्र तु विकल्प एव विवक्षितः। बहुव्रीहौ संख्येये डजबहुगणात् इति डच् समासांन्तः। तस्य सतिशिष्टत्वात् सति शिष्टस्वरो वलीयान् इति न्यायेन बहुव्रीहिस्वरं वाधित्वा चितः इति अन्तोदात्तात्वम्⌛। तद् अयम् अर्थः। पृथिव्यादयस्त्रयो लोकाः। तेपाम् अधिष्ठातारः अग्निवाय्वादित्याः। सत्त्वरजस्तमोगुणाः। ब्रह्मविष्णुमहेश्वराः इत्येवमाद्यास्त्रिसंख्याकान्ता ये सन्ति ते सर्वे अत्र त्रिशब्देन विवक्षिताः। तथा सप्त ऋषयः। सप्त ग्रहाः। सप्त मरुद्गणाः। सप्त लोकाः सप्त च्छन्दांसि इत्याद्या ये सप्तसंख्याक्रान्ताः सन्ति ते सर्वे अत्र सप्तशब्देन अभिमताः। त्रिसंख्याक्रान्ताः सप्तसंख्याक्रान्ता वा इति यावत्।। यद्वा। त्रिः सप्त त्रिसप्ताः। ⌛पूर्ववद् बहुव्रीहिः अत्र सुजर्थः अन्यपदार्थः। स च क्रियाभ्यावृत्यात्मकः⌛। त्रिरावृत्तसप्तसंख्यायुक्ता इत्यर्थः। ⌛ अत्र समासेनैव सुजर्थस्य अभिहितत्वात् संख्यावाचिनस्त्रिशब्दस्यैव समासः न तु सुजन्तस्य इति सुचः श्रवणाभावः। तद् उक्तं वार्तिककृता सुजभावोभिहितार्थत्वात् समासे इति⌛। ते चैवं द्रष्टव्याः प्रसिद्धसूर्याधिष्ठितप्राचीदिग्व्यतिरिक्ता आरोगादिभिः सप्तभिः सूर्यैरधिष्ठिताः सप्त दिशः। ते च आरोगादयस्तैत्तिरीयै राम्तायन्ते। ''आरोगो भ्राजः पटरः पतङ्गः स्वर्णरो ज्योतिषीमान् विभासः'' (तै. आ. १. ७. १) इति। होतृप्रभृतयो वषट्कर्तारः सप्त ऋत्विजः। ''मित्रश्च वरुणश्च। धाता चार्यमा च। अंशश्च भगश्च। इन्द्रश्च विवस्वांश्चेत्येते'' (ते. आ. १. १३. ३) इति श्रुत्यन्तरप्रसिद्धा विवस्वद्यति- रिक्ताः सप्तआदित्या इति। तथा च मन्त्रवर्णः। ''सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः। देवा आदित्या ये सप्त'' (ऋ. ९. ११४. ३.) इति। यद्वा। सप्त सिन्धवः सप्त लोकाः सप्त दिशः इत्येवं त्रिसप्ताः। श्रयूते हि। ''यः सप्त सिन्धून् अदधात् पृथिव्याम्। यः सप्त लोकान् अकृणोद् दिशश्च'' (तै. व्रा. २. ९. ३. ९) इति। सप्त ग्रहाः सप्त ऋषयः सप्त मरुद्गणा इति वा त्रिसप्ताः।। अथ वा त्रिगुणिता सप्तसंख्या येष्विति बहुव्रीहिः। एकविंशतिसंख्याका इत्यर्थः। ते च ''द्वादश मासाः पंचर्तवस्त्रय इमे लोका असावादित्य एकविंशः'' (तै. सं. ७. ३. १०. ५) इति प्रसिद्धाः परिगृह्यन्ते। यद्वा शरीरारम्भकाणि पञ्च महाभूतानि पञ्च प्राणाः पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि अन्तःकरणं चेति। एवम् एकविंशतिसंख्याकाः प्रत्येतव्याः। एवम् उक्तलक्षणास्त्रिसप्तसंख्या ये देवाः परियन्ति। प्रतिदिनं

NOTES

प्रतिवत्सरं प्रतिकल्पं प्रतिशरीरं यथोचितं पर्यावर्तन्ते। ⌛परिपूर्वात् इण् गतौ इत्यस्माल्लटि अदादित्वात् शपो लुक्। इणो यण् इति यणादेशः। यद्वृत्तान्नित्यम् इति निधातप्रतिषेधः। उदात्तवता तिङागतेः समासवचनम् इति परिशब्दस्य तिङन्तेन समासः। तिङि चोदात्तवति इति गतेरनुदात्तत्वम्⌛। किं कुर्वाणाः। विश्वा विश्वानि सर्वाणि रूपाणि प्रतिनियताकारान् जगदनुग्रहार्थं विभ्रतः धारयन्तः। यद्वा रूप्यन्त इति रूपाणि चेतनाचेतनात्मकानि वस्तूनि विभ्रतः अभिमतफलप्रदानेन पोपयन्तः। ⌛विश्वेति। शेश्छन्दसि बहुलम् इति शेर्लोपे प्रत्ययलक्षणेन नुमि उपधादीर्घत्वे न लोपः प्रातिपदिकान्तस्य इति नलोपः। विश्वशब्दः अशूप्रुपिलटिकणिखटिविशिभ्यः क्वन् (उ. १. १४९) इति क्वन्प्रत्ययान्तात्वात् ञ्नित्यादिर्नित्यम् इत्याद्युदात्तः। विभ्रत इति। डुभृञ् धारणपोषणयोः इत्यस्माल्लटः शत्रादेशः। शपः श्लुः। भृञामित् इत्यभ्यासस्य इत्त्वम्। उगिदत्त्वां सर्वनामस्थानेऽधातोः इति प्राप्तस्य नुमो नाभ्यस्ताच्छतुः इति प्रतिषेधः। प्रत्ययस्वरेण शतुरुदात्तत्वे प्राप्ते अभ्यस्तानामादिः इति अभ्यस्तस्य आद्युदात्तत्वम्⌛। वाचस्पतिः वाचः वेदात्मिकायाः पतिः पालकः स्वामी। निसर्गसिद्धत्वेन नित्यानामपि वेदानां प्रथमतस्तन्मुखाद् अभिव्यक्तेस्तस्य स्वामित्वव्यपदेशः। पदद्वयमपि परस्परसापेक्षतया एकार्थतावृत्तित्वान्निरूढत्वाश्ञ्च ब्रह्मणः संज्ञा। ⌛सावेकाच इति वाच उत्तरस्या विभक्तेरुदात्तत्वम्। पठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वम्⌛। तेषां प्रागुदीरितानां त्रिसप्तानां देवानां वला वलानि। ⌛पूर्ववत् शेश्छन्दसि बहुलम् इति शेर्लोपः⌛। तत्तदसाधारणसामर्थ्यानि श्रुतधारणादीनि मे मम मेधादिफलार्थिनः। ⌛तेमयावेकवचनस्य इति अस्मच्छव्दस्य पठ्येकवचनान्तस्य मेआदेशः। अनुदात्तं सर्वमपादादौ इत्यधिकारात् सर्वानुदात्तत्वम्⌛। तन्वः तन्वाः शरीरस्य। ⌛अनित्यम् आगमशासनम् इति आडभावः⌛। अद्य इदानीं मेधाजननादिकर्मकाले दधातु विदधातु करोतु। ⌛डुधाञ् धारणपोषणयोः। अस्माल्लोटि जुहोत्यादित्वात् शपःश्लुः। श्लौ इति द्विर्वचनम्। तिपः पित्त्वेन सार्वधातुकमपित् इति ङित्त्वस्याभावात् श्नाभ्यस्तयोरातः इति आल्लोपस्याभावः। तिङतिङः इति निघातः⌛। अत्र वलाधानरूपाभिमतफलप्रदातृत्वं वाचस्पतिकर्तृकम् अवगभ्यते। तद् अयुक्तम् देवताया विग्रहाद्यभावेन फलदातृत्वायोगात्। लोके हि विग्रहादिमत एव सेवितराजादेः फलप्रदातृत्वं दृश्यते। नायं दोषः। देवताया विग्रहाद्यभावेन फलदातृत्वासंभवेपि तदुद्देशेन क्रियमाणयागहोमादिजनितापूर्वस्यैव फलप्रदातृत्वाङ्गीकारात्। तथा च नवमे देवताधिकरणे निर्णीतम्। "देवता वा प्रयोजयेदतिथिर्वद्भोजनस्य तदर्थत्वात्" (जै. ९. १. ६) इत्यत्र। तथा हि। "यदाग्नेयोष्टाकपालः" (तै. सं. २. ६. ३. ३) इत्यत्र देवता प्रतीयते।

NOTES

अपूर्वमपि। तत्र प्राकरणिकानाम् अवधातप्रोक्षणादीनां संनिपत्योपकारकाणां प्रयाजादीनाम् आरादुपकारकाणां च अङ्गानां किम् अग्नयादिदेवता प्रयोजिका उत अपूर्वम् इति विशेय देवतैय प्रयोजिकेति तावत् प्राप्तम्। कुतः। यागेन तोषिताया देवतायाः फलप्रदत्वात्। संभवति हि तस्याः फलमदत्वम्। मन्त्रार्थवादादिभ्यो विग्रहादिपञ्चकावगगात्। विग्रहः हविःस्वीकारः तद्भोजनम् तृप्तिः प्रसादस्च इत्येतत् चेतनस्योचितं पञ्चकम्। "सहस्रोक्षो गोत्रभिद्वज्रवाहुः" (तै. सं. २. ३. १४. ४.) इति विग्रहः। "अग्निरिदं हविरजुषत" (तै. ब्रा. ३. ४. १०. २) इति हविःस्वीकारः। "अद्धीदिन्द्र प्रस्थितेमा हवींषि" (ऋ. १०. ११६. ९.) इति हविर्भोजनम्। "तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति" (तै. सं. २. ५. ४. ३) इति तृप्तिप्रसादौ। ततः सेवितराजादिवत् पूजितदेवतायाः फलप्रदत्वेन प्राधान्यात् सैव धर्माणां प्रयोजिका। तथा सति विकृतिषु सौर्यादिषु प्राकृतानाम् अन्यादीनाम् अभावात् तत्संवद्धा धर्मा एव तावत् नातिदिश्यन्ते कुतस्तत्र ऊहस्य प्राप्तिरिति प्राप्ते अभिधीयते। किं देवतायाः फलप्रदातृत्वेन प्राधान्यं **शब्दाद् आपाद्यते वस्तुसामर्थ्याद् वा। नाद्यः। ''स्वर्गकामो यजेत'' इत्यत्र यजेतेति शब्देन विधेयस्य यागस्य फलप्रदत्वावगमात्। द्रव्यदेवते तु सिद्धत्वेन विध्यनर्हे। तत्र यथा द्रव्यस्य विधेयं प्रति प्रति गुणत्वम् तथा देवताया अपि। यदा यागस्य कालान्तरभावि फलं प्रति व्यवहितत्वम् तदा तत्साधानभूता देवता ततोपि व्यवहिता।** का तर्हि फलस्य गतिः। **अपूर्वम् इति वदामः। तञ्च श्रुत्या श्रुतार्थापत्त्या वा** प्रतीयमानत्वात् शाब्दम् इति तस्य फलप्रदत्वम् उचितम्।। **नापि** वस्तुसामर्थ्याद् **देवस्य फलप्रदत्त्वम्। विग्रहादिपञ्चक**–प्रतिपादकयोर्मन्त्रार्थवादयोः स्वार्थे तात्पर्याभावात्। अन्यथा। **''वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहा''** (तै. सं. ७. ३. २०) इत्यादिमन्त्रेप्वपि देवत्वं विग्रहादियुक्त्वं (च) कल्प्येत। तञ्च प्रत्यक्षविरुद्धम्। अतो न राजादिवत् फलप्रदत्वम्। किं च। **विग्रहादिमद्देवतावाद्यपि न विना कर्मणा फलम् अभ्युपगच्छति।** ततः प्राप्ताप्राप्तविवेकेन उभयवादिसिद्धस्य **यागस्यैव फलप्रदत्वम्** अस्तु। किं च **मातापितृगुर्वादिशुश्रूषायाः विनापि देवतां फलप्रदत्वम्** उभयवादिसिद्धम्। तस्मात् फलप्रदम् अपूर्वमेव धर्माणां प्रयोजकम्।। तथा सति सौर्यादिषु अग्नयादिदेवताभावेपि अपूर्वप्रयुक्तधर्माणाम् अतिदेशाद् अस्ति तत्र ऊहस्यावकाशः। तद् उक्तम्। ...................... एवं प्रकृतेपि एतत्सूक्तानुष्ठेयाज्यसमिद्धोमादिजनितापूर्वस्यैव अभिमतफलसाधनत्वम्। एवं सति ये त्रिषप्ता इत्यस्य करणमन्त्रत्वात् मन्त्राणां च अनुष्ठेयार्थप्रकाशकात्वात् फलप्रार्थनाव्यपदेशेन कर्मापेक्षितदेवता प्रकाश्यते इति अविरोधः।। अयं च जैमिनिपक्षोनुक्रान्तः। **वादरायणस्तु**

NOTES

**विरोधे गुणवादः स्याद् अनुवादोवधारिते।**
**भूतार्थवादस्तद्धानाद् अर्थवादस्त्रिधा मतः॥**

इति **प्रमाणान्तराविरुद्धानां मन्त्रार्थवादादीनां स्वार्थेपि** तात्पर्याङ्गीकारेण देवानां विग्रहादिपञ्चकम् अभ्युपगम्य **यागहोमादिक्रियातोषितानां तेषां देवानामेव** अभिमतफलप्रदानकर्तृत्वम् अङ्गीचकार। तथा च वैयासिकं सूत्रम्। ''**फलमत उपपत्तेः**'' (वा. ३. २. ३९) इति। **श्रुतिरपि** आराधितस्य **देवस्यैव फलप्रदातृत्वं दर्शयति।** ''स्त्रीपुंसोर्वा य इह स्थातुम् अपेक्ष्यते (तस्मै) सर्वैश्वर्यं ददाति यत्र कुत्रापि म्रियेत देहान्ते देवः परमं ब्रह्म तारकं व्याचष्टे'' इति (नृ. प. १)। ''एष ह्येव साधु कर्म कारयति तं यम् एभ्यो लोकेभ्य उन्निनीपते एषे ह्येवासाधु कर्म कारयति तं यम् अधो निनीयते'' (कौ. ३. ३. ९) इत्यादि॥

अस्य सूक्तस्य मेधाजनने विनियोगाभिधानात् तस्य च अधीतवेदशास्त्रा-दिधारणसामर्थ्याधानरूपत्वात् वेदानाम् अधिपतिर्ब्रह्मैव तत् कर्तुं शक्नोतीति ब्रह्मप्रार्थनम् अत्र कृतम्। अनेनैवाभिप्रायेण श्रुतिरपि तद्वाचकशब्दान्तरं परिहृत्य वाचस्पतिशब्देन ब्रह्माणां निरदिक्षत्॥

अत्र विहितानि मेधाजननादीनि कर्माणि फलार्थी स्वयमेव यदि अनु- इत्याष्ठमिकं सर्वानुदान्तत्वम्⌛। ईदृश हे ब्रह्मन् **देवेन द्योतनात्मकेन मनसा अन्तःकरणेन। अनुग्रहबुद्ध्येत्यर्थः। सकलेन्द्रियानुग्राहकत्वात् सत्वगुण-परिणामरूपत्वेन** स्वच्छत्वाच **मनसो** द्योतनात्मकत्वम्। **तादृशेन** मनसा **सह संगतः सन् पुनरेहि**। क्रियाभ्यावृत्त्युपलक्षणार्थोयं पुनःशब्दः। **अभिमत फलप्रदानार्थे पुनः पुनर्मत्समीपम् आगच्छेत्यर्थः।** ⌛स्वरादिगणे पुनराद्युदान्तः इति पाठात् पुनःशब्द आद्युदान्तः⌛। अत्र वाचस्पतेरागमनं **फलप्रदानार्थम्।** तञ्च **फलप्रदानं किं वाचस्पतेरेव उत मनसोपीति विचिकित्सायाम् सहभावश्रवणात् मनसोपीति प्राप्तम्। तञ्च अयुक्तम्।** "सहैव दशभिः पुत्रैर्भारं वहति गर्दभी" इतिवत् सहशब्दश्रवणेपि **अप्राधान्याद् मनसः क्रियानन्वयित्वात्। अप्राधान्यं च** ''सहयुक्तेऽप्रधाने'' इति तृतीयाविधानात्। तथा शेषलक्षणे ''त्वष्टारं तूपलक्षयेत् पानात्'' (जै. ३. २. ३४) इत्यधिकरणेपि एवमेवसे निर्णीतम्। तथा हि "अग्ना३इ पत्नीवा ३ः सजूर्देवेन त्वष्ट्रा सोमं पिव स्वाहा" (तै. सं. १. ४. २७) इति पात्नीवतग्रहहोममन्त्रे त्वष्टुः पत्नीवदग्निसहभावश्रवणेन पानक्रियान्वयाद् देवतात्वात् तद्ग्रहशेषभणमन्त्रेपि उपलक्षणीयत्वम् आशङ्कय राद्धान्तितम् त्वष्टुः अप्रधानविभन्तयभिहितत्वेन

NOTES

सहभावमात्रप्रतीतेः पानक्रियान्वयित्वाभावाद् अदेवतात्वाद् भक्षणमन्त्रे नोपलक्षणीयत्वमिति।। **अपि च हे वसोष्पते वासकस्य ग्रामपश्वादिरूपस्य धनस्य स्वामिन्।** ऽअन्तर्भावितण्यथाद् वस निवासे इत्यस्मात् शॄस्वृस्निहित्रप्य-सिवसिहनिक्लिदिबन्धिमनिभ्यश्च (उ. पा. १. १०) इति उप्रत्ययः। अनित्यम् आगमशासनम् इति नुमभावे घेर्ङिति इति गुणे ङसिङसोश्च इति पूर्वरूपता। षष्ठयाः पतिपुत्रेति विसर्जनीयस्य सत्वम्। पूर्ववत् पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य पाष्ठिकम् आद्युदान्तत्वऽ। यद्वा वसोः वासकस्य प्राणस्य पते स्वामिन् प्रजापते **निरमय अभिमतग्रामादिलक्षणफलप्रदानेन** नितराम् अस्मान् क्रीडय। यतस्त्वं वसुपतिः अतस्तव **ग्रामादिवि-विधफलप्रदानशक्तिरस्ति। तस्माद् अस्मदपेक्षितानां** विविधफलानां साकल्येन प्रदानात् निरन्तरं सुखयेत्यर्थः।। अस्मादेवलिङ्गात् ग्रामसांपदादिषु कर्मसु विनियोग उपपन्नः। ऽरमुक्रीडायाम्। अस्मात् हेतुमति णिचि उपधावृद्धौ जनीजॄष्क्नसुरञ्जोमन्ताश्चेति मित्त्वात् मितां ह्रस्वः इत्युपधाह्स्वत्वम्ऽ। **इदानीं** ग्रामादिविविधसंपत्त्या सर्वोत्कृष्टताम् आत्मनः प्रार्थयते। **मय्येवास्तु त्वया दत्तं ग्रामादिकम् अनन्यसाधारण्येन मय्येव वर्तताम्। अन्ययोगव्यवच्छेदार्थोयम् एवकारः।** यत **एवकारस्ततोन्यत्रावधारणम् इति न्यायेन अस्मच्छब्दात् परतो** वर्तमानेन एवकारेण ग्रामादीनां नियम्यमानत्वात्।। **मेधाजननस्य प्राधान्यं दर्शयितुं विप्रपरिव्राजकन्यायेन पार्थक्येन निर्दिशति मयि श्रुतमिति।** श्रुतम् उपाध्यायाद् विधितोधीतं **वेदशास्त्रादिकमपि मय्येव। अस्तु इत्यनुषङ्गः। सम्यगधीतस्यापि वेदादेः प्रायेण विस्मरणसंभवाद्** अधीतस्य धारणार्थं मह्यं मेधां प्रयच्छेत्यर्थः।।

## तृतीया।।

**इहैवाभि वि तनूभे आर्त्नी इव ज्यया।**
**वाचस्पतिर्नि यच्छतु मय्येवास्तु मयि श्रुतम्।। ३।।**

इह। एव। अभि। वि। तनु। उभे इति। आर्त्नी इवेत्यार्त्नीऽइव। ज्यया।
वाचः। पतिः। नि। यच्छतु। मयि। एव। अस्तु। मयि श्रुतम्।। ३।।

**हे वाचस्पते** इहैव अस्मिन्नेव साधके जने। ऽ**इदमो हःइति सप्तम्यर्थे हप्रत्यये इदम इश् इति इशादेशः**ऽ। **उभे** श्रुतधारणलक्षणां मेधां विविधभोगहेतुभूतां ग्रामादिसंपदं च। **अनयोः ऐहिकामुष्मिकफलसाधनेन व्यवस्थितत्वात् कोटिद्वयेन** निर्देशः। **ते उभे अपि फले अभि वि तनु अभितो विस्तीर्णे कुरु। सर्वजनेभ्योपि मय्येव प्रभूते कुर्वित्यर्थः।** ऽ**तनु**

NOTES

**विस्तारे** तनादिकृञ्भ्य उः इति उप्रत्ययः। उतश्च प्रत्ययादसंयोगपूर्वात् इति हेर्लुक्⌛। **तत्र दृष्टान्तः। ज्यया मौर्व्या धनुषि आरोपितया आर्त्नी इव अटन्याविव। ते यथा अभिवितन्येते तथेत्यर्थः। अनेन स्वरसतः अप्राप्तयोरपि वलात् प्रापणम् उक्तम् इति द्रष्टव्यम्। यद्वा इहैव अभि वि तनु। अभिमतं फलम् इति शेषः। उभे आर्त्नी इवेति उभशब्दस्य उत्तरन्न संबन्धः। ⌛ईदूदेद्विवचनमिति प्रगृह्यसंज्ञा। ल्पुतप्रगृह्या अचि इति प्रकृतिभावः। आर्त्नी इवेति।**

इवेन विभन्तयलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् इति समासः⌛। **इदानीं प्राप्तस्य फलस्य स्थैर्यं प्रार्थयते**। ⌛**वाचस्पतिः विधाता नि यच्छतु स्वात्मने दत्तं निखिलं फलं नियमयतु। यथा मां न जहाति तथा स्थिरीकरोतु इत्यर्थः।** ⌛निपूर्वाद् यमेः शपि इषगमियमां छः इति छत्वम्। तिङ्तिङः इति सर्वानुदात्तत्वम्⌛ **अभिमतस्य फलस्य अयोगव्यवच्छेदम् उक्त्वा अन्ययोगव्यवच्छेदम् आह। मय्येवास्तु मयि श्रुतमिति। व्याख्यातमेतत्॥**

## चतुर्थी॥

**उपहूतो वाचस्पतिरुपास्मान् वाचस्पतिर्ह्वयताम्।**
**सं श्रुतेन गमेमहिः। मा श्रुतेन वि। राधिषि॥ ४॥**

उपऽहूतः। वाचः। पतिः। उप। अस्मान्। वाचः। पतिः। ह्वयताम्।
सम्। श्रुतेन गमेमहि। मा। श्रुतेन। वि। राधिषि॥ ४॥

वाचस्पत्तिः वाचः पालयिता देवः उपहूतः समीपम् आहूतः। सत्स्वपि अन्येषु देवेषु असावेव मम अभिलषितफलप्रदातेति अस्माभिः प्रार्थित इत्यर्थः। ⌛उपपूर्वात् ह्वयतेः कर्मणि निष्ठा। वचिस्वपीत्यादिना संप्रसारणम्। गतिरनन्तरः इति गतेः प्रकृतिस्वरत्वम्। उपसर्गाश्चाभिवर्जम् (फि. ४. १३.) इत्युपशब्द आद्युदात्तः⌛। **यतो मयोपहूतः ततो हेतोर्वाचस्पतिः स देवः अस्मान् मेधाजननादिफलकामान् उप ह्वयतां तत्तत् फलं प्रदातु स्वसमीपम् आह्वयतु। यद्वा। तत्त्फलप्राप्तिम् अभ्यनुजानातु।** ⌛उपपूर्वो ह्वयतिः अभ्यनुज्ञानेपि वर्तते। यथा “उपहूत उपह्वयस्व” इति सोमभक्षणानुज्ञानानुज्ञापनमन्त्रो⌛ **तेन उपहूताः सन्तो वयं श्रुतेन विधितोधीतेन वेदशास्त्रादिना सं गमेमहि संगच्छेमहि। वाचस्पतिप्रसादप्राप्तया मेधया कृत्स्त्रं वेदशास्त्रं प्राप्तवामेति भावः।** ⌛व्यवहिताश्च इति समः क्रियापदेन संबन्धः। समोगम्बन्यृच्छीति गमेरात्मनेपदम्। अस्माद् आशीर्लिङि लिङ्याशिप्पङ् इति अङ् प्रत्ययः

शपोपवादः। लिङः सीयुट् इति सीयुट्। छन्दस्युभयथा इति सार्वधातुकसंज्ञायां लिङः सलोपोनन्त्यस्य इति सलोपे गुणे वलि लोपः⌛। **अधीतस्य वेदशास्त्रस्य स्वस्मिन् सर्वदावस्थानं मार्थयते मा श्रुतेनेति। श्रुतेन उक्तलक्षणेन मा विराधिपि विराद्धो वियुक्तो मा भूवम्। सर्वदा वेदशास्त्रादिसहितो भूयासम् इत्यर्थः। ⌛राध साध संसिद्धौ।** अस्मात् माङि लुङि व्यत्ययेन आत्मनेपदम् इडागमश्च⌛।

NOTES

## [ इति ] प्रथमकाण्डे प्रथमेनुवाके प्रथमं सूक्तम्।।

विद्या शरस्येत्याद्यनुवाकशेषस्य उपाकर्मणि जपे विनियोगः। तथा च सूत्रम्। ''अभिजिति शिष्यानुपनीय'' इत्युपाकर्म प्रक्रम्य ''त्रिषप्तीयं पच्छो वाचयेच्छेषमनुवाकस्य जपन्ति'' इति (कौ. १४. ३)। तत्र विद्या शरस्येति प्रथमेन सूक्तेन तस्मिन्नेव उपाकर्मणि आज्यहोमः। कर्तव्यः। अपराजितगणे अस्य पठितत्वात् ''अभयैरपराजितैराज्यं जुहुयात्'' (कौ. १४. ३) इत्यादिषु विनियोगः।

एतेनैव संग्रामजयकर्माणि कुर्यात्। तानि च। आज्यहोमः सक्तुहोमः। धनुरिध्मेग्नौ धनुःसमिदाधानम् शरेध्मे शरसमिदाधानम् संपातिताभिमन्त्रितधनुःप्रदानं च प्रत्येतव्यानि। एतेषु कर्मस्वनुष्ठितेषु संग्रामे दृष्टमात्रेण शत्रवः पलायन्ते। तद् उक्तं संहिताविधौ। "विद्या शरस्य (१. २.) मा नो विदन्" (१. १९) अदारसृत् (१. २०) स्वस्तिदाः (१. २१) अव मन्युः (६. ६५) ''निर्हस्तः (६. ६६) परि वर्त्मानि (६. ६७) अभिभूः (६. ९७.) इन्द्रो "जयाति।" (६. ९६) अभि त्वेन्द्र (६.९९) इति सांग्रामिकाणि। आज्यसक्तून् ''जुहोति'' इत्यादि (कौ. २. ४)। अयमेव अपराजितगण इत्युच्यते। तथा अनेनैव सूक्तेन संपातयुक्ताभिमन्त्रितद्रुघ्न्यार्त्नीज्यापाशबन्धनं तद्वद्दूर्वादितृणवन्धनं च इषुनिवारण्कामः कुर्यात्। सूत्रितं हि। "प्रथमस्येषुपर्ययणानि" इत्यादि (कौ. २. ४)।।

तथा ज्वरातिसारातिमूत्रनाडीव्रणेषु तदुपशमनकामस्य अनेनैव सूक्तेन मुखशिरोनिर्मितरज्जुबन्धनम् क्षेत्रमृत्तिकाया वल्मीकमृत्तिकाया वा पायनम् सर्पिर्लेपनम् चर्मखल्वामुखेन अपानशिश्ननाडीव्रणमुखानां धमनं च कार्यम्। आह च सूत्रकारः। ''विद्या शरस्य (१. २) अदो यद् (२. ३) इति मुञ्जशिरोरज्ज्वा वन्धाति'' इत्यादि "धमति" इत्यन्तम् (कौ. ४. १.)।। ''अपराजितां विजयकामस्य'' इति (न. क. १७) विहितायाम् अपराजिताख्यायां महाशान्तावपि अस्य विनियोगः। तद् उक्तं नक्षत्रकल्पे। "अपराजितगणोपराजितायाम्" इति (न. क. १७.)।।

NOTES

**पुष्याभिषेकेपि एतत् सूक्तम्। तद् उक्तं परिशिष्टे।**
**शर्मवर्मगणश्चैव तथा स्याद् अपराजितः।**
**आयुष्यश्चाभयश्चैव तथा स्वस्त्ययनो गणः।**
**एतान् पञ्च गणान् हुत्वा। इति [ प. ४. ४ ]॥**

## तत्र प्रथमा॥

**विद्मा शरस्य पितरं पर्जन्यं भूरिधायसम्।**
**विद्मो ष्वस्य मातरं पृथिवीं भूरिवर्पसम्॥ १॥**

**विद्म। शरस्य। पितरम्। पर्जन्यम्। भूरिऽधायसम्।**
**विद्मोइति। सु। अस्य। मातरम्। पृथिवीम्। भूरिऽवर्पसम्॥ १॥**

संग्रामजये शरस्यैव मुख्यसाधनत्वेन प्रसिद्धत्वात् तज्जयसामर्थ्यं विशिष्टकारणजन्यत्वेन उपपादयति। शरस्य हिंसकस्य बाणस्य शत्रुजयार्थं धनुषि संधीयमानस्य पितरम् उत्पादकं विद्मा जानीमः। ⌛विद ज्ञाने अस्मात् लटि विदो लटो वा इति मतो मादेशः। अदादित्वात् शपो लुक्। प्रत्ययस्वरेण अन्तोदात्तत्वम्। तिङतिङः इत्यत्र अनुदात्तं सर्वमपादादौ इत्यधिकारात् अस्य च पादादित्वात् निघाताभावः। व्यचोतस्तिङः। इति सांहितिको दीर्घः⌛। किंसंज्ञकोयं पिता इत्याह पर्जन्यमिति। तर्पयिता चासौ जन्यश्चेति पर्जन्यः। ⌛तृपेर्विचि आद्यन्तयोर्वर्णयोर्विपर्ययः। ⌛जनेभ्यो हितो जन्यः। कालेकाले प्रवर्षणेन तर्पयिता सन् जनानां हितकारी भवतीत्यर्थः। यद्वा काले प्रवर्षणार्थे रसान् मार्जयतीति पर्जन्यः। ⌛तथा च यास्कः। पर्जन्यस्तृपेराद्यन्तविपरीतस्य तर्पयिता जन्यः प्रार्जयिता वा रसानाम् इति (नि. १०. १०.)⌛। तस्य सर्वस्माद् अतिशयम् आह। भूरिधायसं भूरि बहुलं दधाति प्रवर्पणेन कृत्स्नं जगत् पोपयतीति भूरिधायाः। यद्वा। भूरीणि स्थावरजङ्गमात्मकानि वस्तूनि यथोचितकाले वृष्ठिप्रदानेन दधाति धारयतीति भूरिधायाः। कारणस्य अतिशयितवीर्यत्वप्रतिपादनेन तज्जन्यस्यापि शरस्य अमोघवीर्यत्वम् उक्तं वेदितव्यम्। ⌛डुधाञ् धारणपोपणयोः वहिहाधाञ्भ्यश्छन्दसि। (उ. ४. २२०) इति कर्तरि असुन्। तत्र णिदित्यनुवृत्तेः आतो युक् चिण्कृतोः इति युक्। असुनो नित्त्वात् तदन्तस्य आद्युदात्तत्वम्। समासेपि गतिकारकोपपदात्कृत् इति कुदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते असुनि गतिकारकयोरपि पूर्व (पद) प्रकृतिस्वत्वं च (उ. ४. २२६) इति स्मरणात् पूर्वपदप्रकृतिस्वरत्वम्। तञ्च अदिशदिभूशुभिभ्यः किन् (उ. ४. ६४) इति भूरिशब्दस्य क्रिन्प्रत्ययान्तत्वात् ञ्नित्यादिर्नित्यम् इति आद्युदात्तत्वम्⌛। तथा अस्य शरस्य मातरं जननीम् सु सुष्ठु विद्मो। उशब्दः एवकारार्थे। विद्मैव

तदसाधारणरूपं जानीम एव। ताम् आह। पृथिवीं प्रथितां विस्तीर्णां भूमिम्। श्रूयते हि। ''तत् पुष्करपर्णेऽप्रथयत्। यद् अप्रथयत् तत् पृथिव्यै पृथिवित्वम्'' (तै. ब्रा. १. १. ३. ७) इति। ⧗प्रथ विस्तारे। अस्मात् प्रथेः षिवन् संप्रसारणं च (उ. १. १८९) इति पिवन् प्रत्ययः। तत्संनियोगेन रेफस्य संप्रसारणम्। पिङ्गौरादिभ्यश्च इति ङीप्। प्रत्ययस्वरेण अन्तोदात्तत्वम्⧗।। तां विशिनष्टि। भूरिवर्पसं भूरीणि बहुविधानि वर्षोसि। रूपनामैतत्। रूपाणि चराचरात्मकानि यस्यां सा तथोक्ता। जनन्याः सर्वरूपोपादानत्वात् कारणगुणानां कार्ये अनुगमदर्शनात् तञ्जन्यः शरोपि नानाकारः सन् साधकाभिमतं फलं साधयितुं शक्नोतीत्यर्थः। ⧗वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुक्च (उ. ४. २००) इति वृङोऽसुन् प्रत्ययः तत्संनियोगेन पुगागमश्च। बहुव्रीहौ प्रकृत्या पूर्वपदम् इति प्रकृतिस्वरत्वम्⧗।

ननु अत्र शरादिशब्दानाम् अनित्यवाणाद्यर्थविशेषवाचकता प्रतीयते। ततेश्च अस्य अर्थविशेषस्य अयं वाचकः शब्द इति पदार्थोत्पत्तिसमनन्तरं तद्वाचकं शब्दं निश्चित्य अनन्तरं पदस्य प्रयोक्तव्यत्वाद् वेदस्य पौरुषेयत्येन अप्रामाण्यम् अनित्यत्वं च प्राप्नोतीति।। नायं दोषः। शब्दानाम् अनित्यार्थवाचकत्वानभ्युपगमात्। तर्हि कोसौ वाच्योर्थः।। आकृतिरिति वदामः। यद् असूत्रयात् जैमिनिः। ''आकृतिस्तु क्रियार्थत्वात्'' (जै. १. ३. ३३) इति। तथा हि व्रीहीन अवहन्ति पशुम् आलभेत गाम् आनय ब्राह्मणो न हन्तव्यः इत्यादिप्रयोगेषु किं व्यक्तिः शब्दार्थः उत आकृतिरिति। व्यक्तिरिति तावत् प्राप्तम्। कुतः। अवहननादिक्रियाभिः व्यक्तेरन्वेतुं योग्यत्वात्। न हि आकृतिः अवहन्तुम् आलब्धुम् आनेतुम् हन्तुं वा योग्या। ननु आनन्त्यव्यभिचाराभ्यां न व्यक्तौ व्युत्पत्तिः संभवति। अनन्ता हि गोव्यक्तयः। अतीतानागतानाम् अनेकदेशवर्तिनां गवाम् इयत्ताया अभावात्। किं च शुक्लव्यक्तौ व्युत्पन्नो गोशब्दः कृष्णव्यक्तौ प्रयुज्यमानः स्वार्थे व्यभिचरेत् तत्र कथं व्युत्पत्तिरिति चेत्। एवं तर्हि व्युत्पत्तिकाले सा व्यक्तिः आकृत्या उपलक्ष्यताम् इति प्राप्ते।

ब्रूमः। अन्वयव्यतिरेकाभ्यान् आकृतेः शक्तिग्रहणनिमित्तत्वात् शब्दार्थत्वं तस्या एवोचितम्। किं च गोशब्दे उच्चरिते व्यक्तिवादिनः संशयो भवेत्। तस्माद् आकृतेरेव अभिधेयत्वम्। यदि आकृतौ अवहननादिक्रिया न पर्यवस्येत् तर्हि व्यक्तिस्तत्रोपलक्षणीया। किं च ''श्येनचितं चिन्वीत'' (तै. सं. ५. ४. ११. १) इत्यादौ आकृतेरेव सादृश्यप्रतियोगितया कार्यान्वयो दृश्यते। तस्माद् आकृतिः शब्दार्थः।। एवं प्रकृतेपि शरादिशब्दानां नित्य एव आकृतिलक्षणोर्थो वाच्यः। ततः शब्दार्थतत्संवन्धानां नित्यत्वेन अपौरुषेयत्वात् पुरुषबुद्धिप्रभवदोपानुप्रवेशाभावेन वेदानां स्वतःसिद्धं प्रामाण्यं पुरुषप्रयत्नानिर्वर्त्यत्वेन नित्यत्वं चेति।।

NOTES

## द्वितीया।।

**ज्याके परि णो नमाश्मानं तन्वं कृधि।**
**वीडुर्वरीयोरातीरप द्वेपांस्या कृधि।। २।।**

**ज्याके। परि। नः। नम। अश्मानम्। तन्वम्। कृधि।**
**वीडुः। वरीयः। अरातीः। अप। द्वेपांसि। आ। कृधि।। २।।**

हे ज्याके। कुत्सिता ज्या ज्याका। ⧗कुत्सिते इति कुत्सायां कप्रत्ययः⧗। स्वस्य उपद्रवहेतुत्वात् ज्यां कुत्सितत्वेन निर्दिशति। यद्वा अज्ञाता ज्या ज्याका। ⧗अज्ञातार्थे कप्रत्ययः⧗। शत्रुहस्तगतत्वेन तस्या अज्ञातत्वम्⧗। आमन्त्रितस्य च इति पाष्ठिकम् आद्युदात्तत्त्वम्⧗। हे ईदृशि मौर्वि: नः अस्मान् परि णम परिहृत्य प्रह्वीभव। आज्यसक्तुहोमादिभि: इन्द्रप्रसादविशिष्टे मयि त्वदीयस्य शरसंधानार्थे नमनस्य निष्फलत्वात् मां विहाय अन्यत्र शरं प्रेरयेत्यर्थः।। अस्य सूक्तस्य इन्द्रदेवताकत्वात् जयकर्मण: इन्द्रायत्तत्वाञ्च अत्र अश्रुतोपि इन्द्र एव संबोध्यः। हे इन्द्र तन्वं तनुम्। ⧗तन्वादीनां छन्दसि बहुलम् इति यण्। उदात्तस्वरितयोर्यण: स्वरितोनुदात्तस्य इति विभक्ते: स्वरितत्वम्⧗। अस्माकं शरीरम् अश्मानम् अश्मवदृढावयवं शस्त्रामेद्यं कृधि कुरु।।

यद्यपि अत्र सामानाधिकरण्येन शरीरस्य अश्मकरणप्रार्थना प्रतीयते तथापि पाट्कौशिकस्य शरीरस्य अत्यन्तविरुद्धपाषाणात्मकत्वानुपपत्त्या "यजमान: प्रस्तर:" (ऐ. ब्रा. २. ३) इतिवत् तत्संवद्धगुणलक्षणा आश्रीयते। तथाहि ''यजमान: प्रस्तर:'' इत्यस्मिन् वाक्ये उद्भिदा यागेन इतिवत् सामानाधिकरण्याद् अन्यतरस्य अन्यत् नाम इत्येक: पूर्व: पक्ष:। गुणविधिरेप इत्यपर:। तत्रापि यजमानकार्ये जपादौ प्रस्तरस्य अचेतनस्य सामर्थ्याभावात् प्रस्तरकार्ये तु स्रुग्धारणादौ यजमानस्य शक्तवात् यजमानरूपो गुणो विधीयते। एवं सति पश्चाच्छ्रुतस्य प्रस्तरशब्दस्य कार्यलक्षकत्वेपि प्रथमश्रुतो यजमानशब्दो मुख्यवृत्तिर्भविष्यति। न चात्र "पूर्वन्तो विधानार्थास्तत्सामर्थ्ये समाम्नाये" (जे. १. ४. १७) इति द्वादशकपालन्यायेन स्तुति: संभवति। अष्टाकपालद्वा- दशकपालयोरिव प्रस्तरयजमानयो: अंशांशित्वानुपपत्ते:। तस्मात् नामगुणयोरन्यतरत्वम् इति प्राप्ते अभिधीयते। उद्भिदादिशब्दानां हि अप्रसिद्धार्थत्वाद् यजिसामानाधिकरण्येन नामत्वं निर्णीतम्। अत्र तु गोमहिपयोरिव यजमानप्रस्तरशब्दयो: अर्थभेदस्य अत्यन्तप्रसिद्धत्वात् नामत्वं न युक्तम्। गुणविधिपक्षे तु सूक्तवाकेन प्रस्तरं प्रहरति इत्यग्नौ प्रहरणस्यापि प्रस्तरकार्यत्वाद् यजमाने प्रहृते सति कर्मलोप: स्यात्। तस्माद् विधेय: प्रस्तरो यजमानशब्देन स्तूयते। यथा सिंहो देवदत्त इत्यत्र

सिंहगुणेन शौर्यादिना उपेतो देवदत्तः सिंहशब्देन स्तूयते तथा यजमानः प्रस्तर इत्यत्रापि यजमानगुणेन यागसाधकत्वेन युक्तः प्रस्तरो यजमानशब्देन लक्षणया प्रतिपाद्यते। एवं प्रकृते अश्मशब्दोपि स्वार्थसहचरितान् दृढावयवत्वशस्त्राभेद्यत्वा-दिगुणन् लक्षयित्वा प्रार्थ्यमानतद्गुणयोगिनि शरीरे वर्तत इति वोद्धव्यम्।।

मयि त्वदीयं निरवधिकम् अनुग्रहम् अजानानः शत्रुर्माम् उद्दिश्य यद्यपि शरं प्रहिणुयात् तथापि स शरः अस्मच्छरीरं यथा न विदारयति तथा कुर्वित्यर्थः। ⌛डुकृञ् करणे। अस्माल्लोटि बहुलं छन्दसीति विकरणस्य लुक्। श्रुशृणुपॄकृवृभ्यश्छन्दसि इति हेर्धिरादेशः। तस्य अपित्त्वेन गुणाभावः⌛। किंच हे इन्द्र वीलुः सेनायाः संस्तम्भकस्त्वम्। ⌛वीलयतिश्च व्रीलयतिश्च संस्तम्भकर्माणौ इति हि यास्कः (नि. ५. १६)⌛। आरातीः अरातीन् अस्मच्छत्रून् द्वेपांसि। ⌛द्विप अप्रीतौ। भावे असुन्⌛। तत्कृतान्यप्रियाणि च वरीयः। क्रियाविशेषणम् एतत्। उरुतरम् अपा कृधि अपाकुरु अपगमय। यथा पुनः पुनरागत्य अस्मान् नापकुर्वन्ति तथा प्रक्षीणवलान् कुर्वित्यर्थः। ⌛वरीय इति। उरुशब्दाद् ईयसुनि प्रियस्थिरेत्यादिना उरुशब्दस्य वरादेशः क्रियाविशेषणानां कर्मत्वं नपुंसकत्वं चेति नपुंसकलिङ्गता। अरातीरिति। रादाने। क्तिच्क्तौ च संज्ञायाम् इति तिक्तप्रत्ययः। न रातयः अरातयः। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। तस्माच्छसो नः पुंसि इति नत्वाभावश्छान्दसः⌛।।

## तृतीया।।

**वृक्षं यद्गावः परिपस्वजाना अनुस्फुरं शरमर्चन्त्यृभुम्।**
**शरुमस्मद्यावय दिद्युमिन्द्र।। ३।।**

वृक्षम्। यत्। गावः। परिऽसस्वजानाः। अनुऽस्फुरम्। शरम्। अर्चन्ति ऋभुम्।
शरुम्। अस्मत्। यवय। दिद्युम्। इन्द्र।।३।।

वृक्षम्। विकारे प्रकृतिशब्दः। वृक्षविकारं धनुर्दण्डम्। ⌛वृश्चयत इति वृक्षः। ओवश्चू छेदने इत्यस्मात् व्रश्चिकृतीत्यादिना (३. ३. ६६) क्सप्रत्ययः कित्त्वात् ग्रहिज्यादिना संप्रसारणम्। स्कोः संयोगाद्योरिति उपधासकारलोपः। वश्चभ्रस्जेत्यादिना पत्वे पढोः कः सि इति कत्वम्⌛। गावः। गोविकारत्वाद् वा गमयति इपूनिति वा गावो मौर्व्यः। ⌛आद्ये तद्धितस्य लुक्। तद् उक्तं यास्केन। ज्यापि गौरुच्यते गव्या चेत् ताद्धितम् अथ चेन्न गव्या गमयतीपूनिति। वृक्षेवृक्षे नियता मीमयद्गौः। वृक्षेवृक्षे धनुषिधनुषीति (नि. २.६.)। ⌛परिषस्वजानां धनुर्दण्डम् आश्लिप्य धनुष्कोटौ आरोपिताः सत्य इत्यर्थः। ⌛प्वञ्च परिप्वङ्गे।



NOTES

NOTES

अस्मात् छन्दसि लिट् इति लिट्। लिटः कानज्वा इति कानजादेशः। उपधानकारलोपे द्विर्वचनम्। चितः इत्यन्तोदात्तत्वम्⧗। अत्र परिष्वङ्गकथनेन स्त्रीपुंसयोरिव ज्याधनुर्दण्डयोरपि अन्योन्यसंसक्तयोरेव यथोचितकार्यकरत्वं सूचितम् इति मन्तव्यम्। ईदृश्यो ज्या यद् यदा अनुस्फुरं प्रतिस्फुरणम्। ⧗स्फुर संचलने। अस्माद् घञर्थे कविधानम्। स्थासागापाव्यधिहनियुध्यर्थम् इति परिगणनस्य उपलक्षणार्थत्वात् कप्रत्ययः⧗। ऋभुम् उरु भासमानम्। शाणोल्लीढत्वात् निशितमित्यर्थः। ईदृशं शरुं हिंसकं शरम् अर्चन्ति। अर्चतिः अत्र गतिकर्मा। अस्मान् अभिलक्ष्य प्रेरयन्ति। ⧗शॄ हिंसायाम्। शॄस्वृस्निहित्रप्यसिवसिहनि-क्लिदिबन्धिमनिभ्यश्च (उ. १. १०) इति उप्रत्ययः⧗। तदा हे इन्द्र अस्माभिर्दत्तेन हविषा प्रीतस्त्वं दिद्युं द्योतमानं शरुं शरम् अस्मन्निकटम् उपसर्पन्तम् अस्मत् अस्मत्तः सकाशात् यावय पृथक् कुरु। यथा स शरो मां न स्पृशति तथा अन्यत्र अपसारयेत्यर्थः।। यद्वा शरुं हिंसकं दिद्युम्। वज्रनामैतत्। वज्रवद्भासमानं शस्त्रजातम्। अन्यत् पूर्ववत्।। ⧗यावयेति। यु मिश्रणामिश्रणयोः। अस्मात् णिचि वृद्धिः। षट्कारास्तु संज्ञापूर्वको विधिरनित्यः इति वृद्धेरनित्यत्वाद् यवयेति पदं छिन्दन्ति। दिद्युमिति। द्युत दीप्तौ। अस्माद् द्युतिगमिजुहोतीनां द्वे चेति वक्तव्यम् इति क्विप् प्रत्ययः। तत्संनियोगेन द्विर्वचनम्। द्युतिस्वाप्योः संप्रसारणम् इति अभ्यासस्य संप्रसारणम्। अन्त्यलोपश्छान्दसः।। इन्द्रेति। इति परमैश्वर्ये। ऋज्रेन्द्राग्रवज्रविप्रेत्यादिना (उ॰ २. २८) इन्द्रशब्दो रन्प्रत्ययान्तो निपातितः। नित्त्वाद् आद्युदात्तत्वे प्राप्ते आमन्त्रितत्वाद् आष्टमिकं सर्वानुदात्तत्वम्। यास्कस्तु बहुधा इन्द्रशब्दं निरवोचत्। इन्द्रं इरां दृणातीति वा इरां ददातीति वा इरां दधातीति वा इरां दारयतीति वा इन्दवे द्रवत इति वा इन्दौ रमत इति वा इन्धे भूतानीति वा तद्यदेनं प्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वमिति विज्ञायते इदंकरणादित्याग्रायणः इदंदर्शनादित्यौपमन्यवः इन्द्रतेर्वा ऐश्वर्यकर्मणः (नि. १०. ७) इत्यादि⧗।। यद्वा वृक्षं बहुच्छायं वटादिकं गावः निदाघपीडिताः पशवः यद् यथा आश्लिष्यन्ति तथा तत्तदुचितजीविकाप्रदानेन उपकारकं शत्रुं परिपस्वजानाः परितः सेवमानाः तदीया भटाः अनुस्फुरं स्वामिनः हस्तनेत्रादिव्यापारमात्रम् अनुलक्ष्य। शरुम् अर्चन्तीत्यादि पूर्ववत्।।

## चतुर्थी।।

**यथा द्यां च पृथिवीं चान्तस्तिष्ठति तेजनम्।**
**एवा रोगं चास्रावं चान्तस्तिष्ठतु मुञ्ज इत्।। ४।।**

यथा। द्याम्। च। पृथिवीम्। च। अन्तः। तिष्ठति। तेजनम्।

NOTES

एव। रोगम्। च। आऽस्त्रावम्। च। अन्तः। तिष्ठतु। मुञ्जः। इत्।। ४।।

यथा येन प्रकारेण द्यां दिवम् आकाशं पृथिवीं भुवम्। परस्परसमुच्चयार्थौ चकारौ। उभयत्रापि व्यत्ययेन द्वितीया। दिवश्च पृथिव्याश्च अन्तः मध्ये अवस्थितं तेजनम् तेजनो वेणुः। ⧗लिङ्गव्यत्ययः। वेणुमस्करतेजना इत्यभिधानात्⧗। तिष्ठति स्वकीयेन औन्नत्येन ते उभे अपि अधःकृत्य वर्तते एव एवम्। ⧗अन्त्यलोपश्छान्दसः। निपातस्य च इति सांहितोको दीर्घः⧗। रोगं रुज्यते भज्यते पुरुषः अनेनेति रोगः ज्वरातीसारादिरूपः। ⧗हलश्च इति करणे घञ्। चजोः कु घिण्ण्यतोः इति कुत्वम्। ञ्नित्यादिर्नित्यम् इत्यादिरुदात्तः⧗। तम् आस्रावम् आ समन्तात् स्त्रवति अङप्रत्यङ्गेभ्य इत्यास्त्रावो मूत्रातीसारः। ⧗स्त्रु गतौ इत्यस्माद् आङ्पूर्वात् श्यावयधास्त्रुसंस्त्रुइत्यादिना णप्रत्ययः। अचो ञ्णिति इति वृद्धिः। पूर्ववत् षठ्यर्थे द्वितीया। अत्रापि परस्परसमुच्चयार्थौ चकारौ⧗। ज्वरातीसारादिरोगस्य आस्त्रावस्य च अन्तः मध्ये मुञ्ज इत् मुञ्ज एव। मुञ्जेषीकानिर्मिता रज्जुरित्यर्थः। तिष्ठतु। तौ उभावपि रोगौ अधःकृत्य वर्ततामित्यर्थः।। यद्यपि अत्र रोगशब्देन व्याधिसामान्यवाचिना आस्त्रावोपि गृहीतः तथापि एतन्मन्त्रसाध्या क्रिया आस्त्रावस्य विशेषतो निवर्तिकेति दर्शयितुम् आस्त्रावस्य पृथगभिधानम्।।

[इति] प्रथमकाण्डे प्रथमेनुवाके द्वितीयं सूक्तम्।।

विद्या शरस्येति तृतीयसूक्तेन मूत्रपुरीपनिरोधे प्रमेहणसाधनहरीतकीकर्पूरवन्धनम्। मूषिकामृत्तिकापूतीकतृणदधिमथितजरत्प्रमन्ददारुतक्षणशकलानाम् अन्यतमस्य पायनम् हस्त्यश्वादियानारोहणम् शरविसर्जनम् शरेण मूत्रनालविदारणम् लोहशकलस्य मूत्रद्वारे प्रवेशनम् इत्येवमादीन्यपि सूत्रोक्तप्रकारेण व्याधितस्य कुर्यात्। "विपितं ते वस्तिबिलम्" इति व्यृचेन मूषिकामृत्तिकाद्युक्तद्रव्येषु निरुद्धमूत्रपुरीपं पुरुपम् आस्थापयेत्। ''विद्या शरस्येति प्रमेहणं वन्धाति'' इत्यादि ''फाण्टं पाययतीत्युदावर्तिने च'' इत्येतदन्तं सूत्रं द्रष्टव्यम् (कौ. ४ १)।।

## तत्र प्रथमा।।

**विद्या शरस्य पितरं पर्जन्यं शतवृष्ण्यम्।**
**तेना ते तन्वे ३ शं करं पृथिव्यां ते निषेचनं वहिष्टे अस्तु बालिति।। १।।**

विद्य। शरस्य। पितरम्। पर्जन्यम्। शतऽवृष्ण्यम्।

तेन। ते। तन्वे ⌡। शम्। करम्। पृथिव्याम्। ते। निऽसेचनम्। वहिः। ते। अस्तु। बाल्। इति।। १।।

NOTES

शरस्य हिंसकस्य बाणस्य पितरं पालकम् उत्पादकं वा विद्म यथावज्जानीमः। कीदृशम्। शतवृष्ण्यम् अपरिमितवीर्योपेतम्। विचित्रस्य तरुगुल्मादिरूपस्य स्थावरस्य पशुमृगनरादिरूपस्य जङ्गमस्य च उत्पादने पोषणे च समर्थम् इत्यर्थः। ईदृशं पर्जन्यं वृष्टिमदं देवम्। पितृत्वेन जानीम इति पूर्वेण संबन्धः। वर्षतीति वृषा। वृष सेचने। कनिन् युवृषितक्षीत्यादिना (उ. १. १५४) कनिन् प्रत्ययः। वृष्णि भंवं वष्ण्यम्। भवे छन्दसि इति यत्। अल्लोपोऽनः इत्युपधालोपः। ये चाभावकर्मणोः इति प्रकृतिभावस्तु व्यत्ययेन न प्रवर्तते। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्⧗। तेन उक्तलक्षणेन शरेण। अन्येपामयि दृश्यते इति साहितिको दीर्घः⧗। हे मूत्रनिरोधादिव्याधिग्रस्त ते तव तन्वे। ⧗आडभावश्छान्दसः। षष्ठ्यर्थे चतुर्थी। तनुशब्दात् ऊङ् उतः इत्यूङ्। उदात्तयणो हल्पूर्वात् इति विभत्तयुदात्तत्वस्य नोङ्धात्वोः इति प्रतिपेधे उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य इति विभक्तिः स्वर्यते⧗। तन्वाः शरीरस्यशं रोगाणाम् उपशमनम्। ⧗आह च यास्कः। शमनं च रोगाणां यावनं च भयानामिति (नि. ४. २९)⧗। करं करोमि। ⧗शमिति। शमु उपशमने। अस्मात् भावे विच्। करम् डुकृञ् करणे। छन्दसि लुङ्लङ्लिटः इति वर्तमाने लुङ्। कृमृद्दरुहिभ्यश्छन्दसि इति च्लेरङादेशः। बहुलं छन्दस्यमाङ्योगेपि इति अडभावः। आशंसायां भूतवञ्च इति प्रार्थनायां वा लुङ्⧗। शमनप्रकारमेव दर्शयति। ते तव मूत्ररोगार्तस्य पृथिव्यां भूमौ। ⧗पृथिवीशब्दो ङीपन्तः अन्तोदात्तः। उदात्तयणो हल्पूर्वात् इति विभक्तेरुदात्तत्वम्⧗। निषेचनं नितरां सेकः प्रस्राव:। अस्त्विति संबन्धः। ⧗निपूर्वात् सिञ्चतेर्भावे ल्युट्। उपसर्गात्सुनोतीत्यादिना षत्वम्। लिति इति प्रत्ययात् पूर्वस्य उदात्तत्वम्। समासेपि कृदुत्तरपदप्रकृतिस्वरत्वेन स एव अवशिष्यते⧗। निषेचनप्रकारम् आह। ते तव शरीरान्तर्निरुद्धं मूत्रं बाल्। अनुकरणशब्दोयम्। इति अनेन प्रकारेण शब्दं कुर्वत् वहिरस्तु बाह्यप्रदेशे भवतु। मन्त्रसामर्थ्याद् विधं शब्दं कुर्वत त्वरया शरीरात् निर्गच्छन्तु इत्यर्थः। यद्वा बाल्। ⧗बल प्राणने। अस्मात् ण्यन्तात् क्विप्⧗। इतिर्हेतौ। अस्य रोगार्तस्य जीवनहेतोः मूत्रं वहिरस्विति।।

## द्वितीया।।

**वि॒द्मा श॒रस्य॑ पि॒तरं॑ मि॒त्रं श॒तवृ॑ष्ण्यम्।**
**तेना॑ ते त॒न्वे॒३ शंक॑रं पृथि॒व्यां ते॒ नि॒षेच॑नं ब॒हिष्टे॑ अस्तु॒ वालिति॑।। २।।**

NOTES

# वरुणः १.२

## तत्र प्रथमा॥

**वृहन्नेषामधिष्ठाता अन्तिकादिव पश्यति।**
**यस्तायन्मन्यते चरन्त्सवैं देवा इदं विदुः॥ १॥**

वृहन्। एषाम्। अधिऽस्थाता। अन्तिकात्ऽईव। पश्यति।
यः। तायत्। मन्यते। चरन्। सर्वम्। देवाः। इदम्। विदुः॥ १॥

वृहन् महान् परिवृढो वा वरुणः एषाम् दुरात्मनां शत्रूणाम् अधिष्ठाता नियन्ता सन् तैः कृतं सर्वम् अन्याय्पम् अन्तिकादिव पश्यति समीपदेशादिव जानाति। न तस्य व्यवधायकं किंचिद् अस्तीत्यर्थः। यो वरुणः तायत् सांतत्येन वर्तमानं स्थिरवस्तु चरत् चरणशीलं नश्वरं च वस्तु मन्यते। स्थावरजङ्गमात्मकं सर्वं जगज्जानातीत्यर्थः। स वृहन् इति संबन्धः। ⌛तायत् इति। तायृ संतानपालनयोः। अस्मात् लटः शत्रादेशः⌛। ईदृग्विधज्ञानसद्भावं वरुणस्य उपपादयति सर्वम् इति। व्यवहितं विप्रकृष्टं स्थिरं नश्वरं स्थूलं सूक्ष्मम् इति एतादृग् इदं सर्वम् अतिरोहितज्ञानत्वाद् देवाः विदुः जानन्ति। ⌛विद ज्ञाने। ''विदो लटो वा'' इति झेः उस् आदेशः⌛॥

## द्वितीया॥

**यस्तिष्ठति चरति यश्च वञ्चति यो निलायं चरति यः प्रतङ्कम्।**
**द्वौ संनिपद्य यन्मन्त्रयेते राजा तद् वेद वरुणस्तृतीयः॥ २॥**

यः। तिष्ठति। चरति। यः। च। वञ्चति। यः निऽलायन्। चरति। यः। प्रऽतङ्कम्।
द्वौ। सम्ऽनिपद्य। यत्। मन्त्रयेते इति। राजा। तत्। वेद। वरुणः तृतीयः॥ २॥

पूर्वस्याम् ऋचि एषाम् इत्युक्तम्। तत्र इदमा के पुनः प्रतिनिर्दिश्यन्त इति तान् निर्दिशति यस्तिष्ठतीति पूर्वार्धेन। यः शत्रुस्तिष्ठति अभिमुखम् अवतिष्ठते यश्चरति गच्छति यश्च वञ्चति कौटिल्येन प्रतारयति यः शत्रुः निलायम् निलयनेन अनिर्गमनेन चरति। यद्वा निलीनः अदृश्यः सन् चरति। ⌛अयतेर्निस्पूर्वात् णमुल्। निपूर्वात् लीयतेर्वा। उभयथापि। समानोर्थः। ''उपसर्गस्यातती'' इति लत्वम्⌛। यः शत्रुः प्रतङ्कम् प्रकर्षेण कृच्छ्रजीवनं प्राप्य चरति वर्तते। ⌛ताकि कृच्छ्रजीवने। अस्मात् प्रपूर्वात् णमुल्⌛। एषां शत्रूणाम् इति पूर्वेण

NOTES

संबन्धः।। अन्तिकादिव पश्यतीति यद् उक्तं तदपि समर्थयते द्वौ संनिषद्येत्युत्तरार्धेन। द्वौ पुरुषौ रहसि संनिषद्य उपविश्य यत् कार्यं मन्त्रयेते गुप्तं भाषेते। (मत्रि गुप्तभाषणे इति धातुः)। तयोर्गुप्तं भाषमाणयोः तृतीयः त्रित्वसंख्यापूरकः सन् राजा ईश्वरो वरुणः स्वसार्वरयेन तत् सर्वं वेद। जानातीत्यर्थः। ततश्च अकार्यचिन्तावसर एव तान् निग्रहीतुं वरुणः शक्नोतीत्यर्थः। (''त्रेः संप्रसारणं च'' इति पूरणार्थे तीयप्रत्ययः संप्रसारणं च)।।

## तृतीया।।

**उतेयं भूमिर्वरुणस्य राज्ञ उतासौ द्यौर्बृहती दूरेअन्ता।**
**उतो समुद्रौ वरुणस्य कुक्षी उतास्मिन्नल्प उदके निलीनः।। ३।।**

उत। इयम्। भूमिः। वरुणस्य। राज्ञः। उत। असौ। द्यौः। बृहती। दूरेऽअन्ता। उतो इति। समुद्रौ। वरुणस्य। कुक्षी इति। उत। अस्मिन्। अल्पे। उदके निऽलीनः।। ३।।

उतशब्दः अप्यर्थे। इयं सर्वाधिष्ठानत्वेन निहिता भूमिरपि राज्ञः ईश्वरस्य दुष्टनिग्रहे अधिकृतस्य वरुणस्य वशे वर्तते।। उत अपि च असौ विप्रकृष्टा वृहती महती दूरेअन्ता दूरे विप्रकृष्टे देशे अन्ते अन्तिके च भवतीति दूरेअन्ता। यत एवं व्याप्य वर्तते अतो बृहतीति भावः। एवंरूपा द्यौश्च वरुणस्य राज्ञो वशे वर्तते। वृहती दूरेअन्तेति विशेषणद्वयं भूम्या अपि योज्यम्। अत एव दूरेअन्ते इति द्यावापृथिव्योर्नामसु पठितम् (निघ. ३. ३०)।। उतो अपि च समुद्रौ पूर्वपश्चिमौ वरुणस्य राज्ञः कुक्षी दक्षिणोत्तरपार्श्वभेदेन अवस्थिते द्वे उदरे। एवं भूम्यादिकं कृत्स्नं जगद् व्याप्य वर्तमानोपि अस्मिन् अल्पेपि उदके तटाकह्रदादिगते निलीनः अन्तर्हितो भवति।।

## चतुर्थी।।

**उत यो द्यामतिसर्पात् परस्तान्न स मुच्यातै वरुणस्य राज्ञः।**
**दिव स्पशः प्र चरन्तीदमस्य सहस्राक्षा अति पश्यन्ति भूमिम्।। ४।।**

उत। यः। द्याम्। अतिऽसर्पात्। परस्तात्। न। सः। मुच्यातै। वरुणस्य राज्ञः। दिवः। स्पर्शः। प्र। चरन्ति। इदम्। अस्य। सहस्रऽअक्षाः। अति। पश्यन्ति। भूमिम्।। ४।।

उत अपि च यः शत्रुः अनर्थकारी अस्माकं पुरस्तात् द्याम् अन्तरिक्षप्रदेशम् अतिसर्पात् अतिक्रम्य सर्पेद् गच्छेत्। यद्वा सुकृतप्राप्यं द्यांस्वर्गम् अतिक्रम्य

NOTES

अपथे प्रवर्तेतेत्यर्थः। स शत्रुः वरुणस्य राज्ञः पाशेभ्यो न मुच्यातै न मुच्येत। तैर्बद्ध एव वर्तताम् इत्यर्थः। ⌛मुचेः कर्मणि लेटि आडागमः। ''वैतोन्यत्र'' इति ऐकारः⌛।। कथं द्युलोकस्थो वरुणः मनुष्यकृतम् अपराधं जानातीति तत्राह् दिवः स्पश इति। दिवः द्युलोकान्तिर्गताः अस्य वरुणस्य स्पशः चारा इदं पार्थिवं स्थानं प्र चरन्ति प्राप्य संचरन्ति। ते च सहस्राक्षाः सहस्रसंख्या नोपायैर्युक्ताः सन्तः भूमिम् अति पश्यन्ति। भूलोकवृत्तान्तं स तिशयेन साक्षात्कुर्वन्तीत्यर्थः।।

## पञ्चमी।।

**सर्वं तद् राजा वरुणो वि चष्टे यदन्तरा रोदसी यत् परस्तात्।**
**संख्याता अस्य निमिषो जनानामक्षानिव श्वघ्नी नि मिनोति तानि।। ५।।**

सर्वम्। तत्। राजा। वरुणः। वि। चष्टे। यत्। अन्तरा। रोदसी इति। यत्। परस्तात्।

सम्ऽख्याताः। अस्य। निऽमिषः। जनानाम्। अक्षान्ऽइव। श्वघ्नीऽघ्नी नि। मिनोति। तानि।। ५।।

रोदसी अन्तरा द्यावापृथिव्योर्मध्ये यत् प्राणिजातं वर्तते तथा पुरस्तात् स्वस्य पुरोभागे यत् प्राणिजातम् अस्ति तत् सर्वं वरुणो राजा वि चष्टे विशेषेण पश्यति।। तस्मात् तेषां जनानाम् प्राणिनां निमिषः निमेषणव्यापारस्य। उपलक्षणम् एतत्। अक्षिपरिस्पन्दोपलक्षितस्य अस्य साध्वसाधुकर्मणः संख्याता परिमाणयिता वरुणः तानि पापिनां शिक्षाकर्माणि तत्पापानुसारेण नि मिनोति निक्षिपति। ⌛डुमिञ् प्रक्षेपणे⌛। तत्र दृष्टान्तः। अक्षानिवेति। स्वघ्नी स्वम् आत्मानं स्वकीयं धनं च हन्तीति कितवः स्वघ्नी। ⌛तथा च यास्कः। श्वघ्नी कितवो भवति स्वं हन्ति। (नि. ५. २२) इति⌛। यथा कितवः अक्षान् आत्मनो जयार्थे निक्षिपति तद्वद् इत्यर्थः।।

## षष्ठी।।

**ये ते पाशा वरुण सप्तसप्त त्रेधा तिष्ठन्ति विषिता रुशन्तः।**
**छिनन्तु सर्वे अनृतं वदन्तं यः सत्यवाद्यति तं सृजन्तु।। ६।।**

ये ते। पाशाः। वरुण। सप्तऽसप्त। त्रेधा। तिष्ठन्ति। विऽसिताः। रुशन्तः। छिनन्तु। सर्वे। अनृतम्। वदन्तम्। यः सत्यऽवादी। अति। तम्। सृजन्तु।। ६।।

NOTES

# अथर्ववेदः

## राष्ट्रसभासूक्तम् १.३

### (काण्डं–७ सूक्तम्–१२)

### (१)

**सभा च मा समितिश्चावतां 'प्रजापतेर्दुहितरौ। संविदाने'।**
**'येना संगच्छा' उप मा स शिक्षाञ्चारु 'वदानि पितरः संगतेषु'।। १।।**

सभा। च। मा। सम्ऽइतिः। च। अवताम्। प्रजाऽपतेः। दहितरौ। संविदाने इति सम्ऽविदाने।

येन। सम्ऽगच्छै। उप। मा। सः। शिक्षात्। चारु। वदानि। पितरः। सम्ऽगतेषु।। १।।

सभा पिदुषां समाजः। समितिः संयन्ति संगच्छन्ते युद्धाय अप्रेति समितिः संग्रामः। सांग्रामीणजनसभेत्यर्थः। यद्वा संग्रामनामानि यज्ञनामानि भवन्तीति यास्केनोक्त्वात् समितिशब्देन यज्ञ उच्यते। परस्परसमुञ्चयार्थो चकारौ। ते उभे अपि मा मां यादिनम् अवताम् रक्षताम्। कीदृश्यौ। प्रजापतेः सर्वजगत्स्त्रष्टुर्दूहितरौ पुत्र्यौ।

**'चत्वारो वेदधर्मज्ञाः पर्वत् प्रैवित्मेव या।**
**सा व्रूैत यै स धर्मः स्थान्।।' (वास्तु १. ९) इति।**

'यद् आर्याः प्रग्रंसन्ति स धर्मः' (आइप १, २०, ७) इति च स्मृतेपिद्वत्संघस्य सभात्वात् तदुकेश्च सर्वशास्त्रनिर्णीतधर्मरूपत्वात् प्रजापति-पुत्रीत्वत्रयपदेशः। ते च सभे संविदाने अस्मद्रक्षणविषयम् ऐकमर्त्य प्राप्ते। पिदेः संपूर्वात् 'समो यथादिपु दिपिइप्रन्जि' (फा १, २, २९) इति आत्मनेपदम्। किं च देन वादिना तुगच्छ वस्तुं सगतो भवानि। पूर्वपद् आत्मनेपदिनो गमेलॉटि रूपम्। स विद्वान् मा मां संगतम् डा शिक्षात् उपेत्य शिक्षयतु। समीचीनं यादयात्वित्पर्थः। शिक्ष विद्योपादाने। ण्यन्तात् लेटि आद्धागमः। यदा शिक्षात् मां यक्तुं शक्तं समर्थम् इच्छतु। शफेः सन्नन्तात् पञ्चमलकारे रूपम्। अयम् अर्थः–येन सह अहं विपदे स स्वयं मडुक्तवचनविघटनपटूनि वाक्यानि अभापमाणः प्रत्युत मार्मय स्ववचनतिरस्कारकवाक्यवादिनं करोत्विति। अपि च हे पितरः पालकाः मदुक्तं वाक्यं साधु साध्विनि अनुमोदमानाः पितृभूता या द्वे सभासदो जनाः संगतेषु मया सह वक्तुं मिलितेषु वादिषु चाह न्यायोपेतं सदुत्तरं वदामि। यथा सम्यग् वदामि तथा अनुगृहीतेत्यर्थः।

## ( २ )

**विद्य तें सभे नाम 'नरिष्टा नाम वा असि।**
**'ये ते के च' समासदस्ते में सन्तु सवाचसः॥ २॥**

विद्य। ते। समे। नाम। नरिष्टा नाम। वै। असि।
ये। ते। के। च। समाऽसदः। ते मे। सन्तु। सऽवाचसः॥ २॥

हे समे ते तय नाम नामधेयं विप्र जानीमः। 'वेदा वदो वा' (पा ३, ४, ८३)' इति मसो मादेशः। तन्नाम दर्शयति–हे समे नान। नाम्नेति यावत्। नारिथ। रिपिणा कान्तेन नऽसमासः। अहिंसिता परैरनभिभाव्या। पतन्नारिक्ता असि वे भयसि खलु। एकस्य वचनम् अन्यैराद्रियते तिरस्क्रियतेऽपि। वहवः संभूप यद्येकं वाक्यं वदेयुस्तद्धि न परैरतिलङ्घ्यम्। अतः अनतिलङ्घ्यवाक्यत्वाद् नरिष्टेति नाम सभाया युज्यते। अतस्ते सघ संबन्धिनः ये के च सभासदः सभायां सोदन्तो विद्वांसस्त्रे सर्वे मे मम स्वाधतः सम्मानवाक्याः सन्तु भवन्तु। न हि सभा सर्वा संभूप एकं प्रति ब्रूते अपि तु तप्रत्याः कतिपये। तेऽपि मद्रिपये अनुकूलवाक्या भवन्तु इति प्रार्थ्यते।

## ( ३ )

**एषामहं समासीनानां वचौ विज्ञानमा ददे।**
**अभ्पाः सर्वस्याः संसदो 'मामिन्द्र भगिनं कृणु'॥ ३॥**

एषाम्। अहम। सम्ऽत्रासीनानाम् वचैः। विऽज्ञानम्। आ। ददे।
अभ्पा। सर्वस्याः। समऽसदः। माम्। इन्द्र। भगिनम्। कृणु॥ ३॥

समासीनानाम् सभायाम् अवतिष्ठमानानाम् एषाम् पुरोवर्तिनां वादिनां वर्क तेजो वैदुभ्यजनितप्रभावविशेषम् विज्ञानम् वेदशास्त्रार्थविषयं प्राप्तं च। 'विज्ञानं पित्यासरयोः' (अरो १, ५. ६) इति तद्विदः। तद् भदम् आ ददे स्वीकरोमि। अपहरामीत्यर्थः। ददातेः? 'भागे दीऽनास्यविश्वणे' (या १ ३, २०) इति आत्मनेपदम्। किं यद्युना। हे इन्द्र। इन्द्रस्यैव। पागनुशासनर्तृत्वात् सभागयकर्मणि तर्स्पय प्रार्थनम्। तथा च तैत्तिरीयके। 'ते देवा इन्द्रम् अश्रुयन्मिना मो माचं व्याकुरु' इति प्रक्रम्य आम्नातम्–'ताम् इन्द्रो मध्यतोऽवकम्य ध्याकरोत् तस्माद् इयं व्याकृता धाग् उद्यते'। (तै ६, ४, ७, ३) इति। तादृशेन्द्र अस्याः पुरः स्थितायाः सर्वस्याः संसदः सभाया भगिनम्। भगो भाग्यं वैदुष्यलक्षणं जयलक्षणं वा। तद्वन्तं मा ऋणु कुरु। सर्वामपि सभां मदेकवाक्यधयणपरां

NOTES

NOTES

कुवित्यर्थः। अथवा भगो भागः। तद्वन्तं कुरु। सर्वस्याः सभाया यावती वैदुष्यकृता संभावना तावद्भागमाजं कुर्विति इन्द्रः प्रार्थ्यते।

### (४)

**यद् वो मनः परागतं यद् वद्धमिह इह वा।**
**तद् व आ वर्तयामसि मयि वो रमतां मनः॥ ४॥**

यद्। वः। मनः। परा॑ऽगतम्। यत्। वद्धम्। इह्। वा। इह वा।
तत्। वः। आ। वर्तयामसि। मयि। वः। रमताम्। मनः॥ ४॥

हे सभासदः वः युष्माकं यन्मनः मानसं परागतम् अस्मत्तः परागत्य अन्यत्र गतम्। अस्मदनभिमुखम् इत्यर्थः। यत् च मनः इह या अस्मिन् या विषये वद्धं संसक्तम्। मनसो विषयानासङ्गेन अनयस्थानात् तत्संबन्धार्हान् सर्वान् पदार्थान् अभिनयेन दर्शयति–इह वा इह येति अस्मद्व्यतिरिक्तसर्वविषयेषु संसक्तं वर्तते। तत् तादृशं यः युष्माकं मनः आ वर्तयामसि अस्मद्भिमुखं कुर्मः। आवर्तितं च वो मनः मयि रमताम् मदनुफ्लार्थचिन्तापरं भयत्वित्यर्थः।

# पृथ्वी १.४

# अथर्वसंहितायां

तथा ''पार्थिवीं भूमिकामस्य'' इति (न. क. १७) विहितायां पार्थिव्यां महाशान्ती अस्यानुवाकस्य विनियोगः। तद् उक्तं नक्षत्रकल्पे। ''सत्यं बृहद् इत्नुवाकः पार्थिव्याम्'' इति (न. क. १८)॥

**सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।**
**सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु॥ १॥**

सत्यम्। बृहत्। ऋतम्। उग्रम्। दीक्षा। तपः। ब्रह्म। यज्ञः। पृथिवीम्। धारयन्ति।

सा। नः। भूतस्य। भव्यस्य। पत्नी। उरुम्। लोकम्। पृथिवी। नः। कृणोतु॥ १॥

**असंबाधं बध्यतो मानवानां यस्यां उद्वतः प्रवत समं बहु।**
**नानावीर्या ओषधीर्या विभर्ति पृथिवी नः प्रथतां राध्यतां नः॥ २॥**

NOTES

असम्ऽबाधम्। मध्यतः मानवानाम्। यस्याः। उत्ऽवतः। प्रऽवतः। समम्। बहु।

नानाऽवीर्याः। ओषधीः। या। विभर्ति। पृथिवी। नः। प्रथताम्। राध्यताम्। नः।। २।।

**यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः।**
**यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः पूर्वपेये दधातु।। ३।।**

यस्याम्। समुद्रः। उत। सिन्धुः। आपः। यस्याम्। अन्नम्। कृष्टयः। सम्ऽबभूवुः।

यस्याम्। इदम्। जिन्वति। प्राणत्। एजत्। सा। नः। भूमिः। पूर्वऽपेये। दधातु।। ३।।

**यस्याश्चतस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः।**
**या विभर्ति बहुधा प्राणदेजत् सा नो भूमिर्गोष्वप्यन्नै दधातु।। ४।।**

यस्याः। चतस्रः। प्रऽदिशः। पृथिव्याः। यस्याम्। अन्नम्। कृष्टयः। सम्ऽबभूवुः।

या विभर्ति। बहुऽधा। प्राणत्। एजत्। सा। नः। भूमिः। गोषु। अपि। अन्नै। दधातु।। ४।।

**यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरानभ्यवर्तयन्।**
**गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु।। ४।।**

यस्याम्। पूर्वे। पूर्वऽजनाः। विऽचक्रिरे। यस्याम्। देवाः। असुरान्। अभिऽअवर्तयन्।

गवाम्। अश्वानाम्। वयसः। च। विऽस्था। भगम्। वर्चः। पृथिवी। नः। दधातु।। ५।।

**विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी।**
**वैश्वानरं विभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु।। ६।।**

विश्वम्ऽभरा। वसुऽधानी। प्रतिऽस्था। हिरण्यऽवक्षाः। जगतः। निऽवेशनी।

वैश्वानरम्। बिभ्रती। भूमिः। अग्निम्। इन्द्रऽऋषभा द्रविणे। नः। दधातु।। ६।।

**यां रक्षन्त्यस्वप्ना विश्वदानीं देवा भूमिं पृथिवीमप्रमादम्।**
**सा नो मधु प्रियं दुहामथो उक्षतु वर्चसा।। ७।।**

NOTES

याम्। रक्षन्ति। अस्वप्नाः। विश्वऽदानीम्। देवाः। भूमिम्। पृथिवीम्। अप्रऽमादम्।

सा। नः। मधु। प्रियम्। दुहाम्। अथो इति। उक्षतु। वर्चसा।। ७।।

**यार्णवेधि सलिलमग्र आसीद् यां मायाभिरन्वचरन् मनीषिणः।**
**यस्या हृदयं परमे व्यो॒मन्त्सत्येनावृतममृतं पृथिव्याः।**
**सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे।। ८।।**

या। अर्णवे। अधि। सलिलम्। अग्रे। आसीत्। याम्। मायाभिः। अनुऽअचरन्। मनीषिणः।

यस्याः। हृदयम्। परमे। विऽओमन्। सत्येन। आऽवृतम्। अमृतम्। पृथिव्याः।

सा। नः। भूमिः। त्विषिम्। बलम्। राष्ट्रे। दधातु। उत्ऽतमे।। ८।।

**यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति।**
**सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा।। ९।।**

यस्याम्। आपः। परिऽचराः। समानीः। अहोरात्रे इति। अप्रऽमादम्। क्षरन्ति।

सा। नः। भूमिः। भूरिऽधारा। पयः। दुहाम्। अथो इति। उक्षतु। वर्चसा।। ९।।

**यामश्विनावमिमातां विष्णुर्यस्यां विचक्रमे।**
**इन्द्रो यां चक्र आत्मनेनमित्रां शचीपतिः।**
**सा नो भूमिर्वि सृजतां माता पुत्राय मे पयः।। १०।। (१)**

याम्। अश्विनौ। अमिमाताम्। विष्णुः। यस्याम्। विऽचक्रमे।

इन्द्रः। याम्। चक्रे। आत्मने। अनमित्राम्। शचीऽपतिः।

सा। नः। भूमिः। वि। सृजताम्। माता। पुत्राय। मे। पयः।।१०।। (१)

**गिरयस्ते। पर्वता। हिमवन्तोरण्यं ते पृथिवि स्योनमस्तु।**
**वभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम्।**
**अजीतोहतो अक्षतोध्यष्ठां पृथिवीमहम्।। ११।।**

गिरयः। ते। पर्वताः। हिमऽवन्तः। अरण्यम्। ते पृथिवि। स्योनम्। अस्तु।

बभ्रुम्। कृष्णाम्। रोहिणीम्। विश्वऽरूपाम्। ध्रुवाम्। भूमिम्। पृथिवीम्। इन्द्रऽगुप्ताम्।

अजीतः। अहतः। अक्षतः। अधि। अस्थाम्। पृथिवीम्। अहम्।। ११।।

NOTES

**यत् ते मध्यं पृथिवि यच्च नभ्यं यास्त ऊर्जस्तन्वः संबभूवुः।**
**तासु नो धेह्यभि नः पवस्व माता भूमिः पुत्रो अहं पृथिव्याः।**
**पर्जन्यः पिता स उ नः पिपर्तु॥ १२॥**

यत्। ते। मध्यम्। पृथिवि। यत्। च। नभ्यम्। याः। ते। ऊर्जः तन्वः। सम्ऽबभूवुः।

तासु। नः। धेहि। अभि। नः। पवस्व। माता। भूमिः। पुत्रः। अहम् पृथिव्याः।

पर्जन्यः पिता सः। ऊं इति। नः। पिपर्तु।। १२।।

**यस्यां वेदिं परिगृह्णन्ति भूम्यां यस्यां यज्ञं तन्वते विश्वकर्माणः।**
**यस्यां मीयन्ते स्वरवः पृथिव्यामूर्ध्वाः शुक्रा आहुत्याः। पुरस्तात्।**
**सा नो भूमिर्वर्धयद् वर्धमाना॥ १३॥**

यस्याम्। वेदिम्। परिऽगृह्णन्ति। भूम्याम्। यस्याम्। यज्ञम्। तन्वते। विश्वऽकर्माणः।

यस्याम्। मीयन्ते। स्वरवः। पृथिव्याम्। ऊर्ध्वाः। शुकाः। आऽहुत्याः। पुरस्तात्।

सा। नः। भूमिः। वर्धयत्। वर्धमाना।। १३।।

**यो नो द्वेषत् पृथिवि यः पृतन्याद् योऽभिदासान्मनसा यो वधेन।**
**तं नो भूमे रन्धय पूर्वकृत्वरि॥ १४॥**

यः। नः। द्वेषत्। पृथिवि। यः पृतन्यात्। यः। अभिऽदासात्। मनसा। यः। वधेन।

तम् नः। भूमे। रन्धय। पूर्वऽकृत्वरि।। १४।।

**त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः।**
**तवेमे पृथिवि पञ्च मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य उद्यन्त्सूर्यो**
**रश्मिभिरातनोति॥ १५॥**

त्वत्। जाताः। त्वयि। चरन्ति। मर्त्याः। त्वम्। विभर्षि। द्विऽपदः। त्वम्। चतुःऽपदः।

तव। इमे। पृथिवि। पञ्च। मानवाः। येभ्यः। ज्योतिः। अमृतम्। मर्त्येभ्यः। उत्ऽयन्।

सूर्यः। रश्मिऽभिः। आऽतनोति।। १५।।

NOTES

**ता नः प्रजाः सं दुह्तां समग्रा वाचो मधु पृथिवि धेहि मह्यम्॥ १६॥**

ताः नः। प्रऽजाः। सम्। दुहताम्। सम्ऽअग्राः। वाचः। मधु। पृथिवि। धेहि। मह्यम्।। १६।।

**विश्वस्वं मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम्।**
**शिवां स्योनामनु चरेम विश्वहा॥ १७॥**

विश्वऽस्वम्। मातरम्। ओषधीनाम्। ध्रुवाम्। भूमिम्। पृथिवीम्। धर्मणा। धृताम्। शिवाम्। स्योनाम्। अनु। चरेम। विश्वहा।। १७।।

**महत् सधस्थं महती बभूविथ महान् वेग एजथुर्वेपथुष्टे।**
**महांस्त्वेन्द्रो रक्षत्यप्रमादम्।**

**सा नो भूमे प्र रोचय हिरण्यस्येव संदृशि मा नो द्विक्षत कश्चन॥ १८॥**

महत्। सधऽस्थम्। महती। बभूविथ। महान्। वेगः। एजथुः। वेपथुः। ते।

महान्। त्वा। इन्द्रः। रक्षति। अप्रऽमादम्।

सा नः। भूमे। प्र रोचय। हिरण्यस्यऽइव। सम्ऽदृशि। मा। नः। द्विक्षत। कः। चन।। १८।।

**अग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्यग्निरश्मसु।**
**अग्निरन्तः पुरुषेषु गोष्वश्वेष्वग्नयः॥ १९॥**

अग्निः। भूम्याम्। ओषधीषु। अग्निम्। आपः। बिभ्रति। अग्निः। अश्मऽसु।

अग्निः। अन्तः। पुरुषेषु गोषु। अश्वेषु। अग्नयः।। १९।।

**अग्निर्दिव आ तपत्यग्नेर्देवस्योर्वन्तरिक्षम्।**

**अग्निं मर्तास इन्धते हव्यवाहं घृतप्रियम्॥ २०॥** (२)

# अथर्ववेदः

## कालः १.५

### तत्र प्रथमा॥

**कालो अश्वो वहति सप्तरश्मिः सहस्राक्षो अजरो भूरिरेताः।**
**तमा रोहन्ति कवयो विपश्चितस्तस्य चक्रा भुवनानि विश्वा॥ १॥**

कालः। अश्वः। वहति। सप्तऽरश्मिः। सहस्रऽअक्षः। अजरः। भूरिऽरेताः।

तम्। आ। रोहन्ति। कवयः। विपःऽचितः। तस्य। चक्रा। भुवनानि। विश्वा॥ १॥

अनेन सूक्तद्वयेन सर्वजगत्कारणभूतः कालरूपः परमात्मा स्तूयते। तत्र प्रथमया कालोऽश्वात्मना रूप्यते। सप्तरश्मिः (सप्त) संख्याका रश्मयो रज्जवो मुखग्रीवापादावबद्धा यस्य सः सहस्राक्षः सहस्रलोचनः अजरः जरारहितः नित्ययुवा भूरिरेताः। रेतः शुक्ररूपः सप्तमो धातुः। प्रभूतवीर्यः रेतःसेचनसमर्थः अपत्योत्पादनशक्तः कालः कलयिता अश्वो वहति स्वारोहकान् अभिमतं प्रदेशं प्रापयति। तम् अश्वं विपश्चितः अश्वारोहणावरोहणादिषु कुशला अश्वशास्त्रनिष्णाताः कवयो धीमन्तः आ रोहन्ति। तस्य अश्वस्य चक्रा चक्राणि। ⌛चङ्कमणाञ्चक्रम् इति यास्कः (नि. ४. २७)⌛। गन्तव्यानि स्थानानि विश्वा विश्वानि भुवनानि। इति अश्वपक्षेर्थः।। विवक्षितस्तु। अश्वः अश्नुते व्याप्नोति भूतभविष्यद्वर्तमानकालवर्तीनि वस्तूनीति अश्वः। कालः कलयिता सर्वस्य जगतः अनवच्छिन्नकालरूपः परमेश्वरः। सप्तरश्मिः। रश्मिशब्देन ऋतव उच्यन्ते। सप्तर्तुः एकैक ऋतुर्मासद्वयात्मकः सप्तमस्तु त्रयोदशो मासः। तथा च दाशतय्याम् आम्नायते। ''साकंजाना सप्तथम् आहुरेकजं षळिद्यमा ऋषयो देवता इति'' इति (ऋ° १. १६४. १४)। अत्रापि समाम्नातं प्राक् (९. १४. १६)। सहस्राक्षः। अत्र अक्षिशब्देन दिनानि रात्रयश्च उच्यन्ते। सहस्रसंख्याकाहोरात्रयुक्तः। अजरः जरारहितः सर्वदा एकरूपः। भूरिरेताः प्रभूतजगत्सर्जनसमर्थशक्तिसंपन्नः। एवंरूपः कालो वहति प्राणिजातं स्वस्वकर्मषु प्रापयति। तं कालं कवयः क्रान्तदर्शिनो विपश्चितः विद्वांसः आ रोहन्ति स्वाधीनं कुर्वन्ति। स्वाधीनकाला भवन्तीत्यर्थः। तस्य कालात्मकस्य रथस्य चक्रा चक्राणि विश्वा विश्वानि भुवनानि भूतजातानि। लोकान् अभिगच्छन्तीति शेषः।। अथ वा अश्वशब्देन आदित्य उच्यते। तथा च यास्कः। ''एको अश्वो वहति सप्तनामा। आदित्यः। सप्तास्मै रश्मयो रसान् अभिसंनामयन्ति

NOTES

NOTES

सप्तैनम् ऋषय स्तुवन्तीति वा'' इति। (नि॰ ४. २७)। कालात्मकोश्वः सूर्यः सप्त रश्मयः प्रधानभूता यस्य। ते चैव सप्त सूर्या इत्युच्यन्ते। ''देवा आदित्या ये सप्त तेभिः सोमाभि रक्ष नः'' इति निगमः (ऋ॰ ९. १४०. ३)। तेषां च नामानि तैत्तिरीया अधीयते। ''आरोगो'' भ्राजः पटरः पतङ्ग स्वर्णरो ज्योतिषीमान् विभासः'' इति (तै॰ आ॰ १. ७. १)। औ तु प्रधानभूतः कश्यपाख्य आदित्यः। ''कश्यपोष्टमः स महामेरुं न जहाति'' इति श्रुतेः (तै॰ आ॰ १. ७. १)। यद्वा रश्मिशब्देन च्छन्दांस्यभिधीयन्ते। गायत्र्यादीनि च्छन्दांसि यस्य। तथा च निगमः। ''ऋग्भिः पूर्वाह्णे दिवि देव ईयते। यजुर्वेदे तिष्ठति मध्ये अङः। सामवेदेनास्तमये महीयते। वेदैरशून्यस्त्रिभिरेति सूर्यः'' इति (तै॰ ब्रा॰ ३. १२. ९. १)। यद्वा रश्मिमन्तोऽश्वा रश्मिशब्देन उच्यन्ते। ॗमत्वर्थीयस्य लोपःॗ। सप्ताश्वः। ''सप्त युञ्जन्ति रथम् एकचक्रम्'' इति निगमः (९. १४. २)। सहस्राक्षः अक्षिवद् अक्षीणि किरणाः सहस्रकिरणोपेतः अजरः अविनश्वरो नित्यः भूरिरेताः। उदकवाची रेतःशब्दः। ''यदा खलु वा असावादित्यो न्यङ् रश्मिभिः पर्यावर्ततेथ वर्षति'' इति श्रुतिः (तै॰ सं॰ २. ४. १०. २)। एवंरूप आदित्यो वहति कालचक्रं धारयति। तं कालात्मकं सूर्यं विद्वांसः अधिगतपरमार्थाः आ रोहन्ति सूर्यमण्डलं भित्त्वा उपगच्छन्ति।

**द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ।**
**परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः॥**

इति स्मृतेः। यद्वा स्वात्मभावेन अधितिष्ठन्ति। अत एव आदित्यं पुरुषं प्रकृत्य श्रूयते। ''तद् योहं सोसौ योसौ सोहं तद् उक्तम् ऋषिणा सूर्य आत्मा जगतस्तस्थुषश्च'' इति (ऐ॰ आ॰ २. २. ४)। तस्य सूर्यस्य चक्रा चक्राणि चङ्क्रमणानि व्याप्तिस्थानानि सर्वाणि जगन्तीति॥

## द्वितीया॥

**स॒प्त च॒क्रान् व॑हति का॒ल ए॒ष स॒प्तास्य॒ नाभी॑र॒मृतं॒ न्वक्षः॑।**
**स इ॒मा विश्वा॒ भुव॑नान्य॒ञ्जत् का॒लः स ई॑यते प्र॒थमो न दे॒वः॥ २॥**

स॒प्त। च॒क्रान्। व॒ह॒ति॒। कालः। ए॒षः। स॒प्त। अ॒स्य॒। नाभीः॑। अ॒मृत॑म्। नु अक्षः॑।

सः। इ॒मा। विश्वा॑। भुव॑नानि। अ॒ञ्जत्। का॒लः। सः। ई॒य॒ते॒। प्र॒थमः। नु। दे॒वः॥ २॥

अनया संवत्सररूपकालचक्रं वर्ण्यते। तस्य संवत्सरकालस्य चक्राणि एकं

NOTES

त्रीणि पञ्च षट् सप्त द्वादशेति तत्रतत्र आम्नायते। ‘‘सप्त युञ्जन्ति रथम् एकचक्रम्’’ (९. १४. २) ‘‘त्रिनाभि चक्रम्’’ (९. १४. २) ‘‘सप्तचक्रे षडरे’’ (९.१४.१२) ‘‘द्वादशारम्’’ (९. १४. १३) इत्यादिषु। तथा च शौनकोप्याह।

**त्रिधा द्वादशधा षोढा पञ्चधा सप्तधा तथा।**
**संवत्सरं चक्रवञ्च पराभिः कीर्तयत्यृषिः।**

इति (बृ॰ ४. ३२)।। एष सर्वजगत्कारणत्वेन अनुभूयमानः कालः परमात्मा सप्त चक्रा। चक्राणि सप्त ऋतून् अनु अनुक्रमेण वहति धारयति। अस्य संवत्सरस्य सप्त नाभीः नाभयः। नह्यते नाभिः। अक्षबन्धकानि मध्यच्छिद्राणि सप्त ऋतुसंधिकालाः। अस्य अक्षः तनु* संततं सूक्ष्मम् अमृतम् अमरणधर्मकम् अविनश्वरं तत्त्वम्। सप्तचक्रच्छिद्रेषु। प्रोतः अनुस्यूतोऽक्षः सत्यम् अबाध्यं तत्त्वम्। सः पूर्वोक्तसंवत्सररूपः प्रथमः सर्वस्य आदिभूतो देवः द्योतमानः नित्यज्ञानरूपः कालः परमात्मा इमा इमानि नामरूपात्मना व्याकृतानि विश्वा विश्वानि भुवनानि भवनवन्ति चराचरात्मकानि जगन्ति अञ्जत् अञ्जन्। ⌛अनक्तेः शतरि ‘‘अनित्यम् आगमशासनम्’’ इति नुमभावः⌛। व्यक्तीकुर्वन् स्वेन कालेन अवच्छिन्नानि कुर्वन् उत्पादयम् सः स्यति संहरतीति सः। ⌛षो अन्तकर्मणि। कर्तरि कप्रत्ययः। आतो लोपः⌛। संहरंश्च ईयते गच्छति व्याप्नोति सर्वम् आवृत्य वर्तते। ⌛ईङ् गतौ। देवादिकः⌛। नुशब्दः प्रसिद्धौ।। यद्वा अध्यात्मपरत्वेन योज्यः। कालः कलयिता सर्वेन्द्रियव्यापारकर्ता शरीराभिमानी देवः। बन्धकाः विषया रूपादयः। तनुं सूक्ष्मं दुर्दर्शम्। अमृतम् चैतन्यम्। अक्षः सर्वेन्द्रियेषु तद्विषयेषु च अनुगतः। एवं सर्वाणि प्राणिजातानि अञ्जत् प्रेरयन् ईयते। सः उपसंहरंश्च स कालः ईयते तत्त्वज्ञैर्ज्ञायते। ⌛इण् गतौ। कर्मणि यक् प्रत्ययः⌛ ।।

## तृतीया।।

**पूर्णः कुम्भोधि काल आहितस्तं वै पश्यामो बहुधा नु सन्तः।**
**स इमा विश्वा भुवनानि प्रत्यङ् कालं तमाहुः परमे व्योमन्।। ३।।**

पूर्णः। कुम्भः। अधि। काले। आऽहितः। तम्। वै। पश्यामः। बहुऽधा। नु सन्तः।

सः। इमा। विश्वा। भुवनानि। प्रत्यङ्। कालम्। तम्। आहुः। परमे। विऽओमन्।। ३।।

NOTES

काले सर्वजगत्कारणभूते नित्ये अनवच्छिन्ने परमात्मनि स्वस्वरूपे। ⌛अधिशब्द: सप्तम्यर्थानुवादी⌛। पूर्ण: सर्वत्र व्याप्त: कुम्भ: कुम्भवत् कुम्भ: अहोरात्रमासर्तुसंवत्सरादिरूप: अवच्छिन्नो जन्य: काल: आहित: निहितो वर्तते। सर्वस्य कार्यस्य स्वकारणेऽवस्थानात्। अत्र विद्वदनुभवश्रुतिं प्रमाणयति। तं जन्यं कालं सन्त: सत्पुरुषा बहुधा नानाप्रकारम् अहोरात्रादिभेदेन पश्यामो नु अनुभवाम: खलु। अथवा तं जन्यकालाधारं परमात्मानं बहुधा बहुभि: श्रवणमनननिदिध्यासनै: पश्याम: साक्षात्कुर्म:। सन्त: सद्रूपब्रह्मोपासका वयम्। ''अस्ति ब्रह्मेति चेद् वेद सन्तम् एनं ततो विदु:'' इति हि श्रुति: (तै. आ. ८. ६)। वैनुशब्दौ प्रसिद्धर्थौ। स काल: इमा इमानि परिदृश्यमानानि विश्वा विश्वानि व्याप्तानि भुवनानि भूतजातानि प्रत्यङ् प्रत्यञ्चन: अभिमुखाञ्चन: आव्याभुवन् भवति। तं कालं परमे उत्कृष्टे सांसारिकसुखदु:खा दिद्वन्द्वदोषरहिते व्योमन् व्योमनि आकाशवन्निर्लेपे सर्वगते विविधं रक्षके परमानन्दप्रदायके स्वस्वरूपे वर्तमानम् आहु: विद्वांस:। ⌛व्योमन्निति। ''सुपां सुलुक्°'' इति सप्तभ्या लुक्। ''न ङिसंबुद्धयो:'' इति नलोपप्रतिषेध:⌛।।

## चतुर्थी।।

**स एव सं भुवनान्याभरत् स एव सं भुवनानि पर्यैत्।**
**पिता सन्नभवत् पुत्र एषां तस्माद् वै नान्यत् परमस्ति तेज:।। ४।।**

स:। एव। सम्। भुवनानि। आ। अभरत्। स:। एव। सम्। भुवनानि। परि। ऐत्।

पिता। सन्। अभवत्। पुत्र:। एषाम्। तस्मात्। वै। न। अन्यत्। परम्। अस्ति। तेज:।। ४।।

स एव काल: भुवनानि भूतजातानि [सम्] आ अभरत् आहरत् आहरति उत्पादयति। ⌛''हृग्रहोर्भ:°''⌛। यद्वा। ⌛[भुञ्] भरणे। भौवादिक:⌛। स्वेनोत्पादितानि भुवनानि समन्तात् पुष्णाति। स एव काल: भुवनानि सं पर्यैत् सम्यक् परिगच्छति व्याप्नोति। ⌛इण् गतौ। छान्दसे लङि ''आडजादीनाम्'' इति आडागम:। ''आटश्च'' इति वृद्धि:⌛। स एव पिता एषां भुवनानां जनक: सन् एषां पुत्रोभवत् भवति। काल एव पितृत्वेन पुत्रत्वेन च व्यवहियते। य: पूर्वजन्मनि पितृत्वेन जात: स एव अस्मिन् जन्मनि पुत्रत्वेन व्यवहियते अवच्छेदककालाधीनत्वात् सर्वस्य। अथ वा एकस्मिन् जन्मन्येव पितु: पुत्रत्वम् आम्नायते। ''अङ्गाद् अङ्गात् संभ- ''वसि हृदयाद् अधि जायसे। आत्मा वै पुत्रनामासि स जीव शरद: ''शतम्'' इति (कौ° उ° २. ११)। तस्मात्

सर्वोत्पादकात् सर्वगतात् पुत्रादिरूपेण भविष्यतश्च तस्मात् कालाद् अन्यत् परम् उत्कृष्टं तेजो नास्ति। वैशब्दः प्रसिद्धौ। तेजो नास्तीति निषेधात् स्वस्यापि तेजोरूपत्वम् अर्थसिद्धम्। ''तस्य भासा सर्वम् इदं विभाति'' इति श्रुतेः। (क° व° ४. १५)।।

NOTES

## पञ्चमी।।

**कालोमूं दिवमजनयत् काल इमाः पृथिवीरुत।**
**काले ह भूतं भव्यं चेषितं ह वि तिष्ठते।। ४।।**

कालः। अमूम। दिवम्। अजनयात्। कालः। इमाः। पृथिवीः। उत।

काले। ह। भूतम्। भव्यम्। च। इषितम्। ह। वि। तिष्ठते।। ४।।

कालः परमात्मा अमूं विप्रकृष्टां दिवम् द्युलोकम् अजनयत् उत्पादितवान्। उत अपि च इमाः परिदृश्यमानाः सर्वप्राण्याधारभूताः पृथिवीः। व्यत्ययेन बहुवचनं कक्ष्याभेदेन वा। तथा च मन्त्रवर्णः। ''यद् इन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्याम् उत स्थः'' इति (ऋ° १. १०८. ९) तथा। हशब्दः एवार्थे। काल एव भूतम् भूतकाले आधारे अवच्छिन्नं भव्यम् भविष्यच्च इषितम् इष्टम् इष्यमाणं वर्तमानकालावच्छिन्नं च जगद् वि तिष्ठते विशेषेण आश्रितं वर्तते। ⌛''समवप्रविभ्यः स्थः'' इत्यात्मनेपदम्⌛ ।।

## षष्ठी।

**कालो भूतिमसृजत काले तपति सूर्यः।**
**काले ह विश्वा भूतानि काले चक्षुर्वि पश्यति।। ६।।**

कालः। भूतिम्। असृजत्। काले। तपति। सूर्यः।

काले। ह। विश्वा। भूतानि। काले। चक्षुः। वि। पश्यति।। ६।।

कालः कालरूपः परमात्मा भूतिम् भवनवज्जगद् असृजत। ⌛सृजविसर्गे। तौदादिकः। व्यत्ययेन आत्मनेपदम्। दैवादिकाद् वा आत्मनेपदिनो व्यत्ययेन शः⌛। काले प्रेरके सति सूर्यः आदित्यः तपति जगत् प्रकाशयति। काल एव आश्रये (विश्वा) विश्वानि भूतानि वर्तन्ते। काले चक्षुः। उपलक्षणम् एतत्। चक्षुरादीन्द्रियाणि वि पश्यति। इदमपि उपलक्षणम्। दर्शनादिकर्माणि कुर्वन्ति। यद्वा चक्षुः। चक्षुःशब्दो लुप्तमत्वर्थीयः। चक्षुष्मान् सर्वेन्द्रियाधिष्ठाता वि पश्यति स्वस्वेन्द्रियव्यापारं करोति।।

NOTES

## सप्तमी॥

**काले मनः काले प्राणः काले नाम समाहितम्।**
**कालेन सर्वा नन्दन्त्यागतेन प्रजा इमाः॥ ७॥**

काले। मनः। काले। प्राणः। काले। नाम। सम्ऽआहितम्।

कालेन। सर्वाः। नन्दन्ति। आऽगतेन। प्रऽजाः। इमाः॥ ७॥

काले परमात्मनि मनः जगत्सिसृक्षानिमित्तभूतं मनो वर्तते। तस्मिन्नेव प्राणः सूत्रात्मा सर्वजगदन्तर्यामी वर्तते। अन्तर्यमनोपाधिकत्वेन काले वर्तत इति आधारव्यपदेशः। यद्वा मनः। जात्येकवचनम्। सर्वेषां प्राणिनां मनांसि। प्राणः पञ्चवृत्तिकं प्राणा अपि परमात्मन्येव वर्तन्ते। तथा नाम नामधेयं सर्वेषां वस्तूनां संज्ञा अपि तत्रैव समाहितम्। स्त्रीपुरुषादिसंज्ञाभिः काल एवं उच्यत इत्यर्थः। यद्वा सर्वेषां रूपाणि कृत्वा तेषां नामान्यपि स्वयमेव व्यवहरतीत्येतदभिप्रायेण काले नाम समाहितम् इत्युक्तम्। ''(सर्वाणि रूपाणि) विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते'' इति हि श्रुतिः (तै. आ. ३. १२. ७)।

कालेन वसन्तादिरूपेण आगतेन सर्वा इमाः प्रजाः नन्दन्ति संतुष्यन्ति स्वस्वकार्यसिद्धेः॥

## अष्टमी॥

**काले तपः काले ज्येष्ठं काले ब्रह्म समाहितम्।**
**कालो ह सर्वस्येश्वरो यः पितासीत् प्रजापतेः॥ ७॥**

काले। तपः। काले। ज्येष्ठम् काले। ब्रह्म। सम्ऽआहितम्।

कालः। ह। सर्वस्य। ईश्वरः। यः। पिता। आसीत्। प्रजाऽपतेः॥ ७॥

काले परमात्मनि तपः जगत्सर्जनविषयं पर्यालोचनम्। ⌛तप पर्यालोचने। अस्माद् असन्⌛। ''तपसा चीयते ब्रह्म'' (मु॰ १. १. ७) इत्यादौ तपःशब्दः पर्यालोचनार्थत्वेन व्याख्यातः। तथा ज्येष्ठम् सर्वस्य आदिभूतं हिरण्यगर्भाख्यं तत्त्वं वर्तते। तथा ब्रह्म साङ्गो वेदस्तत्प्रतिपादकः समाहितम् सम्यगाहितः। यद्वा तपः कृच्छ्रचान्द्रायणादिकम्। तत्फलप्रदातृत्वात् तत्रैव वर्तनम्। एकः कालशब्दो यौगिकः कलयितरि काले ज्येष्ठं ब्रह्म हिरण्याख्यम्। ''ज्येष्ठं ब्रह्म श्रेष्ठं ब्रह्म'' इति हि श्रुत्यन्तरम्। हशब्दः अवधारणे। कालः सर्वस्य जगत ईश्वरः स्वामी। यः कालः प्रजापतेः प्रजानां स्रष्टुश्चतुर्मुखस्य ब्रह्मणः पिता जनक आसीत्।

NOTES

## नवमी॥

**तेनेषितं तेन जातं तदु तस्मिन् प्रतिष्ठितम्।**
**कालो ह ब्रह्म भूत्वा बिभर्ति परमेष्ठिनम्॥ ९॥**

तेन। इषितम्। तेन। जातम्। तत्। ॐ इति। तस्मिन्। प्रतिऽस्थितम्।

कालः। ह। ब्रह्म। भूत्वा। बिभर्ति। परमेऽस्थिनम्॥ ९॥

तेन कालेन इषितम् इष्टं सर्वं स्त्रष्टव्यं जगत्। कामितम् इत्यर्थः। ⌛"तीषुमह°" इति इडागमः⌛। तेनैव जातम् उत्पादितं जगत्। तत् तज्जगत्। उशब्दः अवधारणे। तस्मिन्नेव काले प्रतिष्ठितम्। कालो ह एव ब्रह्म देशकालावच्छिन्नं सच्चित्सुखंयितृरसम् अबाध्यं परमार्थतत्त्वं भूत्वा परमेष्ठिनम् परमे स्थाने सत्यलोके तिष्ठन्तं चतुर्मुखब्रह्मणं (बिभर्ति)॥

## दशमी॥

**कालः प्रजा असृजत कालो अग्रे प्रजापतिम्।**
**स्वयंभूः कश्यपः कालात् तपः कालादजायत॥ १०॥**

कालः। प्रऽजाः। असृजत। कालः। अग्रे। प्रजाऽपतिम्।

स्वयम्ऽभूः। कश्यपः। कालात् तपः कालात्। अजायत॥ १०॥

कालः अग्रे सृष्ट्यादौ प्रजापतिम् ब्रह्माणम् असृजत उदपादयत्। कालः। प्रजाश्च असृजत। स्वयंभूः स्वयम् आत्मनान भवतीति स्वयंभूः। कालव्यतिरिक्तकालान्तरनिषेधकः स्वयंशब्दः। कश्यपः आरोगभ्राजादि-सप्तसूर्यापेक्षया अष्टमः सूर्यः। "कश्यपोष्टमः स महामेरुं न जहाति" इति श्रुत्यन्तरम् (तै° आ° १. ७. ९) उदाहृतम् (१)। ⌛कश्यपशब्दनिर्वचनं यास्केन एवं कृतम्। कश्यपः पश्यको भवति यत् सर्वं परिपश्यतीति सौक्ष्म्यात् इति (तै° आ° १. ८. ८)⌛। तादृशः सर्वस्य द्रष्टा सूर्यः तपः संतापकं तेजश्च कालाद् अजायत॥

**[ इति ] षष्ठेनुवाके अष्टमं सूक्तम्।**

"कालादापः" इति सूक्तं कालप्रतिपादकत्वात् कालसूक्तम् इत्युच्यते। तस्य पूर्वसूक्तेन सह उक्तो विनियोगः॥

### तत्र प्रथमा॥

**कालादापः समभवन् कालाद् ब्रह्म तपो दिशः।**
**कालेनोदेति सूर्यः काले नि विशते पुनः॥ १॥**

❑❑❑

NOTES

# UNIT–III

# इकाई–तृतीय

॥ श्रीः ॥

ऐतरेयब्राह्मणान्तर्गतं

# हरिश्चन्द्रोपाख्यानम्

## ( त्रयस्त्रिंशोऽध्यायः )

## सायणभाष्यसहितं 'प्रकाश'-हिन्दी-व्याख्योपेतम्

## प्रथम खण्डः

**आहिताग्नेर्मृतावग्निहोत्राङ्गे विकले तथा।**
**प्रायश्चित्तमपत्नीकहोम इत्यादि वर्णितम्॥**

**उक्तं द्वात्रिंशदध्यायैः कर्म वर्णत्रयान्वितम्।**
**अथ त्वष्टभिरध्यायैर्वर्ण्यते राजकर्तृकम्॥**

**तत्र क्रतौ राजसूये बह्विष्टिपशुसोमके।**
**मध्येऽभिषेचनीयेऽह्नि शौनः शेपं श्रुतं श्रुतौ॥**

**त्रयस्त्रिंशोऽयमध्यायः शौनः शेपेतिनामवान्।**
**हरिश्चन्द्रकथा तत्र कथिता बहुपुत्रदा॥**

### तदेतदुपाख्यानं दर्शयति–

हरिश्चन्द्रो ह वैधस ऐक्ष्वाको राजाऽपुत्र आस। तस्य ह शतं जाया बभूवुः। तासु पुत्रं न लेभे। तस्य ह पर्वतानारदौ गृह ऊषतुः। स ह नारदं पप्रच्छ।

सा०–हरिश्चन्द्रो नाम राजर्षिः, 'प्रस्कण्वहरिश्चन्द्रावृषी' (६. १. १५३) इति पाणिनिना सूत्रितत्वात्। स च वेधसो नृपतेः पुत्रः, इक्ष्वाकुवंशोद्भवो राजा, पुत्रहीन आस। स च शतसङ्ख्यासां जायानां मध्ये कस्याञ्चदपि जायायां पुत्रं न

लेभे। तस्य राज्ञो गृहे पर्वतनारदमानौ यावृषी, तौ निवासं चक्रतुः। तयोर्मध्ये नारदमृषिमेतया गाथया राजा पप्रच्छ।

NOTES

## तां गाथां दर्शयति–

**यं न्विमं पुत्रमिच्छन्ति ये विज्ञानन्ति ये च न।**
**किंस्वित्पुत्रेण विन्दते तन्म आचक्ष्व नारद! ॥इति॥**

सा०–ये देवमनुष्यादयो विजानन्ति–विवेकज्ञानयुक्ताः–ये च पश्वादयो न विजानन्ति = विवेकज्ञानरहिताः। ते सर्वेऽपि नु = क्षिप्रं यमिमं पुत्रमिच्छन्ति तेन पुत्रेण किंस्विद् विन्दते = किं नाम फलं पिता लभते? हे नारद! ये मह्यं तत्फलमाचक्ष्वेति राज्ञः प्रश्नः।

## तस्योत्तरमवतारयति–

**स एकया पृष्टो दशभिः प्रत्युवाच, इति।**

स नारद एकया गाथया पृष्टः सन् दशभिर्गाथाभिः प्रत्युत्तरमुक्तवान्। तत्र प्रथमां गाथामाह–

**ऋणमस्मिन्संनयत्यमृतत्वं च गच्छति।**
**पिता पुत्रस्य जातस्य पश्येच्चेज्जीवता मुखम्॥ १॥**

सा०–उत्पन्नस्य, सुखेनं जीवतः पुत्रस्य मुखं पिता यदि पश्येत्तदानीमस्मिन्पुत्रे स्वकीयमृणं लौकिकं वैदिकं च, संनयति = सम्यगवस्थापयति। लौकिकस्यावस्थापनात् 'पुत्रपौत्रादिभिर्ऋणं प्रत्यर्पणीयमिति' स्मृतिकारा आहुः। वैदिकं तु 'त्रिभिर्ऋणवा जायत' इत्यादि श्रुत्युक्तं पूर्वमेवोदाहृतम्। तस्य च पुत्रावस्थापनं सम्पत्तिनामकेन कर्मणा सम्पद्यते। तच्च कर्म वाजसनेयिभिराम्नातम्–''अथातः सम्पत्तिः। यदा प्रैष्यन्मन्यते, अथ पुत्रमाह–'त्वं ब्रह्म, त्वं यज्ञः, त्वं लोक इति'। स पुत्रः प्रत्याह–'अहं ब्रह्माहं यज्ञोऽहं लोक इति' ब्रह्म = मया कर्त्तव्यं वेदाध्ययनं, मयाऽनुष्ठेया यज्ञाश्च, मया सम्पाद्या उत्तमा लोकाश्च–इत्येतत् सर्वं पुत्रेण त्वयैव सम्पादनीयमिति पितृवाक्यस्यार्थः। 'सर्वमहं सम्पादयिष्यामि' इति पुत्रवाक्यस्यार्थः। अत्राप्यारण्यककाण्डे सङ्क्षिप्य संदर्शयिष्यते–'सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते' इति। एवमृणं पुत्रे समर्पयति। तथैवामृतत्वं मरणरहितं मुक्तिपदं च गच्छति। पुत्रार्पितलौकिकवैदिकभारस्याविघ्नेन तत्त्वज्ञानसम्पादनात्।

NOTES

## ( २ )

**द्वितीयां गाथामाह–**

**यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि।**
**यावन्तो अप्सु प्राणिनां भूयान्पुत्रे पितुस्ततः॥ २॥**

सा०–पृथिव्यां भोगाः = सस्यनिवासादयः। जातवेदस्यग्नौ भोगाः = दहनपचनादयः। अप्सु भोगाः = स्नानपानादयः। प्राणिनामेते सर्वे भोगा यावन्तः सन्ति ततस्तावद्भ्यः सर्वेभ्यो भोगेभ्यो भूयानधिकः पितुः पुत्रे भोगो विद्यते, अत्यन्तसुखहेतुत्वात्। तथा चाहुः–

**'पुत्रोत्पत्तिविपत्तिभ्यां नापदं सुखदुःखयोः' इति।**

## ( ३ )

**तृतीयां गाथामाह–**

**शश्वत्पुत्रेण पितरोऽत्यायन्बहुलं तमः।**
**आत्मा हि जज्ञ आत्मनः स इरावत्यतितारिणी॥ ३॥**

सा०–पितरो जनका उत्पन्नेन पुत्रेण शश्वत्सर्वदा, लोकोद्वयेऽपि बहुलमभ्यधिकं तम ऐहिकमामुष्मिकं च दुःखमत्यायन् = अतिक्रामन्ति। तथा च बौधायन आह–

**पुदिति नरकस्याख्या दुःखं न नरकं विदुः।**
**पुत्तस्त्राणात्ततः पुत्रमिहेच्छन्ति परत्र च ॥ इति॥**

किञ्च हि = यस्मात्कारणात्पितुः 'पुत्र उत्पन्न' इत्युक्ते सति, पिता स्वस्मात्स्वयमेव जज्ञे = उत्पन्नः इत्युक्तं भवति। ततः पिता यथा स्वयं स्वकीयं दुःखं विनाशयति तथा पुत्रोऽप्येतद् दुःखं विनाशयतीति द्रष्टव्यम्। तस्मात्स पुत्र इरावती = अन्नयुक्ता, अतितारिणी = नदीसमुद्रादेरतितरणहेतुः, नौरिति शेषः। यथा नोर्दुर्घटं नद्यादिकं तारयत्येवं पुत्रोऽप्यैहिकमामुष्मिकं च दुःखं तारयतीत्यर्थः।

## ( ४ )

**चतुर्थीं गाथामाह–**

**किं नु मलं किमजिनं किमु श्मश्रूणि किं तपः।**
**पुत्रं ब्रह्माण इच्छध्वं स वै लोकोऽवदावदः॥ ४॥**

NOTES

सा०–अत्र मलाजिनश्मश्रुतपःशब्दैराश्रमचतुष्टयं विवक्षितम्। मलरूपाभ्यां शुक्रशोणिताभ्यां संयोगान्मलशब्देन गार्हस्थ्यं विवक्षितम्। कृष्णाजिन-संयोगादजिनशब्देन ब्रह्मचर्य विवक्षितम्। क्षौरकर्मराहित्यात् श्मश्रुशब्देन वानप्रस्थ्यं विवक्षितम्। इन्द्रियनियमसद्भवात्तपः शब्देन पारिव्रज्यं विवक्षितम्। मलं गार्हस्थ्यं किन्तु किं नाम सुखं करिष्यति, न किञ्चिदित्यर्थः। एवमुत्तरत्रापि योज्यम्। हे ब्राह्मणः, विप्रा विप्रक्षत्रियाद्याः सर्वे यूयं सुखहेतुत्वात् पुत्रमिच्छध्वम्। स वै स एव पुत्रोऽवदावदो लोकः। वदितुमयोग्यानि निन्दावाक्यानि अवदाः, तैर्वाक्यैः, न उद्यते = न कथ्यत इत्यवदावदः, अवदावदो दोषराहित्यान्निन्दानर्ह इत्यर्थः। तादृशो लोको भोगहेतुः पुत्रः। तस्मादाश्रमेभ्योऽप्याधिक्येन पुत्रेच्छा कर्तव्या। यद्यपि हरिश्चन्द्र एवात्र प्रष्टा, तथापि तेन सह ऋषीणां बहूनां सभायामवस्थानाद् ब्रह्माण इति सम्बोधनम्।

## ( ५ )

**पञ्चमीं गाथामाह–**

**अन्नं ह प्राणः शरणं ह वासो रूपं हिरण्यं पशवो विवाहाः।**
**सखा ह जाया कृपणं ह दुहिता ज्योतिर्ह पुत्रः परमे व्योमन्॥ ५॥**

सा०–अन्नादयो लोके सुखहेतुत्वेन प्रसिद्धाः। तथा हि शरीरे प्राणावस्थिति-हेतुत्वादन्नमेव प्राणः। वासः शीतोपद्रवाद्रक्षकत्वेन शरणं गृहसमानम्। हिरण्यं कर्णाभरणादिकं दृष्टिप्रियत्वाद्रूपसम्पादकम्। पशवो गवाश्वादयो विवाहविशेषेण निर्वाहकाः। जाया भोगे सहकारित्वात्सखा ह सखिस्वरूपैव। एवमेते सुखहेतुत्वेन प्रसिद्धां अपि तात्कालिकमल्पमेव सुखं प्रयच्छन्ति। दुहिता ह पुत्रीति कृपणं दुःखकारित्वाद् दैन्यहेतुः। तथा च स्मर्यते–

**सम्भवे स्वजनदुःखकारिका सम्प्रदानसमयेऽर्थहारिका।**
**यौवनेऽपि बहुदोषकारिका दारिका हृदयदारिका पितुः॥ इति॥**

पुत्रो ह पुत्रस्तु ज्योति स्वरूपं तमोनिवारकत्वेन स हि पितरं परमे व्योमन्नुत्कृष्ट आकाशे परब्रह्मस्वरूपेऽवस्थापयति। आकाशस्तल्लिङ्गादित्यनेन व्याससूत्रेण (१. १. १२ ब्र. सू.) आकाश-व्योमादिशब्दानां ब्रह्मपरत्वं निर्णीतम्। पुत्रस्य च ब्रह्मज्ञानहेतुत्वं पूर्वमेवामृतत्वं च गच्छतीत्यत्र प्रतिपादितम्।

NOTES

## ( ६ )

**षष्ठीं गाथामाह–**

> **पतिर्जायां प्रवशति गर्भो भूत्वा स मातरम्।**
> **तस्यां पुनर्नवो भूत्वा दशमे मासि जायते॥ ६॥**

सा०–पत्युराकारद्वयमस्ति। वर्तमानपुरुषाकार एको, रेतोरूपेण गर्भाकारा द्वितीयः। जायाया अप्याकारद्वयमस्ति। पतिरूपमाकारं प्रति जाया भवति। गर्भरूपमाकारं प्रति माता भवति। अतः स तादृशः पतिः स्वयं रेतोरूपेण गर्भो भूत्वा पूर्वमवस्थितां जायां भविष्यदाकारेण मातरं सतीं प्रविशति। तस्यां मातरि पुनर्नवो भूत्वा पूर्वमन्यस्यां मातुर्युत्पन्नो जरठः इदानीं पुनर्नूतनबालो भूत्वा यस्यामिदानींतन्यामस्यां मातरि गर्भवासे सति दशमे मास्तुत्पद्यते। तस्मात्पुत्रः स्वस्मादन्यो न भवति।

## ( ७ )

**सप्तमीं गाथामाह–**

> **तज्जाया जाया भवति यदस्यां जायते पुनः।**
> **आभूतिरेषा भूतिर्बीजमेतन्निधीयते॥ ७॥**

सा०–यद् यस्मात्कारणात् अस्यां गर्भधारिण्यामयं पिता पुत्ररूपेण पुनर्जायते, तत् तस्मात्कारणात् लोकप्रसिद्धा या जायाऽस्ति सा 'जायतेऽस्यामिति' व्युत्पत्त्या जायाशब्दवाच्या भवति। किं चैषा भूत्याभूतिशब्दाभ्यामभिधीयते। भवत्यस्यां पुत्ररूपेण पतिरित्येषा भूतिशब्दवाच्या। रेतोरूपेणाऽऽगत्य, अस्यां पुत्ररूपेण भवतीत्याभूतिशब्दवाच्या। एतदेतस्यां स्त्रियां बीजं रेतोरूपं निधीयते = प्रक्षिप्यते तस्मादुक्ताः शब्दा उपद्यन्ते।

## ( ८ )

**अष्टमीं गाथामाह–**

> **देवाश्चैतामृषयश्च तेजः समभरन्महत्।**
> **देवा मनुष्यानब्रुवन्नेषा वो जननी पुनः॥ ८॥**

सा०–एतामेतस्यां योषिति देवाश्च महर्षयश्च स्वकीयं महत्तेजो रेतोरूपं सारं समभरन् = पुत्रोत्पादनाय सम्पादितवन्तः। स्वमेव सम्पाद्य ततो

NOTES

मनुष्यानित्यब्रुवन्—हे मनुष्याः! येयमिदानीं जायारूपेण वर्तते सेयं पुनर्वो युष्माथ पुत्ररूपे जन्मनि जननी भवति।

## ( ९ )

**नवमीं गाथामाह—**

**नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुः।**
**तस्मात्तु पुत्रो मातरं स्वसारं चाधिरोहति॥ १॥**

सा०—लोको=लोकजन्यं सुखमपुत्रस्य नास्ति। न हि पुत्रदर्शनेन यत्सुखं तदन्यदर्शनेन क्वचिदपि दृश्यत इति यदस्ति, तत्सर्वे गोमहिष्यादयो जानन्ति यस्मात् तस्यादेव कारणात्पशुजातौ जातः पुत्रो = वत्सः, स्वकीयां मातरं भगिनीं वा पुत्रोत्पादनार्थमधिरोहति।

## ( १० )

**दशमीं गाथामाह—**

**एष पन्था उरुगायः सुशेवो, यं पुत्रिण आक्रमन्ते विशोकाः।**
**तं पश्यन्ति पशवो वयांसि च, तस्मात्ते मात्रापि मिथुनीभवन्ति॥ ११॥**

सा०—पुत्रिणः पुत्रवन्तो देवमनुष्यादयो विशोकाः=शोकरहिताः सन्तो, यं पन्थानं सुखानुभवरूपं मार्गमाक्रमन्ते प्राप्नुवन्त्येष पन्थाः = पुत्रसुखानुभवरूपो मार्गः, उरुगायः = उरुभिर्महद्भिः शास्त्रज्ञै राजामात्यादिभिश्च गीयते। तथा सुशेवः = सुष्ठु सेवितुं योग्यः, सुखाधिक्यस्य विद्यमानत्वात्। तं पुत्रसुखानुभवरूपं पशवो गवादयो वयांसि पक्षिणः संपश्यन्ति जानन्ति। तस्मात्ते पशुपक्ष्यादयः पुत्रसुखार्थं मात्रा सह मिथुनीभवन्ति, किमुतान्यया स्त्रिया सहेत्यर्थः।

**नारदेनोक्तां दशमीं गाथां निगमयति—**
**इति हास्मा आख्याय॥ १३॥**

सा०—हानेनैव प्रकारेणास्मै=तस्मै हरिश्चन्द्राय आख्याय उत्तरमभिधायावस्थित इति शेषः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये त्रयस्त्रिंशाध्याये प्रथमः खण्डः

NOTES

# हरिश्चन्द्रोपाख्यानम्

## द्वितीयः खण्डः

पुत्रनिमित्तलाभप्रतिपादिका नारदोक्ता दश गाथा उदाहृत्य पुत्र जन्मोपायोपदेशपरं नारदवाक्यमवतारयति–

**अथैनमुवाच–"वरुणं राजानमुपधाव, पुत्रो मे जायतां, तेन त्वा यजा इति॥"**

सा०–अथ पुत्रेच्छानिमित्तकथनानन्तरमेनं पुत्रार्थिनं हरिश्चन्द्रं नारद उवाच–हे हरिश्चन्द्र! वरुणं राजानमुपधाव = प्रार्थयस्व। येन प्रकारेण निश्चयः सोऽभिधीयते–हे वरुण! त्वत्प्रसादान्मे पुत्रो जायतां, ततस्तेन पुत्रेण त्वां यजै त्वामुद्दिश्य यज्ञं करवाणीति।

*प्रार्थनाप्रकारं नारदोपदेशमुक्त्वा हरिश्चन्द्रवृत्तान्तं दर्शयति–*

**'तथेति' स वरुणं राजानमुपससार–'पुत्रो मे जायतां, तेन त्वा यजा इति'। 'तथेति' तस्य पुत्रो जज्ञे रोहितो नाम।**

सा०–नारदोपदेशमङ्गीकृत्य हरिश्चन्द्रो वरुणमुपससार = प्रार्थयामास। स वरुणोऽपि तथास्त्विति तदीयपुत्रोत्पत्त्यै वरं दत्तवान्। तेन च वरेणोत्पन्नस्य रोहित इत्येतन्नामाभूत।

अथ बहुभिः पर्यायैर्वरुणस्योक्तिर्हरिश्चन्द्रस्य प्रत्युक्तिश्चेत्युभय प्रतिपाद्यते। तत्र प्रथमं पर्यायं दर्शयति–

**तं होवाच–'अजनि वै ते पुत्रो' यजस्व माऽनेनेति' स होवाच–'यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति, निर्दशो न्वस्त्वथ त्वा यजा इति'। 'तथेति'।**

सा०–तं हरिश्चन्द्रं वरुण उवाच–हे हरिश्चन्द्र ते पुत्रोऽजनि वै = उत्पन्न एव, अनेन पुत्रेण मामुद्दिश्य यागं कुर्विति। एवं वरुणेनोक्ते हरिश्चन्द्रः पुनः प्रत्युवाच–यागार्थः पशुर्यदा निर्दशो भवति, तदा स मेध्यो यागयोग्यो भवति। निर्गतान्यशौचदिनानि दशसंख्याकानि यस्मात्पशोः सोऽयं निर्दशः। तस्मादयं नु क्षिप्रं निर्दशोऽस्तु। अथानन्तरं त्वा प्रत्यहं यजा इत्येतद्वाक्यं वरुणस्तथा-स्त्वित्यङ्गीचकार।

*द्वितीयमुक्तिप्रत्युक्तिपर्यायं दर्शयति–*

NOTES

**स ह निर्दश आस। तं होवाच–'निर्दशोऽन्वभूद्, यजस्व माऽनेनेति।' स होवाच–'यदा वै पशोर्दन्ता जायन्तेऽथ स मेध्यो भवति। दन्तान्वस्य जायन्तामथ त्वा यजा इति'। 'तथेति'।**

सा०–दशदिनशौचापगमे शुद्धात्वाद्यथा यागयोग्यत्वं, तथा दन्तोत्पन्नत्वादवयवसम्पूर्त्या यागयोग्यत्वमित्यभिप्रायः। स्पष्टमन्यत्।

*तृतीयं पर्यायं दर्शयति–*

**तस्य ह दन्ता जज्ञिरे। तं होवाच–'अज्ञत वा अस्य दन्ताः, यजस्व माऽनेनेति।' स होवाच–'यदा वै पशोर्दन्ताः पद्यन्तेऽथ स मेध्यो भवति। दन्ता न्वस्य पद्यन्तामथ त्वा यजा इति।' 'तथेति'।**

सा०–अज्ञत वै = जाता एव। पद्यन्ते = पतन्ति। प्रथमोत्पन्नानां दन्तानामस्थायित्वेन मुख्यपशवयवत्वाभावात्तत्पाते सति पशोर्मेध्यत्वम्।

*चतुर्थं पर्यायं दर्शयति–*

**तस्य ह दन्ताः पेदिरे। तं होवाच–'अपत्सत वा अस्य दन्ताः, यजस्व माऽनेनेति।' स होवाच–'यदा वै पशोर्दन्ताः पुनर्जान्तेऽथ स मेध्यो भवति। दन्ता न्वस्य पुनर्जायन्तामथ त्वा यजा इति'। 'तथेति'।**

सा०–अपत्सत वै = पतिताः। पुनरुत्पन्नानां दन्तानां स्थिरत्वेन संपूर्णावयवत्वात्पशोर्मेध्यत्वम्।

*पञ्चमं पर्यायं दर्शयति–*

**तस्य ह दन्ताः पुनर्जज्ञिरे। तं होवाच–'अज्ञत वा अस्य पुनर्दन्ताः, यजस्व माऽनेनेति।' स होवाच–'यदा वै क्षत्रियः सांनाहुको भवत्यथ स मेध्यो भवति। संनाहं नु प्राप्नोत्वथ त्वा यजा इति।' 'तथेति'।**

सा०–अज्ञत वै = जाता एव। पश्वन्तरस्य पुनर्दन्तोत्पत्तिमात्रेण मेध्यत्वेऽप्यस्य पशोः क्षत्रियत्वात्स्वजात्यु चितधनुर्बाणकवचादिसंनाहशीलित्वे सति जात्युचितव्यापारसम्पूर्तौ मेध्यत्वम्। तस्मान्नु क्षिप्रमेवासौ संनाहं प्राप्नोत्यनन्तरमेव यजा इत्युत्तरं वरुणोऽङ्गीचकार।

*षष्ठं पर्यायं दर्शयति–*

**स ह संनाहं प्रापत्। तं होवाच–'संनाहं नु प्राप्नोद्यजस्व माऽनेनेति।' स 'तथेति' उक्त्वा पुत्रमामन्त्रयामास–'तत, अयं व मह्यं त्वामददाद्, हन्त त्वाऽहमिमं यजा इति।'**

NOTES

सा०—संनाहप्राप्तेरूर्ध्वं स हरिश्चन्द्रो वरुणोक्तिमङ्गीकृत्य पुत्रमामन्त्र्यैव-मुवाच। उपलालनार्थं पुत्रे पितृवाचितशब्दप्रयोगः। हे तत, हे पुत्र, अयमेव वरुणो मह्यं त्वां पुत्रवरेण दत्तवान्। हन्त, दुष्टोऽहमिमं वरुणं यत्त्वया पुत्रेण यजै यागरूपां पूजां करवाणीति हरिश्चन्द्रस्योक्तिः।

*अथ रोहितनाम्नः पुत्रस्य कृत्यं दर्शयति—*

**स ह नेत्युक्त्वा धनुरादायारण्यमुपातस्थौ। स संवत्सरमरण्ये चचार॥ १४॥**

सा०—स ह स खलु रोहिताख्यः पुत्रः पितुर्वाक्य निषिध्य स्वरक्षणार्थं धनुः स्वीकृत्यारण्यं प्रत्युपगतोऽभूत्। कस्मिश्चिदरण्ये नैरन्तर्येण स रोहितसंवत्सरं चचारेति।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश
ऐतरेयब्राह्मणभाष्ये त्रयस्त्रिंशाध्याये द्वितीयः
खण्डः ॥ २॥ (१४) (१३७)

# हरिश्चन्द्रोपाख्यानम्

## तृतीयः खण्डः

*रोहितस्यारण्ये संवत्सरचरणानन्तरं भाविनं हरिश्चन्द्रादीनां वृत्तान्तं दर्शयति—*

**अथ हैक्ष्वाकं वरुणो जग्राह। तस्य होदरं जज्ञे। तदु ह रोहितः शुश्राव। सोऽरण्याद् ग्राममेयाय। तमिन्द्रः पुरुषरूपेण पर्येत्योवाच—**

**'नानाश्रान्ताय श्रीरस्तीति रोहित शुश्रुम।**
**पापो नृषद्वरो जन इन्द्र इच्चरतः सखा॥ १॥**

**चरैवेति।'**

सा०—अथ रोहितस्यारण्ये संवत्सरवासानन्तरमेवैक्ष्वाकमिक्ष्वाकुवंशोत्पन्नं हरिश्चन्द्रं वरुणो देवो रोगरूपेण जग्राह। वरुणेन गृहीतस्य हरिश्चन्द्रस्योदरं जज्ञे। जलेन पूरितमुच्छूनं महोदरनामकं रोगस्वरूपमुत्पन्नम्। तदु ह तदपि सर्वमरण्ये स्थितो रोहितः पुत्रो मनुष्यमुखाच्छुश्राव। श्रुत्वा च स रोहितः पितरं द्रष्टुमरण्याद् ग्रामं प्रत्याजगाम। आगच्छतं रोहितं मार्गमध्ये इन्द्रः केनचिद् ब्राह्मणपुरुषरूपेण प्राप्य इदमुक्तवान्। आ = समन्तात् श्रान्तः आश्रान्तः, सर्वत्र

NOTES

पर्यटनेन श्रान्ति प्राप्तः, तद्विपरीतोऽनाश्रान्तः = एकत्रैव निवासशीलः—तादृशाय। तथाविधस्य पुरुषस्य श्रीः बहुविधा सम्पत् नास्ति। यद्वा, नानेति पदच्छेदः। श्रान्ताय = सर्वत्र पर्यटनेन श्रान्तस्य, नाना श्रीर्बहुविधा सम्पदस्तीत्यनेन प्रकारेण, रोहित! वयं नीतिकुशलानां पुरुषाणां मुखाच्छुश्रुम। वरो जनो विद्यादिभिः श्रेष्ठोऽपि पुरुषो नृषत्पापो, नृषु मनुष्येषु सीदतीति नृषत्। श्रेष्ठोऽपि बन्धुगृहेषु सर्वदावस्थितः, तैरवज्ञातः पापस्तुच्छो भवेत्। अतस्तव पितृगृहे वासो न युक्तः। न चारण्ये चरतो मम सहायो नास्तीति शङ्कनीयम्। इन्द्र एव, परमेवश्वर एव चरतस्तव सखा भविष्यति। तस्माच्चरैव सर्वथाऽरण्ये चरस्वेत्येवमुवाच। एवं बहुष्वपि पर्यायेषु द्रष्टव्यम्।

*तत्रेन्द्र-रोहितसंवादे प्रथमं पर्यायं दर्शयित्वा द्वितीयं पर्यायं दर्शयति—*

**'चरैवेति' वै मा ब्राह्मणोऽवोचदिति ह द्वितीयं संवत्सरमरण्ये चचार। सोऽरण्याद् ग्राममेयाय तमिन्द्रः पुरुषरूपेण पर्येत्योवाच—**

**'पुष्पिण्यौ चरतो जङ्घे भूष्णुरात्मा फलग्रहिः।**
**शेरेऽस्य सर्वे पाप्मानः श्रमेण प्रपथे हताः॥ १॥'**

**चरैवेति।'**

सा०—ब्राह्मणरूपस्येन्द्रस्य वाक्यं श्रुत्वा ब्राह्मणोऽयमरण्ये चरैवेत्येवं मामुक्तवानिति मनसि ब्राह्मणवाक्ये महान्तमादरं कृत्वा पुनरप्येकं संवत्सरमरण्ये चरित्वा पश्चात्पितरं द्रष्टुं ग्रामं तमागच्छन्तं पुनरपीन्द्रो ब्राह्मणरूपेणागत्यैवमुवाच। चरतः = पर्यटनं कुर्वतः पुरुषस्य, जङ्घे पुष्पिण्यौ भवतः। यथा पुष्पयुक्तो वृक्षः शाखा लता वाऽथवा सुगन्धोपेता सेव्या भवत्येवं चरतो जङ्घे श्रमजयेन सेव्ये भवतः। तथैवात्मा मध्यदेहो भूष्णुर्वर्धिष्णुः फलग्रहिरारोग्यरूपफलयुक्तो भवति। यथा—वर्धमानो वृक्षः कालेन फलानि गृह्णात्येवं चरतः पुरुषस्य बीजादिदीपनादिपाटवेन मध्यदेह आरोग्यरूपं फलं गृह्णाति। तथैवास्य चरतः पुरुषस्य सर्वे पाप्मानः सर्वपापानि प्रपथे प्रकृष्टे तीर्थक्षेत्रादिमार्गे श्रमेण तत्तद् देवतादिदर्शने तीर्थयात्रादिप्रयासेन हता विनाशिताः सन्तः शेरे शेरते, शयाना इव भवन्ति। यथा—शयानाः पुरुषाः स्वकार्यं कृषिवाणिज्यादिकं कर्त्तुमशक्ता एवं पुण्येन विनष्टाः पात्मानो नरकं दातुमसमर्था इत्यर्थः। तस्मात्सर्वथाऽरण्ये चर, न पितुर्गृहेऽवतिष्ठस्व।

*तृतीयं पर्यायं दर्शयति—*

**'चरैवेति' वै मा ब्राह्मणोऽवोचदिति ह तृतीयं संवत्सरमरण्ये चचार। सोऽरण्याद् ग्राममेयाय। तमिन्द्रः पुरुषरूपेण पर्येत्योवाच—**

NOTES

**'आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः।**
**शेते निपद्यमानस्य चराति चरतो भगः॥ ३॥'**

**चरैवेति।'**

सा०–भगः = सौभाग्यमासीनस्य = उपविष्टस्य, आस्ते = तथैव तिष्ठति, न तु वर्धते। अभिवृद्धिहेतोरुद्योगस्याभावात्। तिष्ठतः = उपवेशनं परित्यज्योत्थापनं कुर्वतः पुरुषस्य, भगः = ऊर्ध्वोऽभिवृद्धेरुन्मुखस्तिष्ठति। कृषिवाणिज्याद्युद्योगस्य सम्भावितत्वात् निपद्यमानस्य। भूमौ शयानस्य भागः शेते = निद्रां करोति। विद्यमानधनरक्षादिचिन्ताया अप्यभावात् सर्वथैव विनश्यति। चरतस्तेषु तेषु देशेष्वर्जनार्थं पर्यटनं कुर्वतः पुरुषस्य भगः सौभाग्यं चरति = दिने दिने वर्धते। तस्मात्त्वं चरैवेति, न तु एकत्र तिष्ठ।

*चतुर्थं पर्यायं दर्शयति–*

**'चरैवेति' वै मा ब्राह्मणोऽवोचदिति ह चतुर्थं संवत्सरमरण्ये चचार। सोऽरण्याद् ग्राममेयाय। तमिन्द्रः पुरुषरूपेण पर्येत्योवाच–**

**'कलिः शयानो भवति संजिहानस्तु द्वापरः।**
**उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरन्॥ ४॥**

**चरैवेति।'**

सा०–चतस्रः पुरुषस्यावस्थाः। निद्रा, तत्परित्यागः, उत्थानं, सञ्चरणं चेति, ताश्चोत्तरश्रेष्ठत्वात्कलिद्वापरत्रेताकृतयुगैः समानाः। ततश्चरणस्य सर्वोत्तमत्वाच्चरैवेति।

*पञ्चमं पर्यायं दर्शयति–*

**'चरैवेति' वै मा ब्राह्मणोऽवोचदिति ह पञ्चमं संवत्सरमरण्ये चचार सोऽरण्याद् ग्राममेयाय। तमिन्द्रः पुरुषरूपेण पर्येत्योवाच–**

**चरन्वै मधु विन्दति चरन् स्वादुमुदुम्बरम्।**
**सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन्॥ ४॥**

**चरैवेति'–**

सा०–चरन्नेव पुरुषः क्वचिद् वृक्षाग्रे मधु–माक्षिकं लभते। क्वचित्स्वादु मधुरमुदुम्बरादिफलविशेषं लभते। एतदुभयमुपलक्षणम्। तत्र तत्र विद्यमानं भोगविशेषं लभते। तत्र सूर्यो दृष्टान्तः। यः सूर्यः सर्वत्र चरन्नपि न तन्द्रयते = कदाचिदप्यलसो न भवति, तस्य सूर्यस्य श्रेमाणं श्रेष्ठत्वं जगद्वन्द्यत्वं पश्य। तस्माच्चरैव।

NOTES

*इत्थमिन्द्रकृतेन रोहितोपदेशेन चरतो रोहितस्य स्वजीवने पितुरारोग्ये च कारणभूतं श्रेयोलाभं दर्शयति–*

**'चरैवेति' वै मा ब्राह्मणोऽवोचदिति ह षष्ठं संवत्सरमरण्ये चचार। सोऽजीगर्त सौयवसिमृषिमशनया परीतमरण्य उपेयाय।**

*अथाजीगर्तरोहितयोः संवादं दर्शयति–*

**तस्य ह त्रयः पुत्रा आसुः–शुनःपुच्छः, शुनः शेपः, शुनोलाङ्गूल इति। तं होवाच–'ऋषेऽहं ते शतं ददाम्यहम्, एषामेकेनात्मानं निष्क्रीणा इति।' स ज्येष्ठं पुत्रं निगृह्णान उवाच 'न न्विममिति।' नो एवेममिति' 'इति कनिष्ठं माता। तौ ह मध्यमे संपादयांचक्रतुः शुनःशेपे। तस्य ह शतं दत्त्वा स तमादाय सोऽरण्याद् ग्राममेयाय।**

सा०–तस्याजीगर्तस्य शुनःपुच्छादिनामकास्त्रयः पुत्रा आसुः। पुत्रवन्तमृषिं रोहित उवाच–हे ऋषे! ते तुभ्यमहं गवां शतं ददामि। (दत्त्वा चाहमेषां पुत्राणां मध्य एकेन केनचित्पुत्रेणात्मानं मद्देहं वरुणान्निष्क्रीणे मूल्यं दत्त्वाऽऽत्मानं मोचयामीति। एवमुक्तः सोऽजीगर्तो) ज्येष्ठं पुत्रं शुनःपुच्छनामकं हस्तेन निगृह्णानः स्वसमीपे समाकर्षन् रोहितं प्रत्येवमुवाच। तुभ्यमेकः पुत्रो दीयत, इमं तु शुनः पुच्छं तु न ददामि, मम प्रियत्वादिति। ततो माता कनिष्ठं हस्तेन गृहीत्वैवमुवाच–इमं शुनोलाङ्गूलं मम प्रियं नो एव सर्वथा न ददामीति। ततस्तावुभौ मातापितरौ मध्यमे पुत्रे शुनःशेपे दानं सम्पादयाश्चक्रतुरङ्गी-कृतवन्तौ। ततस्तस्याजीगर्तस्य स रोहितो गवां शतं दत्त्वां तं शुनः शेपमादायावस्थितः। ततः स रोहितस्तेन शुनःशेपेन सहारण्यात्स्वकीयं ग्रामं प्रत्याजगाम।

*तदागमनादूर्ध्वकालीनं (? कालिकं) वृत्तान्तं दर्शयति–*

**स पितरमेत्योवाच–'तत, हन्त, अहमनेनात्मानं निष्क्रीणा इति।' स वरुणं राजानमुपससार–'अनेन त्वा यजा इति'। 'तथेति' 'भूयान्वै ब्राह्मणः क्षत्रियादिति' वरुण उवाच। तस्मा एतं राजसूयं यज्ञक्रतुं प्रोवाच। तमेतमभिषेचनीये पुरुषं पशुमालेभे॥ १५॥**

सा०–स रोहितः पितरमागत्यैवमुवाच–हे तत पितः, हन्त आवयोर्हर्षः सम्पन्नः। अहमनेन शुनःशेपरूपेण मूल्येन आत्मानं मद्देहं वरुणान्निष्क्रीणं मूल्यं दत्त्वात्मानं मोचयामीत्यर्थः। तथोक्ते स हरिश्चन्द्रो वरुणमुपेत्यानेन शुनःशेपेन ब्राह्मणेन त्वा त्वां यक्ष्यामीति उक्तवान्। स वरुणोऽपि 'तथेति' अङ्गीकृत्यैव-मुवाच–क्षत्रियात्त्व पुत्राद्रोहितादप्ययं ब्राह्मणो भूयानभ्यधिक एव, मम प्रिय इति। उक्त्वा तस्मै हरिश्चन्द्राय कर्तव्यत्वे राजसूयमुपदिदेश च। स हरिश्चन्द्रो

NOTES

राजसूयं प्रक्रम्य तस्य मध्ये योऽयमभिषेचनीयारव्यं एकाहःसोमयागस्तस्मिंस्तमेतं शूनः शेपं पुरुषं पशुमालेभे। सवनीयपशुत्वेनालब्धुं निश्चितवान्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश
ऐतरेयब्राह्मणभाष्ये त्रयस्त्रिंशाध्याये तृतीयः
खण्डः ।। ३।। (१५) (१३८)

# हरिश्चन्द्रोपाख्यानम्

## चतुर्थः खण्डः

*हरिश्चन्द्रस्य राजसूयानुष्ठानं दर्शयति–*

**तस्य ह विश्वामित्रो होताऽऽसीत्, जमदग्निरध्वर्युर्वसिष्ठो ब्रह्मा, अयास्य उद्गाता। तस्मा उपाकृताय नियोक्तारं न विविदुः स होवा-चाजीगर्त्तः सौयवसिः–'मह्यमपरं शतं दत्त अहमेनं नियोक्ष्यामीति'। तस्मा अपरं शतं ददुः। तं निनियोज।**

सा०–विश्वामित्रादयो महर्षयस्तस्य हरिश्चन्द्रस्य यागे राजसूये होत्रादयश्चत्वारो महर्त्विज आसन्। तत्र जमदग्निरध्वर्युः अभिषेचनीये सोमयागे तं शुनःशेपं सवनीयपशुत्वेन उपाकृतवान्। बहिर्युक्तया प्लक्षशाखया मन्त्रपुरःसरं समुपस्पृश्य स्वीकार उपाकरणम्। तत ऊर्ध्वे यूपबन्धनं नियोजनम्। तस्य क्रूरकर्मत्वाद-ध्वर्युनं नियोजने प्रवृत्तः। तत उपाकृतायास्मै उपाकरणेन संस्कृतस्य शौ (शु.) नःशेपस्य नियोक्तारं यूपे बन्धनकर्तारं क्रूरं कश्चिदपि पुरुषं न विविदुः न लोभिरे। तदानीं सूयवसस्य पुत्रः शुनः शेषस्य पिता सोऽजीगर्त्त (उवाच) मह्यं पूर्वस्माच्छतादपर गोशतं (हे यजमानर्त्विजः) दत्त। ततोऽहमेनं शुनः शेपं यूपे नियोक्ष्यामि रशनया कटयां शिरसि पादयोर्बद्ध्वा रशनाग्रस्य यूपे बन्धनं नियोजनं तदहं करिष्यामीति। तस्मा अजीगर्ताय अपरं गोशतं दहुः। तं च शुनः शेपं सोऽजीगर्तो निनियोज। धातोर्द्विर्भावं परित्यज्योपसर्गस्य द्विर्भावश्छान्दसः।

*अथ विशवनप्रवृत्तिं दर्शयति–*

**तस्मा उपाकृताय नियुक्तायाऽऽप्रीताय पर्यग्निकृताय विशसितारं न विविदुः। स होवा चाजीगर्तः सौयबसिः–'मह्यमपरं शतं दत्त, अहमेनं विशसिष्यामीति।' तस्मा अपरं शतं ददः। सोऽसि निःशान एयाय।**

NOTES

सा०—उपाकरणनियोजने पूर्वमुक्ते। आप्रीसंज्ञिताभिरेकादशभिः प्रयाजयाज्याभिर्यद्यजनं तदाप्रीणनम्। दर्भरूपेणोल्मुकेन त्रिःप्रदक्षिणीकरणं तत् पर्यग्निकरणम्। तथाविधसंस्कारचतुष्टययुक्ताय तस्मै तस्य शुनःशेपस्य विशसितारं हिंसितारं पुरुषं क्रूरात्मानं कञ्चिदपि पुरुषं न लेभिरे। ततोऽजीगर्तः पूर्ववदपरं गोशतं गृहीत्वा मारयितुमसि खड्गं निःशानो निशितं तीक्ष्णं कुर्वन्नेवेयाय जगाम।

*पितुरजीगर्तस्य (शुनः शेपस्य?) वृत्तान्तं दर्शयति–*

**अथ ह शुनःशेप ईक्षांचक्रे–'अमानुषमिव वै मा विशसिष्यन्ति। हन्ताहं देवता उपधावामीति।' स प्रजापतिमेव प्रथमं देवतानामुपससार–'कस्य नूनं कतमस्यामृतानाम्' इत्येतयर्चा।**

सा०—अथ पितुः पुत्रमारणोद्योगानन्तरं शुनःशेपः पुत्रो मनस्येवमीक्षांचक्रे विचारितवान्। अन्यत्र पर्यग्निकृतं पुरुषमारण्यांश्चोत्सृजन्ति। अहिंसाया इति श्रुतेः। पर्यग्निकरणदूर्ध्वं मनुष्यं परित्यजन्ति। एते तु माममानुषमिव मनुष्यव्यतिरिक्तमजादिपशुमिव विशसिष्यन्ति मारयिष्यन्ति। हन्त हा कष्ट-मेतत्सम्पन्नम्। अहमितः परं रक्षार्थं देवता उपाधावामि भजामीति विचार्य देवानां मध्ये प्रथमं मुख्यं प्रजापतिमेव कस्य नूनमित्यृचा उपससार सेवितवान्।

*तस्य प्रजापतेः सहकारित्वेनाग्नेः सेवां दर्शयति–*

**तं प्रजापतिरुवाच–'अग्निर्वै देवानां नेदिष्ठस्तमेवोपधावेति।' सोऽग्निमुपससार–अग्नेर्वयं प्रथमस्यामृतानामित्येतयर्चा।**

सा०—तं सेवकं शुनः शेपं प्रजापतिरेवमुक्तवान्। अग्निः सर्वेषां देवानां नेदिष्ठो हविर्वहनेनातिसमीपवर्ती। अतस्तमेवोपास्स्वेत्युक्तः शुनःशेपोऽग्नेर्वयमित्मृ-चाऽग्निमुपासितवान्।

*तस्य चाग्नेः सहकारित्वेन सवितुरुपासनं दर्शयति–*

**समग्निरुवाच–'सविता वै प्रसवानामीशे, तमेवोपधावेति।' स सवितारमुपससार–'अभित्वा देव सवितः' इत्येतेन तृचेन।**

सा०—प्रसवानां सर्वेषु कार्येषु प्रेरणारूपाणामनुज्ञानात्सवितेशः स्वामी भवति। तस्मात्तमेवोपधावेति अग्निनोपदिष्टोऽभित्वेति तृचेन सवितारमुपा सितवान्।

*तस्य च सवितुः सहकारित्वेन वरुणस्योपासनं दर्शयति–*

NOTES

**तं सवितोवाच–'वरुणाय व राज्ञे नियुक्तोऽसि, तमेवोपधावेति।' स वरुणं राजानमुपससारात उत्तराभिरेकत्रिंशता।**

सा०–हे शुनःशेप, वरुणार्थं त्वं यूपे बद्धोऽस्यतो वरुणमुपास्स्वेति सवित्रोक्तः पूर्वस्मात्सवितृविषयात्तृचादुत्तराभिरेकत्रिंशत्सङ्ख्याकाभिर्ऋग्भिर्व-रुणमुपासितवान्। 'न हि ते क्षत्रम्।' (ऋ. सं. १. २४. ६) इत्याद्याः सूक्तशेषभूता दशर्चो, 'यच्चिद्धि ते विशः' (१. २५. १) इत्यादिकमेकविंशत्यृचं सूक्तमित्येवमेकत्रिंशत्सङ्ख्या दष्टव्या।

*तस्य च वरुणस्य सहकारित्वेन पुनरप्यग्नेरुपासनं दर्शयति–*

**तं वरुण उवाच–'अग्निर्वै देवानां मुखं सुहृदयतमः, तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति।' सोऽग्निं तुष्टावात उत्तराभिर्द्वाविंशत्या।**

सा०–अयमग्निः सर्वेषां देवानां मुखं मुखस्थानीयः। अग्निद्वारेणैव सर्वैर्देवैर्हविःस्वीकारात्। अत एव प्रीत्या हविर्वहनादतिशयेन सुहृदयः। सुहृदयतमं तमग्निं नु क्षिप्रं स्तुहीति वरुणेनोक्तः पूर्वोक्ताभ्य ऋग्भ्य उत्तराभिर्द्वाविंशति-सङ्ख्याकाभिर्ऋग्भिरग्निं तुष्टाव। 'वसिष्वाही' त्यादिकं (१. २६. १–१०) दशर्चं सूक्तम्। 'अश्वं नत्वा' (१. २७. १-१३) इत्यादिकं त्रयोदशर्चं सूक्तम्। तत्रान्त्यां पारित्यज्य शसिष्वसूक्तद्वयगता ऋचौ द्वाविंशतिसङ्ख्याकाः।

*अग्नेः सहकारित्वेन विश्वेषां देवानामुपासनं दर्शयति–*

**तमग्निरुवाच–'विश्वान्नु देवान्स्तुह्यथ त्वोत्स्रक्ष्याम' इति। स विश्वान्देवांस्तुष्टाव 'नमो महद्भ्यो नमो अर्भकेभ्य' इत्येतयर्चा।**

सा०–यद्यपि वरुणपाशेन बद्धत्वाद्वरुण एव शुनःशेपमुत्स्रष्टुं समर्थस्तथापि अग्न्यादीनां सहकारित्ववचनं दार्ढ्यार्थं द्रष्टव्यम्। विश्वेदेवा गणरूपा न भवन्ति, किन्तु सर्वे देवाः। तान्नमो महद्भ्य इत्येतया ऋचोपासितवान्।

*तेषां न विश्वेषां देवानां सहकारित्वेनेन्द्रस्योपासनं दर्शयति–*

**तं विश्वेदेवा ऊचुः 'इन्द्रो वै देवानामोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमः, तं नु स्तुह्यथ त्वोत्स्रक्ष्याम' इति। स इन्द्रं तुष्टाव 'यच्चिद्धि सत्य सोमपा' इति चैतेन सूक्तेनोत्तरस्य च पञ्चदशभिः।'**

*सा०–ओजोबलादिशब्दाः पूर्वाचार्यैरेवं व्याख्याताः–*

**ओजो दीप्तिर्बलं दाक्ष्यं प्रसह्यकरणं सहः।**
**सुजनः सम्पारयिष्णुरुपक्रान्तसमाप्तिकृत्॥ इति॥**

NOTES

इष्ठप्रत्ययतमप्प्रत्याभ्यां तत्र तत्रातिशय उच्यते। तादृशमिन्द्रं 'यच्चिद्धि सत्यं सोमपा' इत्यनेन सप्तर्चेन सूक्तेनोत्तरस्मिन्नपि 'आव इन्द्रम्' इत्यादिके द्वाविंशत्यृचे सूक्ते पञ्चदशभिर्ऋग्भिश्च तुष्टाव। पूर्वमप्यनुग्रहेण चरैवेत्येवमिन्द्रो रोहितं प्रत्युपदिदेश।

*तस्योपदेशस्य फलपर्यवसायित्वमनुस्मरतस्तस्येन्द्रस्य शुन:शेपस्तुतौ प्रीत्यतिशयं दर्शयति–*

**तस्मा इन्द्रः स्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ तमेतया प्रतीयाय 'शश्वदिन्द्र' इति।**

सा०–शुन:शेपेनेन्द्रः स्तूयमानः प्रीतो भूत्वा। तस्मै शुनः शेपाय सुवर्णमयं दिव्यं रथमारोहणार्थं स्वकीयेन मनसैव ददौ। शुन:शेपोऽपि तदीयमनुग्रहमवगत्य पूर्वोक्ताभ्यः पश्चदशभ्य उत्तरया 'शश्वदिन्द्र इत्येतयर्चा तं रथं प्रतीयाय मनसैव प्रतिजगाम।'

*इन्द्रस्य सहकारित्वेनाश्विनोरुपासानं दर्शयति–*

**तमिन्द्र उवाच–अश्विनौ नु स्तुह्यथ त्वात्स्त्रक्ष्याम इति। सोऽश्विनौ तुष्टावात उत्तरेण तृचेन।**

सा०–पूर्वोक्तायाः 'शश्वदिन्द्र' इत्यस्या उत्तरेण 'अश्विनावश्वावत्या' (१. ३०. १७) इति तृचेनाश्विनो स्तुतवान्।

*अश्विनोः सहकारित्वेनोषसः उपास्ति दर्शयति–*

**तमश्विना ऊचतुः–'उषसं नु स्तुह्यथ त्वोत्स्त्रक्ष्याम इति।' स उषसं तुष्टावात उत्तरेण तृचेन।**

सा०–'कस्त उष' (१. ३०. २०) इत्यादिक उत्तरस्तृचः।

*अथोक्तानां सर्वासां देवतानामनुग्रहेण शुन:शेपस्य बन्धमोक्ष हरिश्चन्द्रस्यारोग्यं च दर्शयति–*

**तस्य ह स्मर्च्यृच्युक्तायां (स्म ऋषि उक्तायां) वि पाशो मुमुचे, कनीय ऐक्ष्वाकस्योदरं भवत्युत्तमस्यामेव ऋच्युक्तायां विपाशो मुमुचेऽगद ऐक्ष्वाक आस॥ १६॥**

सा०–तस्य पूर्वोक्तस्य तृचस्त सम्बन्धिन्यामृचि ऋषि एकैकस्यामृच्युक्तायां क्रमेण शुन:शेपस्य पाशो विमुमुचे = विशेषेण मुक्तोऽभूत्। ऐक्ष्वाकस्य हरिश्चन्द्रस्य यन्महोदरं तदपि क्रमेण कनीयोऽत्यल्पं भवति। उत्तमस्यामृच्युक्तायां।

NOTES

पाशो विमुमुच एव सर्वात्मना मुक्तोऽभूत्। ऐक्ष्वाकोऽप्यगदो विशेषेण रोगरहित आस।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश
ऐतरेयब्राह्मणभाष्ये त्रयस्त्रिंशाध्याये चतुर्थः
खण्डः ॥४॥ (१६) (१३९)

# हरिश्चन्द्रोपाख्यानम्

## पञ्चमः खण्डः

*बन्धनान्मुक्तस्य शुनःशेपस्योत्तरकालीनं वृत्तान्तं दर्शयति–*

**तमृत्विज ऊचुः–'त्वमेव नोऽस्याह्नः संस्थामधिगच्छे'ति। अथ हैतं शुनःशेपोऽञ्जः सवं ददर्श। तमेताभिश्चतसृभिरभिसुषाव–'यच्चिद्धि त्वं गृहे गृहे' इति। अथैनं द्रोणकलशमभ्यवनिनाय–'उच्छिष्टं चम्बोर्भर' इत्येतया ऋचा। अथ हास्मिन्नन्वारब्धे पूर्वाभिश्चतसृभिः स स्वाहाकाराभिः जुहवाञ्चकार। अथैनमवभृथमभ्यवनिनाय–'त्वं नो अग्ने वरुणस्य विद्वान्' इत्येताभ्याम्। अथैनमत ऊर्ध्वमग्निमाहवनीयमुपस्थापयाञ्चकार– 'शुनश्चिच्छेपं निदितं सहस्रात्' इति।**

सा०–देवतानुग्रहयुक्तं तं शुनःशेपं विश्वामित्रादयः सर्वे ऋत्विज एवमूचुः, हे शुनःशेप! त्वमेव नोऽस्माकमस्याह्नोऽभिषेचनीयाख्यस्य संस्थां समाप्तिमधिगच्छ = प्राप्नुहि। अनुष्ठापयेत्यर्थः। तैरेवमुक्ते सत्यनन्तरं शुनःशेप एतमभिषेचनीयाख्यं सोमयागमञ्जःसवं ददर्श। अञ्जसर्जुमार्गेण सवः सोमाभिषवो यस्मिन्यागे सोऽञ्चःसवस्तादृशं प्रयोगकारं निश्चितवान्। निश्चित्य च तं सोमं यच्चिद्धीत्यादिभिश्चतसृभिर्ऋग्भिरभिषुतं कृतवान्। अथैनमभिषुतं सोममेतयोच्छिष्टं चम्वोरित्यृचा द्रोणकलशमभिलक्ष्यावनिनाय द्रोणकलशे प्रक्षिप्तवान्।

अथानन्तरमस्मिन्हरिश्चन्द्रेऽन्वारब्धे शुनः शेपदेहमुपस्पृष्टवति सत्युक्ताभ्य ऋग्भ्यः पूर्वाभिर्यत्र ग्रावेत्यादिभिश्चतसृभिर्ऋग्भिः स्वाहाकारसहिताभिः सोमं जुहवाञ्चकार। यत्र ग्रावेत्यादिकं सूक्तं नवर्चं तत्र यच्चिद्धीति पञ्चमी तागारभ्य चतसृभिर्ऋग्भिरभिषवः। उच्छिष्टमित्यादिका नवमी तथा द्रोणकलशे प्रक्षेपः। यत्र ग्रावेत्यादिभिश्चतसृभिर्होम इत्येवं कृत्स्नस्य सूक्तस्य विनियोगः।

NOTES

अथ होमानन्तरमेव कर्तव्यमवभृथमभिलक्ष्यावनिनाय सर्वमवभृथसाधनं तद्देशे नीत्वा त्वं नो अग्न इत्यादिकाभ्यामृग्भ्यामवभृथयागं कृतवान्। अथ तथा कृत्वा तत ऊर्ध्वमेनमाहवनीयमग्नि शुनश्चिदित्यादिनोपस्थापयाञ्चकार हरिश्चन्द्रमुपस्थाने प्रेरयामास। सोऽयमञ्जःसवः। इष्टिपशुसाङ्कर्यमन्तरेणाञ्जसर्जुमार्गेणानुष्ठितत्वात्।

*विश्वामित्राजीगर्तयोः कञ्चित्संवादं दर्शयति–*

**अथ ह शुनःशेपो विश्वामित्रस्याङ्कमाससाद। स होवाचाजीगर्त्तः सौयवसिः–'ऋषे, पुनर्मे पुत्रं देही'ति। 'नेति' होवाच विश्वामित्रो, 'देवा वा इमं मह्यमरासते'ति। स ह देवरातो वैश्वामित्र आस। तस्यते कापिलेयबाभ्रवाः।**

सा०–अथाभिषेचनीयसमाप्तेरनन्तरं हरिश्चन्द्रसहितेष्वृत्विक्षु विस्मितेषु स शुनःशेप इत ऊर्ध्वं कस्य पुत्रोऽस्त्विति विचारे सति, तदीयेच्छैव नियामिकेति महर्षीणां वचनं श्रुत्वा शुनःशेपः स्वेच्छया विश्वामित्रपुत्रत्वमङ्गीकृत्य सहसा तदीयमङ्कमाससाद। पुत्रो हि सर्वत्र पितुरङ्के निषीदति। तदानीं सूंयवसपुत्रोऽजीगर्त्तो विश्वामित्रं प्रत्येवमुवाच। हे महर्षे, मदीयपुत्रमेनं पुनरपि मह्यं देहीति। स विश्वामित्रो नेति निराकृत्यैवमुवाच–प्रजापत्यादयो देवो एवेमं शुनःशेपं मह्यमरासत = दत्तवन्तः, तस्मात्तुभ्यं न दास्यामीति। स च शुनःशेपो देवैः दत्तत्वाद् देवरात इति नामधारी विश्वामित्रपुत्र एवास। तस्य च देवरातस्यैते कपिलगोत्रोत्पन्ना बभ्रुगोत्रोत्पन्नाश्च बन्धवोऽभवन्।

*अथ शुनःशेपाजीगर्तयोः संवादं दर्शयति–*

**स होवाचाजीगर्तः सौयवसिः–'त्वं वेहि, विह्वयावहा' इति। स होवाच अजीगर्तः सौयवसिः–**

**'आङ्गिरसो जन्मनास्याजीगर्तिः श्रुतः कविः।**
**ऋषे पैतामहात्तन्तोर्मापगाः पुनरेहि माम्'॥ १॥ इति।**

*स होवाच शुनः शेपः–*

**'आदर्शुस्त्वा शासहस्तं न यच्छूद्रेष्वलप्सत।**
**गवां त्रीणि शतानि त्वमवृणीथा मदङ्गिरः'॥२॥ इति।**

सा०–विश्वामित्रेण निराकृतः सोऽजीगर्तः शुनःशेपं प्रत्येवमुवाच। हे पुत्र त्वं वा त्वमेव विश्वामित्रादपगतः सन्निह्यस्मद्गृहे गच्छ। त्वदीयमाता चाहं चोभावावां विह्वयावहै = विशेषेण तवाऽऽह्वानं करवावहै। इत्युक्त्वा तूष्णीमवस्थितं तं शुनःशेपं प्रति पुनरपि कयाचिद् गाथयैवमुवाच। हे शुनःशेप, त्वं

जन्मनाऽऽङ्गिरसोऽङ्गिरोगोत्रोत्पन्न आजीगर्तिरजीगर्तस्य पुत्रः कविर्विद्वान्श्रुत। इत्येवं सर्वत्र प्रसिद्ध। अतो हे महर्षे शुनःशेप, पैतामहात्पितामहेन प्रजापतिना सम्पादितात्तन्तो सन्तानादङ्गिरोवंशान्माऽपगा = अपगतो मा भव। तस्मात्पुनरपि मामेहि मद्गृहे समागच्छेत्युक्तः शुनः शेपः स्वयमपि गाथया प्रत्युत्तरं ददौ। शासो विशसनहेतुः खड्गः। हेऽजीगर्त, मद्वधाय शासहस्तं खड्गहस्तं त्वां सर्वेऽप्यदशुर्दृष्टवन्तः। यत्क्रूरं कर्म शूद्रेष्वत्यन्तनीचेष्वपि नालप्सत न लब्धवन्तो लौकिका जनास्तादृशं क्रौर्यं त्वया कृतम्। हेऽङ्गिरः। आङ्गिरस गोत्रोत्पन्नाजीगर्त, मन्मां निमित्तीकृत्य त्वं गवां शतानि त्रीण्यवृणीथा वृतवानसि। तदिदमत्यन्तकष्टमित्युक्तवान्।

*पुनरप्यजीगर्तशुनःशेपयोरुक्तिप्रत्युक्ती दर्शयति–*

**स होवाचाजीगर्तः सौयवसिः–**

**'तद्वै मा तात तपति पापं कर्म मया कृतम्।**
**तदहं निह्नवे तुभ्यं प्रतियन्तु शता गवाम्।'॥ ३॥ इति।**

**स होवाच शुनःशेपः–**

**'यः सकृत्पापकं कुर्यात्कुर्यादेनत्ततोऽपरम्।**
**नापागाः शौद्रान्यायादसंधेयं त्वया कृतम्'।॥४॥ इति।**

सा०–शुनःशेपेनोपालब्धोऽजीगर्तः स्वकीयमनुतापं दर्शयितुं काञ्चिद् गाथा मेवमुवाच–हे तात, पितृवदुपलालनीया शुनःशेप, मया यत्पापं कृतं तद्वै मा तपति = तदेव मां मनसि सन्तप्तं करोति, अहं तत्पापं निह्नवे = परिहरामि। गवां शतानि पूर्वं मया गृहीतानि त्रीणि यानि, तानि तुभ्यं त्वदर्थं प्रतियन्तु = प्रत्येकमेव प्राप्नुवन्तु। इतरयोः पुत्रयोर्गावो मा भूवँस्तवैव सर्वाः सन्त्विति। ततः स शुनःशेपो गाथया प्रत्युत्तरं ददौ। यः पुमान्धर्मशास्त्रभीतिरहितः सकृत्पापकं कुर्यात्स पुमांस्ततः पापादन्यदेनत्पापं तदभ्यासवशात्कुर्यादेव। त्वं तु शौद्रान्न्यायान्नीचजातिसम्बन्धिनः क्रूरादाचरणान्नापागाः = अपगतो न भवसि। असन्धेयं = प्रतिसन्धानरहितं पापं त्वया कृतमित्येषा शुनःशेपस्य प्रत्युक्तिः।

*अथ विश्वामित्रकृत्यं दर्शयति–*

**'असंधेयमिति' ह विश्वामित्र उपपपाद। स होवाच विश्वामित्रः–**

**'भीम एव सौयवसिः शासेन विशिशासिषुः।**
**अस्थान्मैतस्य पुत्रो भूर्ममैवोपेहि पुत्रताम्'॥ ५॥ इति।**

सा०–असन्धेयमप्रतिसमाधेयं पापमिति शुनःशेपेन यदीरितं तदेतदप्रति

समाघेयत्वं विश्वामित्र उपपपाद = युक्तिभिरुपपादितवान्। तदुपपादनार्थमेव विश्वामित्र इमां गाथामुवाच—सूयवसस्य पुत्रोऽजीगर्तो भीम एव भयहेतुरेव सञ्शासेन हस्तगतखड्गेन स विशिशासिषुरस्थात् = विशसनकर्तुमिच्छुरवस्थितवान्। अतो हे शुनःशेप! एतस्य पापिष्ठस्य पुत्रो मा भूः किन्तु ममैव पुत्र तामुपेहि।

*अथ शुनःशेपविश्वामित्रयोरुक्तिप्रत्युक्ती दर्शयति—*

**स होवाच शुनः शेपः—**

**'स वै यथा नो ज्ञपया राजपुत्र तथा वद।**
**यथैवाङ्गिरसः सन्नुपेयां तव पुत्रताम्'॥ ६॥ इति।**

**स होवाच विश्वामित्रः—**

**'ज्येष्ठो मे त्वं पुत्राणां स्यास्तव श्रेष्ठा प्रजा स्यात्।**
**उपेया दैवं मे दायं तेन वै त्वोपमन्त्रय'॥ ७॥ इति।**

सा०—विश्वामित्रेणैवं बोधितः शुनःशेपः पुनरपि गाथया विश्वामित्रं प्रत्येकमुवाच—अयं विश्वामित्रो जन्मना क्षत्यित्रयः सन्स्वकीयेन तपोमहिम्ना ब्राह्मण्यं प्राप्तवान्, इत्येवं तद्वृत्तान्तं सूचयितुं हे राजपुत्रेति सम्बोधितवान्। स वै तथाविधो राजजातीय एव सन् यथा येन प्रकारेण नरोऽस्माभिः सर्वेरा = समन्ताज्ज्ञपय ब्राह्मणत्वेन ज्ञायसे, तथैवास्मद्विषयेऽपि त्वं वद। कथं वदितव्यमिति तदुच्यते। अहमिदानीमङ्गिरोगोत्रः संस्तत्परित्यागेन तव पुत्रत्वं येनेव प्रकारेणोपेयां तथैवानुगृहाणेति शेषः। एतद्वाक्याभिप्रायः पूर्वैः सङ्क्षिप्य दर्शितः—

**पुरात्मानं नृपं विप्र (प्रं) तपसा कृतवानसि।**
**एवमाङ्गिरसं मा त्वं वैश्वामित्रमृषे कुरु॥ इति॥**

ततो विश्वामित्रो गाथया प्रत्युत्तरमुक्तवान्। हे शुनःशेप, त्वं मे पुत्राणां मध्ये ज्येष्ठः स्याः = ज्येष्ठो भव। तव पुत्रादिरूपा प्रजापीतरस्याः श्रेष्ठा स्यात्। मे मह्यं विश्वामित्राय, दैवंदेवैः प्रसन्नैर्दत्तं दायं पुत्रत्वरूपं लाभमुपेयाः प्राप्नुहि। तेन वै = तेनैव प्रकारेण त्वोपमन्त्रये त्वां पुत्रत्वेन व्यवहरामि।

*पुनरपि शुनःशेपविश्वामित्रयोर्वृत्तान्तं दर्शयति—*

**स होवाच शुनः शेपः—**

**'संज्ञानानेषु वै ब्रूयात्सौहार्द्याय मे श्रिये।**
**यथाहं भरतऋषभोपेयां तव पुत्रताम्'॥ ८॥ इति।**

**अथ ह विश्वामित्रः पुत्रानामन्त्रयामास—**

NOTES

NOTES

**'मधुच्छन्दाः शृणोतन ऋषभो रेणुरष्टकः।**
**ये के च भ्रातरः स्थ नास्मै ज्यैष्ठ्याय कल्पध्वम्'॥ ९॥ इति।**

सा०–विश्वामित्रेण प्रलोभितः शुनःशेप स्वकार्यदाढर्यार्थं गाथयेवमुवाच। संज्ञानानेषु = मद्विषयैकमत्यं प्राप्तेषु त्वदीयपुत्रेषु (स) र्वोऽपि मां ब्रूयात्, ज्येष्ठ भातृत्वेन व्यवहरतु। तच्च मे मम सौहार्द्याय भ्रातृभिरितरै स्नेहातिशयाय श्रियै धनलाभाय च सम्पद्यते। हे भरतऋषभ, भरवंशश्रेष्ठ, विश्वामित्र! अहं तव पुत्रतां यथोपेयां तथैवैतेषां पुत्राणामग्रेऽनुगृहाणेति शेषः। ततो विश्वामित्र इतरान् पुत्रान् आहूय गाथयैवमाज्ञापितवान्। यो मधुच्छन्दा नाम यश्चर्षभो योऽपि रेणुर्योऽपि अष्टक एते मुख्या हे पुत्रकाः शृणोतन मदीयामाज्ञां शृणुत। केचिद्यूयं सर्वे भ्रातरः स्थ ते सर्वेऽपि अस्मै शुनःशेपादस्मादपि ज्यैष्ठ्याय न कल्पध्वं = ज्येष्ठत्वाभिमानं मा कुरुत। किन्त्वसावेव युष्माकं मध्ये ज्यैष्ठो भूत्वाऽवतिष्ठतामिति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश
ऐतरेय ब्राह्मणभाष्ये त्रयस्त्रिंशाध्याये पञ्चमः
खण्डः ॥५॥ (१६) (१४०)।

# हरिश्चन्द्रोपाख्यानम्

## षष्ठः खण्डः

*अथ विश्वामित्रपुत्राणां वृत्तान्तमाह–*

**तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः। पञ्चाशदेव ज्यायांसो मधुच्छन्दसः, पञ्चाशत्कनीयांसः।**

सा०– मधुच्छन्दोनामकः कश्चित्पुत्रो मध्यमस्ततोऽपि ज्येष्ठाः कनिष्ठाश्च प्रत्येकं पञ्चाशत्सङ्ख्याका इत्येवमेकशतं तस्य पुत्राः।

*तेषां मध्ये ज्येष्ठानां वृत्तान्तमाह–*

**तद्ये ज्यायांसो, न ते कुशलं मेनिरे।ताननु व्याजहार–'अन्तान्वः प्रज्ञा भक्षीष्टे'ति। त एतेऽन्ध्राः पुण्ड्राः शबराः पुलिन्दा मूतिबा इत्युदन्त्या बहवः। वैश्वामित्रा दस्यूनां भूयिष्ठाः।**

सा०–तत्तेष्वेकशतसङ्ख्याकेषु पुत्रेषु मध्ये ये मधुच्छन्दसो ज्येष्ठाः

पञ्चाशत्सङ्ख्याकाः सन्ति, शुनःशेपस्य विश्वामित्रपुत्रत्वं कुशलं न मेनिरे = इदं समीचीनमित्येवं नाङ्गीकृतवन्तः। ताञ्ज्यैष्ठान् पञ्चाशत्सङ्ख्याकाननुलक्ष्य विश्वामित्रो व्याजहार = व्याहरणं शापरूपं वाक्यमुक्तवान्–हे ज्येष्ठपुत्राः, युष्माकं मदीयाज्ञातिलङ्घिनां प्रजाः पुत्रादिका अन्तान्भक्षीष्ट = चाण्डालादिरूपान्नीचजाति विशेषान्भजतामिति। त एते शप्ताः सन्तोऽन्ध्रत्वादिपञ्चविधनीचजातिविशेषा भवन्ति। इतिशब्दस्य तत्प्रदर्शनार्थत्वादन्येऽपि नीचजातिविशेषाः सर्वे विदक्षिताः। उद्गतोऽन्त उदन्तोऽत्यन्तनीचजातिस्तत्र भवा उदन्त्याः। ते बहवोऽनेकविधा वैश्वामित्राः– विश्वामित्रसंततिजाः, दस्यूनां तस्कराणां मध्ये भूयिष्ठाः अत्यधिकाः।

*ज्येष्ठानां वृत्तान्तमुक्त्वा मधुच्छन्दसः तत्कनिष्ठानां च वृत्तान्तं गाथया दर्शयति–*

**स होवाच मधुच्छन्दाः पञ्चाशता सार्धम्–**

**'यन्नः पिता संजानीते तस्मिंस्तिष्ठामहे वयम्।**
**पुरस्त्वा सर्वे कुर्महे त्वामन्वञ्चो वयं स्मसि'॥ १॥ इति।**

सा०–कनिष्ठपुत्राणां पञ्चाशता सह मधुच्छन्दोनामकः स मध्यमः पुत्रः शुनःशेपं प्रत्येवमुवाच–हे शुनःशेप! नोऽस्माकं पिता विश्वामित्रो यत्कार्यं त्वदीयज्येष्ठपुत्रत्वरूपं सञ्जानीते = सम्यग्जानाति, अङ्गीकरोति; तस्मिन्कार्ये वयं तिष्ठामहे-तत्कार्यमङ्गीकुर्मः। सर्वे वयं त्वा शुनःशेपनामानं त्वां पुरस्कुर्महे पुरस्कृत्य ज्येष्ठं कृत्वा वर्तामहे त्वामन्वञ्चः शुनःशेपमनुगच्छन्तः स्मसि भवाम इत्युक्तवान्।

*विश्वामित्रवृत्तान्तं दर्शयति–*

**अथ ह विश्वामित्रः प्रतीतः पुत्रांस्तुष्टाव।**

सा०–अथ मधुच्छन्दःसहितानां पञ्चाशत्कनिष्ठपुत्राणां शुनःशेपविषय ज्येष्ठपुत्रत्वाङ्गीकारानन्तरं स विश्वामित्रः प्रतीतस्तेषु प्रत्ययं मदनुकूला इति विश्वासं प्राप्तः प्रीत्या पुत्रान् गाथाभिस्तुष्टाव।

*तत्र प्रथमा गाथामाह–*

**ते वै पुत्राः पशुमन्तो वीरवन्तो भविष्यथ।**
**ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त सा॥ २॥**

सा०–हे मधुच्छन्दः प्रमुखाः कनिष्ठपुत्राः, ये यूयं मे मानं मदीयं मतमनुगृह्णन्त आनुकूल्येन स्वीकुर्वन्तो मां विश्वामित्रं वीरवन्तं स्वधर्मशूरपुत्रयुक्तम–

NOTES

कर्तकृतवन्तस्ते वै तादृशा यूयं बहुविधपुत्रयुक्ता बहुविधानुकूलपुत्रयुक्ताश्च भविष्यथ।

*द्वितीयां गाथामाह–*

**पुर एत्रा वीरवन्तो देवरातेन गाथिनाः।**
**सर्वे राध्याः स्थ पुत्रा एष वः सद्विवाचनम्।। ३।।**

सा०–गाथिनशब्दो विश्वामित्रस्य पितरमाचष्टे। हे गाथिना, गाथिपौत्राः, पुरः एत्रा = युष्माकं पुरतो गन्त्रा, मुख्येन देवरातेन सह यूयं सर्वे वीरवन्तः श्रेष्ठ पुत्रयुक्ता राध्याः स्थ सर्वैः पुरुषैराराधनीयाः पूज्या भवथ। हे पुत्राः, मधुच्छन्दःप्रभृतयः, एष देवरातो वो युष्माकं सद्विवाचनं सन्मार्गस्य विशेषतोऽध्यापनं करिष्यतीति शेषः।

*तृतीयां गाथामह–*

**एष वः कुशिका वीरो देवरातस्तमन्वित।**
**युष्मांश्च दायं म उपेता विद्यां यामु च विद्मसि।। ४।।**

सा०–हे कुशिकाः = कुशिकनाम्नो मत्पितामहस्य सम्बन्धिनो मधुच्छन्दः-प्रभृतयः! एष देवरातो वो युष्माकं ज्येष्ठभ्रातेति शेषः। तं देवरातं यूयमन्वितानुगता भवत। मे मदीयं दायं धनं युष्मांश्चोपेता = प्राप्स्यति। चकराद् देवरातं च। यामु च यामपि कञ्चिद्वेदशास्त्रादिरूपां विद्यां विद्मसि = वयं जानीमः, सापि युष्मानुपेता प्राप्स्यति।

*चतुर्थी गाथामाह–*

**हे सम्यञ्चो वैश्वामित्राः सर्वे साकं सरातयः।**
**देवराताय तस्थिरे धृत्यै श्रैष्ठ्याय गाथिनाः।। ५।।**

सा०–हे वैश्वामित्राः = विश्वामित्रस्य मम पुत्राः, ये गाथिनाः = गाथिपौत्रास्ते यूयं सर्वेऽपि सम्यञ्चः = समीचीनबुद्धयो ये साकं देवरातेन सार्धं सरातयो = रातिर्धनसम्पत्तिः तथा युक्ताः सन्तो, देवराताय = मदीयश्रेष्ठपुत्रस्य देवरातस्य, धृत्यै = धारणं युष्मत्पोषणं, श्रैष्ठ्याय = युष्माकं मध्ये श्रेष्ठत्वं च तस्थिरेऽङ्गीकृतवन्तः।

*पञ्चमीं गाथामाह–*

**अधीयत देवरातो रिक्थयोरुभयोर्ऋषिः।**
**जह्नूनां चाधिपत्ये दैवे वेदे च गाथिनाम्।। ६।।**

NOTES

सा०–'इक् स्मरणे' इति धातुः। अधीयत स्मृतिकारैर्महर्षिभिः स्मर्यते। कथमिति तदुच्यते। अयं देवरातो द्व्यामुष्यायणत्वादुभयोरजीगर्तविश्वामित्रयोः सम्बन्धिनी ये रिक्थे धने, तयोर्ऋषिर्द्रष्टा। तदुभयमर्हतीत्यर्थः। अजीगर्तस्य कूटस्थ ऋषिर्जह्नुसंज्ञकस्य वंशे जाताः सर्वे जह्नवस्तेषां चाधिपत्ये स्वामित्वे देवरातो योग्यः। तथा दैवे = देवसम्बन्धिनी यागादिकर्मणि वेदे च मन्त्ररूपे समर्थः। गाथिनामस्मत्पितृवंशोत्पन्नानां च सर्वेषामाधिपत्ये योग्यः।

*उक्तमुपाख्यानमुपसंहरति–*

**तदेतत्परऋक्शतगाथं शौनःशेपमाख्यानम्।**

सा०–'कस्य नूनं', 'निधारय' इत्यन्ताः सप्ताधिकनवतिसङ्ख्याका ऋचः। 'त्वं नः स त्वम्' इत्यादिकास्तिस्रः ऋच एवमृचां शतम्। परःशब्दोऽधिकवाची। पूर्वोक्तादृक्शतात् परोऽधिका एकत्रिंशत्सङ्ख्याका 'यं न्वियम्' इत्याद्या गाथा यस्मिन्नाख्याने तदेतत्परऋक्शतगाथम्। शुनःशेपेन दृष्टाः सप्ताधिकनवति–(९७) सङ्ख्यायुक्ता ऋचो याः सन्त्यन्येन दृष्टास्तिस्र ऋचो या सन्ति ब्राह्मणे प्रोक्ता एकत्रिंशद्गाथाविशेषा ये सन्ति, तैः सर्वैरुपेतं 'हरिचन्द्रोहि वैधस' इत्यादिकं सर्व शुनःशेपविषयमाख्यानम्।

*तस्याख्यानस्य राजसूयक्रतौ विनियोगं दर्शयति–*

**तद्धोता राज्ञेऽभिषिक्ताय आचष्टे।**

सा०–राजसूयक्रतावभिषेचनीयाख्ये कर्मणि यदा राजाभिषिक्तो भवति तदानीं तस्मै राज्ञे तदाख्यानं होता कथयेत्।

*तत्रेतिकर्तव्यं (Procedure) दर्शयति–*

**हिरण्यकशिपावासीन आचष्टे। हिरण्यकशिपावासीनः प्रतिगृणाति। यशो वै हिरण्यं, यशसैवैनं तत्समर्धयति।**

सा०–होता यदोपाख्यानं कथयति, तदानीं हिरण्यकशिपौ सुवर्णनिर्मित-सूत्रैर्निष्पादिते कशिपौ स होतोपविशेत्। तदाख्यानमध्येऽध्वर्युश्च हिरण्यकशिपा-वासीनो वक्ष्यमाणं प्रतिसरं ब्रूयात्। हिरण्यस्य यशोहेतुत्वाद् यमस्त्वम्। तथा सत्येन राजानं यशसैव समृद्धं करोति।

*अध्वर्युणा प्रयोक्तव्यं प्रतिगरविशेषं दर्शयति–*

**'ओम्' इत्यृचः प्रतिगरः, एवं तथा इति गाथायाः। ओमिति वै दैवं, तथेति मानुषम्। दैवेन चैवैनं तन्मानषेण च पापादेनसः प्रमुञ्चति।**

NOTES

सा०—होत्रा प्रयुक्ताया एकैकस्या ऋचोऽन्तेध्वर्योरोमित्येतादृशः प्रतिगरो भवति। ..............। ओमित्येतच्छन्दोरूपं दैवं देवैरङ्गीकारार्थे प्रयुज्यते। तत्तथेत्यन्तं (तथेति) मानुषं, मनुष्या अङ्गीकारे तथेति शब्दं प्रयुञ्जते। तत्तेन प्रतिगरेण दैवेन मानुषेण चाध्वर्युरेनं राजानं पापाद् दैहिकादपकीर्तिरूपादेनसो नरकहेतोश्च प्रमुञ्चति = प्रयुक्तं करोति।

*क्रत्वर्थत्वेनोपाख्यानं विधाय क्रतुनिरपेक्षपुरुषार्थत्वेन विधत्ते—*

**तस्माद्यो राजा विजिती स्यादप्ययजमान आख्यापयेत एवैतच्छौनः शेपमाख्यानं, न हास्मिन्नल्पं च नैनः परिशिष्यते।**

सा०—यस्मादुपाख्यानं पापप्रशमनहेतुः तस्मादयजमानोऽपि राजसूयक्रतुर-हितोऽपि राजा विजिती यदि विजयोपेतः स्यात्तदानीमेतच्छौनः शेपमाख्यानमाख्या-पयेत। तस्य राज्ञोः यः कश्चिद् ब्राह्मण उपाख्यानं ब्रूयात्। तथा सति तस्मिन्राजनि अल्पं च न किञ्चिदप्येनः पापं न ह वै परिशिष्यते। सर्व पापं नश्यततीत्यर्थः।

*आख्यानप्रयुक्तां दक्षिणां विधत्ते—*

**सहस्रमाख्यात्रे दद्याच्छतं प्रतिगरित्रे। एते चैवासने। श्वेतश्चाश्वतरीरथो होतुः।**

सा०—योऽयमाख्याता होता, तस्मै क्रत्वर्थदक्षिणामन्तरेण (besides) उपाख्यानप्रयुक्तां दक्षिणां गोसहस्ररूपां दद्यात्। प्रतिगरित्रेऽध्वर्यवे गोशतं दद्यात्। ये हिरण्यकशिपुरूपे द्वे आसने स्तः, एते अपि ताभ्यामेव दद्यात्। अश्वतरीभ्यां सङ्कीर्णज्ञातियुक्ताभ्यामधिकशक्तिभ्यां युक्तो रथोऽश्वतरीरथः। स च रजतेनालङ्कृतत्वाच्छवेतः सोऽपि तादृशो होतुर्देयः।

*पूर्वमेवयज्ञसंयुक्तः कल्पो विजयिनो राज्ञाऽभिहितः। इदानीं पुत्रकामानामपि (सर्वेषामपि?) विधत्ते—*

**पुत्रकामा हाप्याख्यापयेरँल्लभन्ते ह पुत्राँल्लभन्ते ह पुत्रान्॥ १८॥**

सा०—ये पुत्रकामाः सन्ति, ते ह प्रसिद्धमेतदुपाख्यानमाख्यापयेरन्ब्राह्मणमुखात् शृणुयुरित्यर्थः। ते पुत्रांल्लभन्ते। अभ्यासोऽध्यायसमाप्त्यर्थः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश
ऐतरेयब्रह्मणभाष्ये त्रयस्त्रिंशाध्याये षष्ठः
खण्डः॥ ६॥ (१८) (१४१)

❑❑❑

NOTES

UNIT–IV

# इकाई–चतुर्थ
# ईशावास्योपनिषद्

## शान्तिपाठ

**ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**
**ॐ शान्तिः शान्तिः शान्तिः।।**

**शाङ्करभाष्य–**पूर्णमदः पूर्णम् न कुतश्चिद् व्यावृत्तं व्यापीत्येतत्। निष्ठा च कर्तरि द्रष्टव्या। अदः इति परोक्षाभिधायि सर्वनाम, तत् परं ब्रह्मेत्यर्थः। तत् सम्पूर्णम् आकाशवद् व्यापि निरन्तरं निरुपाधिकं च। तदेव इदं सोपाधिकं नामरूपस्थं व्यवहारापन्नं पूर्णम् स्वेन रूपेण परमात्मना व्याप्येव, न उपाधिपरिच्छिन्नेन विशेषात्मना। तदिदं विशेषापन्नं कार्यात्मकं ब्रह्म पूर्णात् कारणात्मनः उदच्यते उद्रिच्यते उद्गच्छतीत्येतत्। यद्यपि कार्यात्मना उद्रिच्यते तथापि यत् स्वरूपं पूर्णत्वं परमात्मभावः, तन्न जहाति, पूर्णमेवोद्रिच्यते। पूर्णस्य कार्यात्मनो ब्रह्मणः पूर्णम् पूर्णत्वम् आदाय गृहीत्वा आत्मस्वरूपैकरसत्वमापाद्य, विद्ययाऽविद्याकृतं भूतमात्रोपाधिसंसर्गजमन्यत्वावभासं तिरस्कृत्य पूर्णमेव अनन्तरमबाह्यं प्रज्ञानधनैकरसस्वभावं केवलं ब्रह्म अवशिष्यते।।

ईशा वास्यमित्यादयो मन्त्राः कर्मस्वविनियुक्ताः; तेषामकर्मशेषस्यात्मनो याथात्म्यप्रकाशकत्वात्। याथात्म्यं चात्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वा-शरीरत्वसर्वगतत्वादि वक्ष्यमाणम्। तच्च कर्मणा विरुध्येतेति युक्त एवैषां कर्मस्वविनियोगः।

न ह्येवंलक्षणमात्मनो याथात्म्यमुत्पाद्यं विकार्यमाप्यं संस्कार्यं कर्तृभोक्तृरूपं वा येन कर्मशेषता स्यात्। सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैव उपक्षयात्, गीतानां मोक्षधर्माणां चैवंपरत्वात्। तस्मादात्मनोऽनेकत्वकर्तृत्वभोक्तृत्वादि

NOTES

चाशुद्धत्वपापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धं कर्माणि विहितानि। यो हि कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनादृष्टेन स्वर्गादिना च द्विजातिरहं न काणत्वकुब्जत्वाद्यनधिकारप्रयोजकधर्मवानित्यात्मानं मन्यते सोऽधिक्रियते कर्मस्विति ह्यधिकारविदो वदन्ति। तस्मादेते मन्त्रा आत्मनो याथात्म्यप्रकाशनेन आत्मविषयं स्वाभाविकमज्ञानं निवर्तयन्तः शोकमोहादिसंसारधर्मविच्छित्तिसाधनमात्मैकत्वादि-विज्ञानमुत्पादयन्ति। इत्येवमुक्ताधिकार्यभिधेयसम्बन्धप्रयोजनान् मन्त्रान्संक्षेपतो व्याख्यास्यामः।

**ॐ ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथामागृधः कस्य स्विद्धनम्॥ १॥**

**शाङ्करभाष्य**–ईशा वास्यमित्यादि। ईशा ईष्टे ईतीट् तेनेशा। ईशिता परमेश्वरः परमात्मा सर्वस्य। स हि सर्वमीष्टे सर्वजन्तूनामात्मा सन्प्रत्यगात्मतया, तेन स्वेन रूपेणात्मनेशा वास्यमाच्छादनीयम्। किम्? इदं सर्वं यत्किञ्च यत्किञ्चिज्जगत्यां पृथिव्यां जगत्तत्सर्वं स्वेनात्मना ईशेन प्रत्यगात्मतयाहमेवेदं सर्वमिति परमार्थसत्यरूपेणानृतमिदं सर्वं चराचरमाच्छादनीयं स्वेन परमात्मना। यथा चन्दनागुर्वादेरुदकादिसम्बन्धजक्लेदादिजमौपाधिकं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेन आच्छाद्यते स्वेन पारमार्थिकेन गन्धेन। तद्वदेव हि स्वात्मनि अध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगद्द्वैतरूपं जगत्वां पृथिव्याम्, जगत्यामिति उपलक्षणार्थत्वात्सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात्।

एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो न कर्मसु। तेन त्यक्तेन त्यागेनेत्यर्थः। न हि त्यक्तो मृतःपुत्रो वा भृत्यो वा आत्मसम्बन्धिताया अभावात् आत्मानं पालयति, अतस्त्यागेन इत्ययमेव वेदार्थः–भुञ्जीथाः पालयेथाः। एवं त्यक्तैषणस्त्वं मा गृधः गृधिमाकाङ्क्षां मा कार्षीर्धनविषयाम्। कस्य स्विद्धनं कस्यचित्परस्य स्वस्य वा धनं मा काङ्क्षीरित्यर्थः। स्विदित्यनर्थको निपातः। अथवा मा गृधः। कस्मात्? कस्यस्विद्धनमित्याक्षेपार्थो न कस्यचिद्धनमस्ति यद् गृध्येत। आत्मैवदं सर्वमितीश्वरभावनया सर्वं त्यक्तमत आत्मन एवेदं सर्वमात्मैव च सर्वमतो मिथ्याविषयां गृधिं मा कार्षीरित्यर्थः॥ १॥

**कुर्वन्नेवेह कर्माणि जिजाविषेच्छतंसमाः।**
**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥ २॥**

NOTES

**शाङ्करभाष्य**–एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनात्मज्ञाननिष्ठतयात्मा रक्षितव्य इत्येष वेदार्थः। अथ इतरस्यानात्मज्ञतया आत्मग्रहणाय अशक्तस्येदमुपदिशति मन्त्रः–कुर्वन्नेवेति। कुर्वन्नेव निर्वर्तयन्नेव इह कर्माण्यग्निहोत्रादीनि जिजीविषेज्जीवितुमिच्छेच्छतं शतसङ्ख्याकाः समाः संवत्सरान्। तावद्धि पुरुषस्य परमायुर्निरूपितम्। तथा च प्राप्तानुवादेन यज्जिजीविषेच्छतं वर्षाणि तत् कुर्वन्नेव कर्माणीत्येतद्विधीयते। एवमेवम्प्रकारेण त्वयि जिजीविषति नरे नरमात्राभिमानिनि इतः एतस्मादग्निहोत्रादीनि कर्माणि कुर्वतो वर्तमानात् प्रकारादन्यथा प्रकारान्तरं नास्ति येन प्रकारेणाशुभं कर्मं न लिप्यते कर्मणा न लिप्यते इत्यर्थः। अतः शास्त्रविहितानि कर्माण्यग्निहोत्रादीनि कुर्वन्नेन जिजीविषेत्।

कथं पुनरिदमवगम्यते–पूर्वेण मन्त्रेण संन्यासिनो ज्ञाननिष्ठोक्ता द्वितीयेन तदशक्तस्य कर्मनिष्ठेति? उच्यते; ज्ञानकर्मणोर्विरोधं पर्वतवदकम्प्यं यथोक्तं न स्मरसि किम्? इहाप्युक्तं यो हि जिजीविषेत् स कर्म कुर्वन्', 'ईशावास्यमिदं सर्वम्', 'तेन त्यक्तेन भुञ्जीथाः', 'मा गृधः कस्यस्विद्धनम्' इति च। 'न जीविते, मरणे वा गृधिं कुर्वीतारण्यमियादि'ति च पदम्; 'ततो न पुनरियात्' इति संन्यासशासनात्। उभयोः फलभेदं च वक्ष्यति।

इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः। क्रियापथश्चैव पुरस्तात्संन्यासश्चोत्तरेण। निवृत्तिमार्गेण एषणात्रयस्य त्यागः। तयोः संन्यासपथ एवातिरेचयति। "न्यास एवात्यरेचयत्" इति च तैत्तिरीयके (तै. आ. १०।६२, १०।७८)। "द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः। प्रवृतिलक्षणो धर्मो निवृत्तिश्च विभावितः।।" (महा. शा. २४१।६) इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्येण भगवता। विभागञ्चानयोः दर्शयिष्यामः।। २।।

**असुर्या नाम ते लोका अन्धेन तमसावृताः।**
**तांस्ते प्रेत्याभिगच्छन्ति से के चात्महनोजनाः।। ३।।**

**शाङ्करभाष्य**–अथेदानीमविद्वन्निन्दार्थोऽयं मन्त्र आरभ्यते–असुर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुरास्तेषाञ्च स्वभूता लोका असुर्या नाम। नामशब्दोऽनर्थको निपातः। ते लोकाः कर्मफलानि। लोक्यन्ते दृश्यन्ते भुज्यन्त इति जन्मानि। अन्धेनादर्शनात्मकेनाज्ञानेन तमसावृता आच्छादिताः तान्स्थावरान्तान्प्रेत्य त्यक्त्वेमं देहमभिगच्छन्ति 'यथाकर्म यथाश्रुतम्' (क. उ. २।२।७)।

ये के चात्महनः। आत्मानं घ्नन्तीत्यात्महनः। के ते जनाः? येऽविद्वांसः। कथं त आत्मानं नित्यं हिंसन्ति? अविद्यादोषेण विद्यमानस्यात्मनः तिरस्करणात्। विद्यमानस्य आत्मनो यत्कार्यं फलमजरामरत्वादि संवेदनलक्षण तद्धतस्येव

NOTES

तिरोभूतं भवतीति प्राकृताविद्वांसो जना आत्महन उच्यन्ते। तेन ह्यात्महननदोषेण संसरन्ति ते।। ३।।

**अनेजदेकं मनसो जवीयो**
**नैनद्देवा आप्नुवन्पूर्वमर्षत्।**
**तद्धावतोऽन्यानत्येति तिष्ठत्**
**तस्मिन्नपो मातरिश्वा दधाति।। ४।।**

**शाङ्करभाष्य**—यस्यात्मनो हननादविद्वांसः संसरन्ति तद्विपर्ययेण विद्वांसो जना मुच्यन्ते ते नात्महनः तत् कीदृशमात्मतत्त्वमित्युच्यते—अनेजदिति। अनेजत् न एजत्। एजृ कम्पने, कम्पनं चलनं स्वावस्थाप्रच्युतिस्तद्वर्जितं सर्वदैकरूपमित्यर्थः। तच्चैकं सर्वभूतेषु मनसः सङ्कल्पादिलक्षणाद् जवीयो जववत्तरम्। कथं विरुद्धमुच्यते—ध्रुवं निश्चलमिदं मनसो जवीय इति च? नैष दोषः। निरुपाध्युपाधिमत्त्वेनोपपत्तेः। तत्र निरुपाधिकेन स्वेन रूपेणोच्यते। अनेजदेकमिति। मनसोऽन्तःकरणस्य सङ्कल्पविकल्पलक्षणस्योपाधेरनुवर्त्तनाद् इह देहस्थस्य मनसो ब्रह्मलोकादिदूरगमनं सङ्कल्पेन क्षणमात्राद्भवतीत्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम्। तस्मिन् मनसि ब्रह्मलोकादीन्द्रुतं गच्छति सति प्रथमं प्राप्त इवात्मचैतन्यावभासो गृह्यतेऽतो मनसो जवीय इत्याह। नैनद्देवा द्योतनाद्देवाश्चक्षुरादीनीन्द्रियाण्येतत्प्रकृतमात्मतत्त्वं नाप्नुवन्न प्राप्तवन्तः। तेभ्यो मनो जवीयः मनोव्यापारव्यवहितत्वाद् आभासमात्रमपि आत्मनो नैव देवानां विषयीभवति। यस्माज्जवनान्मनसोऽपि पूर्वमर्षत् पूर्वमेव गतं व्योमवद्व्यापित्वात्। सर्वव्यापि तदात्मतत्त्वं सर्वसंसारधर्मवर्जितं स्वेन निरुपाधिकेन स्वरूपेणाविक्रियमेव सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीत्यविवेकिनां मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत इत्येतदाह। तद्धावतो द्रुतं गच्छतोऽन्यानात्मविलक्षणान्मनो-वागिन्द्रियप्रभुतीनत्येति अतीत्य गच्छति इव। इवार्थं स्वयमेव दर्शयति—तिष्ठदिति। स्वयमविक्रियमेव सदित्यर्थः।

तस्मिन्नात्मतत्त्वे सति नित्यचैतन्यस्वभावे मातरिश्वा मातरि अन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः सर्वप्राणभृत् क्रियात्मको यदाश्रयाणि कार्यकरणजातानि यस्मिन्नोतानि प्रोतानि च यत्सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ स मातरिश्वा; अपः कर्माणि प्राणिनां चेष्टालक्षणानि, अग्न्यादित्यपर्जन्यादीनां ज्वलनदहनप्रकाशाभिवर्षणादिलक्षणानि दधाति विभजति इत्यर्थः। धारयतीति वा "भीषास्माद्वातः पवते" (तै. उ. २।८।१) इत्यादिश्रुतिभ्यः। सर्वा हि कार्यकरणादिविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थः।। ४।।

**तदेजति तन्नैजति तद्दूरे तद्वन्तिके।**
**तदनारस्य सर्वस्य तदु सर्वस्यास्य वाह्यतः॥ ५॥**

**शाङ्करभाष्य**—न मन्त्राणां जामितास्तीति पूर्वमन्त्रोक्तमप्यर्थं पुनराह—तदेजतीति। तदात्मतत्त्वं यत्प्रकृतं तदेजति चलति तदेव च नैजति स्वतो नैव चलति स्वतोऽचलमेव सत् चलतीवेत्यर्थः। किञ्च तद्दूरे वर्षकोटिशतैरप्यविदुषामप्राप्यत्वाद् दूर इव। तद् उ अन्तिके इति च्छेदः। तद्वन्तिके समीपेऽत्यन्तमेव विदुषामात्मत्वान्न केवलं दूरेऽन्तिके च। तदन्तरभ्यन्तरेऽस्य सर्वस्य "य आत्मा सर्वान्तरः" (बृ. आ. उ. ३।४।१) इति श्रुतेः। अस्य सर्वस्य जगतो नामरूपक्रियात्मकस्य तदु अपि सर्वस्य अस्य बाह्यतो व्यापकत्वादाकाशवन्निरतिशयसूक्ष्मत्वाद् अन्तः। "प्रज्ञानघन एव" (बृ. आ. उ. ४।५।१३) इति च शासनान्निरन्तरं च॥ ५॥

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥ ६॥**

**शाङ्करभाष्य**—यः परिव्राड् मुपुक्षुः सर्वाणि भूतान्यव्यक्तादीनि स्थावरान्तानि आत्मन्येवानुपश्यत्यात्मव्यतिरिक्तानि न पश्यतीत्यर्थः, सर्वभूतेषु च तेष्वेव चात्मानं तेषाम् अपि भूतानां स्वमात्मानमात्मत्वेन। यथास्य देहस्य कार्यकरणसङ्घातस्यात्मा अहं सर्वप्रत्ययसाक्षिभूतश्चेतयिता केवलो निर्गुणोऽनेनैव स्वरूपेणाव्यक्तादीनां स्थावरान्तानामहमेवात्मेति सर्वभूतेषु चात्मानं निर्विशेषं यस्त्वनुपश्यति स ततस्तस्मादेव दर्शनान्न विजुगुप्सते विजुगुप्सां घृणां न करोति। प्राप्तस्यैवानुवादोऽयम्। सर्वा हि घृणात्मनोऽन्यद्दुष्टं पश्यतो भवति, आत्मानमेवात्यन्तविशुद्धं निरन्तरं पश्यतो न घृणानिमित्तम् अर्थान्तरमस्तीति प्राप्तमेव। ततो न विजुगुप्सत इति॥ ६॥

**यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥ ७॥**

**शाङ्करभाष्य**—इममेवार्थमन्योऽपि मन्त्र आह—यस्मिन् सर्वाणि भूतानि। यस्मिन्काले यथोक्तात्मनि वा तान्येव भूतानि सर्वाणि परमार्थात्मदर्शनादात्मैवाभूद् आत्मैव संवृतः परमार्थवस्तु विजानतः तत्र तस्मिन्काले तत्रात्मनि वा को मोहः कः शोकः? शोकश्च मोहश्च कामकर्मबीजम् अजानतो भवति। न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः।

को मोहः कः शोक इति शोकमोहयोरविद्याकार्ययोराक्षेपेण असम्भवप्रदर्शनात् सकारणस्य संसारस्यात्यन्तमेवोच्छेदः प्रदर्शितो भवति॥ ७॥

NOTES

NOTES

**स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं**
**शुद्धमपापविद्धम्।**
**कविर्मनीषी परिभूः स्वयम्भूर्याथा-**
**तथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः॥ ८॥**

**शाङ्करभाष्य**—योऽयमतीतैर्मन्त्रैरुक्त आत्मा स स्वेन रूपेण किंलक्षण इत्याहायं मन्त्रः—स पर्यगात्। स यथोक्त आत्मा पर्यगात्परि समन्तादगाद्गत वानाकाशवद्व्यापी इत्यर्थः। शुक्रं शुद्धं ज्योतिष्मद्दीप्तिमानित्यर्थः। अकायमशरीरो लिङ्गशरीरवर्जित इत्यर्थः। अव्रणम् अक्षतम्। अस्नाविरं स्नावाः शिरा यस्मिन्न विद्यन्त इत्यस्नाविरम्। अव्रणमस्नाविरमित्याभ्यां स्थूलशरीरप्रतिषेधः। शुद्धं निर्मलमविद्यामलरहितमितिकारणशरीरप्रतिषेधः। अपापविद्धं धर्माधर्मादिपापवर्जितम्। शुक्रमित्यादीनि वचांसि पुंल्लिङ्गत्वेन परिणेयानि। स पर्यगादित्युपक्रम्य कविर्मनीषीत्यादिना पुंल्लिङ्गत्वेनोपसंहारात्। कविः क्रान्तदर्शी सर्वदृक्। "नान्योऽतोऽस्ति द्रष्टा" (बृ. आ. उ. ३।८।११) इत्यादिश्रुतेः। मनीषी मनस ईषिता सर्वज्ञ ईश्वर इत्यर्थः। परिभूः सर्वेषां पर्युपरि भवतीति परिभूः। स्वयम्भूः स्वयमेव भवतीति। येषामुपरि भवति यश्चोपरि भवति स सर्वः स्वयमेव भवतीति स्वयम्भूः। स नित्यमुक्त ईश्वरो याथातथ्यतः सर्वज्ञत्वाद्यथातथाभावो याथातथ्यं तस्माद्यथाभूतकर्मफलसाधनतोऽर्थान् कर्त्तव्यपदार्थान् व्यदधाद्विहितवान् यथानुरूप व्यभजदित्यर्थः, शाश्वतीभ्यो नित्याभ्यः समाभ्यः संवत्सराख्येभ्यः प्रजापतिभ्य इत्यर्थः॥ ८॥

**अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।**
**ततो भूय इव ते तमो य उ विद्यायां रताः॥ ९॥**

**शाङ्करभाष्य**—अत्राद्येन मन्त्रेण सर्वेषणापरित्यागेन ज्ञाननिष्ठोक्ता—प्रथमो वेदार्थः "ईशा वास्यमिदं सर्वं" "मा गृधः कस्यस्विद्धनम् इति।" अज्ञानां जिजीविषूणां ज्ञाननिष्ठासम्भवे "कुर्वन्नेवेह कर्माणि जिजीविषेत्" इति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः। अनयोश्च निष्ठयोर्विभागो मन्त्रप्रदर्शितयोर्बृहदारण्यकेऽपि प्रदर्शितः—"सोऽकामंयत जाया मे स्यात्" (बृ. आ. उ. १।४।१७) इत्यादिना अज्ञस्य कामिनः कर्माणीति। 'मन एवास्यात्मा वाग्जाया' (बृ. आ. उ. १।४।१७) इत्यादिवचनाद् अज्ञत्वं कामित्वं च कर्मनिष्ठस्य निश्चितमवगम्यते। तथा च तत्फलं सप्तान्नसर्गस्तेष्वात्मभावेनात्मस्वरूपावस्थानम्। जायाद्येषणात्रय-संन्यासेन च आत्मविदां कर्मनिष्ठाप्रातिकूल्येनात्मस्वरूपनिष्ठैव दर्शिता 'किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः' (बृ. आ. उ. ४।४।२२)

NOTES

इत्यादिना। ये तु ज्ञाननिष्ठाः संन्यासिनस्तेभ्योऽसुर्या नाम ते इत्यादिना अविद्वन्निन्दाद्वारेण आत्मनो याथात्म्यं स पर्यगात्' इत्येतदन्तैर्मन्त्रैरुपदिष्टम्। ते ह्यत्राधिकृता न कामिन इति। तथा च श्वेताश्वतराणां मन्त्रोपनिषदि "अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम्" (श्वे. उ. ६।२१) इत्यादि विभज्योक्तम।

ये तु कर्मिणः कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवस्तेभ्य इदमुच्यते–'अन्धं तमः' इत्यादि। कथं पुनरेवमवगम्यते–न तु सर्वेषाम् इति? उच्यते–अकामिनः साध्यसाधनभेदोपमर्देन 'यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इति यदात्मैकत्वविज्ञानम् [उक्तम्] तन्न केनचित्कर्मणा ज्ञानान्तरेण वा ह्यमूढः समुच्चिचीषति। इह तु समुच्चिचीषयाऽविद्वदादिनिन्दा क्रियते। तत्र च यस्य येन समुच्चयः सम्भवति न्यायतः शास्त्रतो वा तदिहोच्यते। यद्दैवं वित्तं देवताविषयं ज्ञानं कर्मसम्बन्धित्वेनोपन्यस्तं न परमात्मज्ञानम्। "विद्यया देवलोकः" (बृ. आ. उ. १।५।१६) इति पृथक्फलश्रवणात्। तयोर्ज्ञानकर्मणोरिह एकैकानुष्ठाननिन्दा समुच्चिचीषया न निन्दापरैव, एकैकस्य पृथक्फलश्रवणात् "विद्यया तदारोहन्ति" (श. ब्रा. १०।५।४।१६), "विद्यया देवलोकः" (बृ. आ. उ. १।५।१६), "न तत्र दक्षिणा यन्ति" (श.ब्रा. १०।५।४।१६), "कर्मणा पितृलोकः" (बृ. आ. उ. १।५।१६) इति। न हि शास्त्रविहितं किञ्चिदकर्तव्यतामियात्।

तत्र अन्धं तमः अदर्शनात्मकं तमः प्रविशन्ति। के? येऽविद्यां विद्याया अन्या अविद्या तां कर्म इत्यर्थः, कर्मणो विद्याविरोधित्वात्, तामविद्यामग्निहोत्रादिलक्षणामेव केवलामुपासते तत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः। ततस्तस्मादन्धात्मकात्तमसो भूय इव बहुतरमेव ते तमः प्रविशन्ति। के? कर्म हित्वा ये उ ये तु विद्यायामेव देवताज्ञान एव रताः अभिरताः। तत्रावान्तरफलभेदं विद्याकर्मणोः समुच्चयकारणमाह; अन्यथा फलवदफलवतोः सन्निहितयोरङ्गाङ्गितैव स्याद् इत्यर्थः।। ९।।

**अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया।**
**इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे।। १०।।**

**शाङ्करभाष्य–**अन्यदेवेत्यादि। अन्यत्पृथगेव विद्यया क्रियते फलमित्याहुर्वदन्ति। "विद्यया देवलोकः" (बृ.आ.उ. १।५।१६) "विद्यया तदारोहन्ति" (श.ब्रा. १०।५।४।१६) इति श्रुतेः। अन्यदाहुरविद्यया कर्मणा क्रियते "कर्मणा पितृलोकः" (बृ.आ.उ. १।५।१६) इति श्रुतेः। इत्येवं शुश्रुम

NOTES

श्रुतवन्तो वयं धीराणां धीमतां वचनम्। ये आचार्या नोऽस्मभ्यं तत्कर्म च ज्ञानं च विचचक्षिरे व्याख्यातवन्तस्तेषामयमागमः पारम्पर्यागत इत्यर्थः।। १०।।

**विद्यां चाविद्यां च यस्तद्वेदोभयं सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।। ११।।**

**शाङ्करभाष्य**—यत एवमतो विद्यां चाविद्यां च देवताज्ञानं कर्म चेत्यर्थः। यस्तदेतदुभयं सहैकेन पुरुषेण अनुष्ठेयं वेद तस्यैवं समुच्चयकारिण एव एकपुरुषार्थसम्बन्धः क्रमेण स्यादित्युच्यते। अविद्यया कर्मणा अग्निहोत्रादिना मृत्यु स्वाभाविकं कर्म ज्ञानं च मृत्युशब्दवाच्यमुभयं तीर्त्वा अतिक्रम्य विद्यया देवताज्ञानेनामृतं देवतात्मभावमश्नुते प्राप्नोति। तद्ध्यमृतमुच्यते यद्देवतात्मगमनम्।। ११।।

**अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते।**
**ततो भूय इव ते तमो य उ सम्भूत्यां रताः।। १२।।**

**शाङ्करभाष्य**—अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीथया प्रत्येकं निन्दोच्यते। अन्धं तमः प्रविशन्ति ये असम्भूतिं सम्भवनं सम्भूतिः सा यस्य कार्यस्य सा सम्भूतिः तस्या अन्या असम्भूतिः प्रकृतिः कारणमविद्या अव्याकृताख्या तामसम्भूतिम-व्याकृताख्यां प्रकृतिं कारणमविद्यां कामकर्मबीजभूतामदर्शनात्मिकामुपासते ये ते तदनुरूपमेवान्धं तमोऽदर्शनात्मकं प्रविशन्ति। ततस्तस्मादपि भूयो बहुतरमिव तमः प्रविशन्ति य उ सम्भूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्ये रताः।। १२।।

**अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात्।**
**इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे।। १३।।**

**शाङ्करभाष्य**—अधुनोभयोरुपासनयोः समुच्चयकारणमवयवफलभेदमाह अन्यदेवेति। अन्यदेव पृथगेवाहुः फलं सम्भवात्सम्भूतेः कार्यब्रह्मोपासनादणिमाद्यैश्वर्यलक्षणं व्याख्यातवन्त इत्यर्थः। तथा चान्यदाहुः असम्भवादसम्भूतेरव्याकृताद् अव्याकृतोपासनात्। यदुक्तमन्धन्तमः प्रविशन्तीति प्रकृतिलय इति च पौराणिकैरुच्यत इत्येवं शुश्रुम धीराणां वचनं ये नस्तद्विचचक्षिरे व्याकृताव्याकृतोपासनफलं व्याख्यातवन्त इत्यर्थः।। १३।।

**सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह।**
**विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते।। १४।।**

**शाङ्करभाष्य**—यत एवमतः समुच्चयः सम्भूत्यसम्भूत्युपासनयोर्युक्त एवैकपुरुषार्थत्वाच्चेत्याह—सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह विनाशेन

विनाशो धर्मो यस्य कार्यस्य सः, तेन धर्मिणा अभेदेन उच्यते विनाश इति। तेन तदुपासनेनानैश्वर्यमधर्मकामादिदोषजातं च मृत्युं तीर्त्वा, हिरण्यगर्भोपासनेन ह्यणिमादिप्राप्तिः फलम्, तेनानैश्वर्यादिमृत्युमतीत्य असम्भूत्या अव्याकृतोपासनया अमृतं प्रकृतिलयलक्षणमश्नुते। सम्भूतिं च विनाशं चेत्यत्रावर्णलोपेन निर्देशो द्रष्टव्यः प्रकृतिलयफलश्रुत्यनुरोधात्।। १४।।

NOTES

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**
**तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।। १५।।**

**शाङ्करभाष्य**–मानुषदैववित्तसाध्यं फलं शास्त्रलक्षणं प्रकृतिलयान्तम्। एतावती संसारगतिः। अतः परं पूर्वोक्तमात्मैवाभूद्विजानत इति सर्वात्मभाव एव सर्वैषणासंन्यासज्ञाननिष्ठाफलम्। एवं द्विप्रकारः प्रवृत्तिनिवृत्तिलक्षणो वेदार्थोऽत्र प्रकाशितः। तत्र प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने प्रवर्ग्यान्तं ब्राह्मणमुपयुक्तम्। निवृत्तिलक्षणस्य वेदार्थस्य प्रकाशनेऽत ऊर्ध्वं बृहदारण्यकमुपयुक्तम्।

तत्र निषेकादिश्मशानान्तं कर्म कुर्वन् जिजीविषेद्यो विद्यया सहापरब्रह्मविषयया तदुक्तं 'विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' इति। तत्र केन मार्गेणामृतत्वमश्नुत इत्युच्यते। तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः (बृ.आ.उ. ५।५।२) एतदुभयं सत्यम्। ब्रह्मोपासीनो यथोक्तकर्मकृच्च यः सोऽन्तकाले प्राप्ते सत्यात्मानमात्मनः प्रापितद्वारं याचते 'हिरण्मयेन पात्रेण.' इति।

हिरण्मयमिव हिरण्मयं ज्योतिर्मयमित्येतत्। तेन पात्रेणेव अपिधानभूतेन सत्यस्यैवादित्यमण्डलस्थस्य ब्रह्मणोऽपिहितम् आच्छादितं मुखं द्वारम्। तत्त्वं हे पूषन्नपावृण्वपसारय। सत्यधर्माय तव सत्यस्य उपासनात्सत्यं धर्मो यस्य मम सोऽहं सत्यधर्मा तस्मै मह्यमथवा यथाभूतस्य धर्मस्यानुष्ठात्रे दृष्टये तव सत्यात्मन उपलब्धये।। १५।।

**पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि। योऽसावसौ पुरुषः सोऽहमस्मि।। १६।।**

**शाङ्करभाष्य**–पुषन्निति। हे पूषन्! जगतः पोषणात्पूषा रविस्तथैक एव ऋषति गच्छति इत्येकर्षिः–हे एकर्षे! तथा सर्वस्य संयमनाद्यगः–हे यम! तथा रश्मीनां प्राणानां रसानाञ्च स्वीकरणात् सूर्यः–हे सूर्य! प्रजापतेरपत्यं प्राजापत्यः–हे प्राजापत्य! व्यूह विगमय रश्मीन्स्वान्। समूह एकीकुरु उपसंहर ते तेजस्तापकं

ज्योतिः। यत्ते तव रूपं कल्याणतमम् अत्यन्तशोभनं तत्ते तवात्मन प्रसादात् पश्यामि। किञ्चाहं न तु त्वां भृत्यवद्याचे। योऽसावादित्यमण्डलस्थो व्याहृत्यवयवः पुरुषः पुरुषाकारत्वात्पूर्णं वानेन प्राणबुद्ध्यात्मना जगत्समस्तमिति पुरुषः परि शयनाद्वा पुरुषः सोऽहमस्मि भवामि।। १६।।

**वायुरनिलममृतमथेदं भस्मान्तं शरीरम्।**
**ॐक्रतो स्मर कृतं स्मर कतो स्मर कृतं स्मर।। १७।।**

**शाङ्करभाष्य**—वायुरिति। अथेदानीं मम मरिष्यतो वायुः प्राणोऽध्यात्मपरिच्छेदं हित्वाधिदैवतात्मानं सर्वात्मकमनिलममृतं सूत्रात्मानं प्रतिपद्यतामिति वाक्यशेषः। लिङ्गं चेदं ज्ञानकर्मसंस्कृतमुत्क्रामत्विति द्रष्टव्यम्, मार्गयाचनसामर्थ्यात्। अथेदं शरीरमग्नो हुतं भस्मान्तं भूयात्। ओमिति यथोपासनमों प्रतीकात्मकत्वात्सत्यात्मक-मग्न्याख्यं ब्रह्माभेदेनोच्यते। हे क्रतो सङ्कल्पात्मक स्मर यन्मम स्मर्तव्यं तस्य कालोऽयं प्रत्युपस्थितोऽतः स्मर। एतावन्तं कालं भावितं कृतमग्ने स्मर यन्मया बाल्यप्रभृत्यनुष्ठितं कर्म तच्च स्मर। क्रतो स्मर कृतं स्मरेति पुनर्वचन-मादरार्थम्।। १७।।

**अग्ने नय सुपथा राये अस्मान्**
**विश्वानि देव वयुनानि विद्वान्।**
**युयोध्यस्मज्जुहुराणमेनो**
**भूयिष्ठां ते नमउक्तिं विधेम।। १८।।**

**शाङ्करभाष्य**—पुनरन्येन मन्त्रेण मार्गं याचते—अग्ने नयेति। हे अग्ने! नय गमय सुपथा शोभनेन मार्गेण। सुपथेति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम्। निर्विण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेनातो याचे त्वां पुनः पुनर्गमनागमनवर्जितेन शोभनेन पथा नय। राये धनाय कर्मफलभोगायेत्यर्थं, अस्मान्यथोवतधर्मफलविशिष्टान् विश्वानि सर्वाणि हे देव वयुनानि कर्माणि प्रज्ञानानि वा विद्वाञ्जानन्। किञ्च युयोधि वियोजय विनाशय अस्मदमत्तो जुहुराणं कुटिलं वञ्चनात्मकमेनः पापम्। ततो वयं विशुद्धाः सन्त इष्टं प्राप्स्याम इत्यभिप्रायः। किन्तु वयमिदानीं ते न शक्नुमः परिचर्यां कर्तुम्। भूयिष्ठां बहुतरां ते तुभ्यं नम उक्तिं नमस्कारवचनं विधेम नमस्कारेण परिचरेम इत्यर्थः।

## श्रीमच्छङ्कराचार्यकृत उपसंहारभाष्य

'अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' (ई.उ. ११), विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते' (ई.उ. १४) इति श्रुत्वा केचित्संशयं कुर्वन्ति।

अतस्तन्निराकरणार्थं संक्षेपतो विचारणां करिष्यामः। तत्र तावत्किन्निमित्तः संशय इत्युच्यते। विद्याशब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यतेऽमृतत्वञ्च। ननूक्तायाः परमात्मविद्यायाः कर्मणश्च विरोधात्समुच्चयानुपपत्तिः। सत्यम्। विरोधस्तु नावगम्यते विरोधाविरोधयोः शास्त्रप्रमाणकत्वात्। यथाऽविद्यानुष्ठानं विद्योपासनञ्च शास्त्रप्रमाणकं तथा तद्विरोधाविरोधवपि। यथा च न हिंस्यात्सर्वा भूतानीति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यते'ऽध्वरे पशुं हिंस्यादि'ति। एवं विद्याविद्ययोरपि स्यात्। विद्याकर्मणोश्च समुच्चयः। न "दूरमेते विपरीते विषूची अविद्या या च विद्या" (क.उ. १।२।४) इति श्रुतेः। विद्यां चाविद्यां चेति वचनादविरोध इति चेत्? न; हेतुस्वरूपफलविरोधात्। विद्याविद्याविरोधाविरोधयो-र्विकल्पासम्भवात्समुच्चयविधानादविरोध एवेति चेत्? न; सहसम्भवानुपपत्तेः। क्रमेणैकाश्रये स्यातां विद्याविद्ये इति चेत्?

न; विद्योत्पत्तौ अविद्याया ह्यस्तत्वात्तदाश्रयेऽविद्यानुपपत्तेः। न ह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिन्नाश्रये तदुत्पन्नं तस्मिन्नेवाश्रये शीतोऽग्निरप्रकाशो वेत्यविद्याया उत्पत्तिर्नापि संशयोऽज्ञानं वा। "यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्-विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इति शोकमोहाद्य-सम्भवश्रुतेः। अविद्यासम्भवात्तदुपादानस्य कर्मणोऽप्यनुपपत्तिम् अवोचाम। अमृतमश्नुत इत्यापेक्षिकम् अमृतम्। विद्याशब्देन परमात्मविद्याग्रहणे हिरण्मयेनेत्यादिना द्वारमार्गादियाचनमनुपपन्नं स्यात्। तस्मादुपासनया समुच्चयो न परमात्मविज्ञानेनेति यथास्माभिव्यख्यिात एव मन्त्राणामर्थं इत्युपरम्यते।। इति श्रीगोविन्दभगवत्- पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशङ्करभगवतः कृतौ वाजसनेय- संहितोपनिषद्भाष्यं सम्पूर्णम्।

❑❑❑

NOTES

# UNIT–V

# इकाई–पञ्चम

## ॥ॐ तत्सद्ब्रह्मणे नमः॥

# केनोपनिषद्

## प्रथमः खण्डः

**ॐ केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः।**
**केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति॥ १॥**

## भावार्थदीपिका

**अन्वयः**–ॐ मनः केन इषितं प्रेषितं पतति? प्रथमः प्राणः केन युक्तः प्रैति? (जनाः) केन इषितां इमां वाचं वदन्ति? क उ देवः चक्षुः श्रोत्रं (च) युनक्ति?

## पदभाष्यम्

*इषित–प्रेषितयोः शब्दार्थः*–केन इषितं केन कर्त्रा इषितम् इष्टमभिप्रेतं सत् मनः पतति गच्छति स्वविषयं प्रतीति सम्बध्यते। इषेराभीक्ष्ण्यार्थस्य गत्यर्थस्य चेहासम्भवादिच्छार्थस्यैवेतद् रूपमिति गम्यते। इषितमिति इट्प्रयोगस्तु च्छान्दसः। तस्यैव प्रपूर्वस्य नियोगार्थे प्रेषितमित्येतत् तत्र प्रेषितमित्येवमेवोक्ते प्रेषथितृप्रेषणविशेषविषयाकाङ्क्षा स्यात्–केन प्रेषयितृविशेषेण कीदृशं वा प्रेषणम्? इति। इषितमिति तु विशेषणे सति तदुभयं निवर्तते, कस्येच्छामात्रेण प्रेषितमित्यर्थविशेषनिर्धारणात्।

## पदभाष्यम्

*मन्त्रार्थविमर्शः*–यद्येषोऽर्थोऽभिप्रेतः स्यात् 'केनेषितम्' इत्येतावतैव सिद्धतया प्रेषितमिति न वक्तव्यम्। [१]अपि च शब्दाधिक्यादर्थाधिक्यं युक्तमिति इच्छया

NOTES

कर्मणा वाचा वा केन प्रेषितमित्यर्थविशेषोऽवगन्तुं युक्तः।

न प्रश्नसामर्थ्यात्, देहादिसङ्घातादनित्यात् कर्मकार्याद् विरक्तः, अतोऽन्यत् कूटस्थं नित्यं वस्तु बुभुत्समानः पृच्छतीति सामर्थ्यादुपपद्यते। इतरथा इच्छावाक्कर्मभिर्देहादिसङ्घातस्य प्रेरयितृत्वं प्रसिद्धमिति प्रश्नोऽनर्थक एव स्यात्। एवमपि प्रेषित-शब्दस्याऽर्थो न प्रदर्शित एव।

न, संशयवतोऽयं प्रश्न इति प्रेषितशब्दस्याऽर्थविशेष उपपद्यते। किं यथाप्रसिद्धमेव कार्यकारणसङ्घातस्य प्रेषयियतृत्वम्, किं वा सङ्घातआतिरिक्तस्य स्वन्त्रस्य इच्छामात्रेणैव मनआदिप्रेषयितृत्वम्, इत्यस्याऽर्थस्य प्रदर्शनार्थं 'केनेषितं पतति प्रेषितं मन' इति विशेषणद्वयमुपपद्यते।

## पदभाष्यम्

*मनः प्रभृतीनां पारतन्त्र्यम्*—ननु स्वतन्त्रं मनः स्वविषये स्वयं पततीति प्रसिद्धम्; तत्र कथं प्रश्न उपपद्यत इति, उच्यते-यदि स्वतंत्र मनः प्रवृत्तिनिवृत्तिविषयं स्यात् तर्हि सर्वस्य अनिष्टचिन्तनं न स्यात्। अनर्थं च जानन् सङ्कल्पयति। अभ्यग्रदुःखे च कार्ये वार्यमाणमपि प्रवर्तत एव भनः। तस्माद् युक्त एव 'केनेषितमि' त्यादिप्रश्नः।

## पदभाष्यम्

केन प्राणः युक्तः नियुक्तः प्रेरितः सन् प्रैति गच्छति स्वव्यापारं प्रति। प्रथमं इति प्राणविशेषणं स्यात्, तत्पूर्वकत्वात् सर्वेन्द्रियप्रवृत्तीनाम्।

केन इषितां वाचम् इमां शब्दलक्षणां वदन्ति लौकिकाः? तथा चक्षुः श्रोत्रं च स्वे स्वे विषये क उ देवः द्योतनवान् युनत्ति नियुङ्क्ते प्रेरयति?।। १।।

## वाक्यभाष्यम्

कैनेधितम् केनेष्टं कस्येच्छामात्रेण मनः पतति गच्छति स्वविषये नियमेन व्यप्रियत इत्यर्थः। मनुतेऽनेनेति विज्ञाननिमित्तमन्तःकरषां मनः प्रेषितमिवेत्युपमार्थः। न त्विषितप्रेषितशब्दयोरर्थाविह सम्भवतः। न हि शिष्यानिव मनआदीनि विषयेभ्यः प्रेरयत्यात्मा। विविक्तनित्यचित्-स्वरूपतया तु निमित्तमात्रं प्रवृत्तौ नित्यचिकित्साधिष्ठातृवत्।

NOTES

## वाक्यभाष्यम्

प्राण इति नासिकाभवः, प्रकरणात्। प्रथमत्वं प्रचलनक्रियायाः प्राणनिमित्तत्वात् स्वतो विषयावभासमात्रं करणानां प्रवृत्तिः। चलिक्रिया तु प्राणस्यैव मनआदिषु। तस्मात् प्राथम्यं प्राणस्य। प्रैति = गच्छति, युक्तः = प्रयुक्त इत्येतत्। वाचो वदनं किंनिमित्तम्? प्राणिनां चक्षुःश्रोत्रयोश्च को देवः प्रयोक्ता? करणानाम् अधिष्ठाता चेतनवान् यः स किंविशेषण इत्यर्थः।। १।।

## पदभाष्यम्

*मंत्रावतरणम्*–एवं पृष्टवते योग्यायाऽऽह गुरुः–'शृणु यत् त्वं पृच्छसि, मनआदिकरणजातस्य को देवः स्वविषयं प्रति प्रेरयिता कथं वा प्रेरयतीति'?

**श्रोत्रस्य श्रोत्रं मनसो मनो यद् वाचो ह वाचं स उ प्राणस्य प्राणः।**
**चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्याऽस्माल्लोकादमृता भवन्ति।। २।।**

## पदभाष्यम्

*श्रोत्रस्य श्रोत्रम्*– शृणोत्यनेनेति श्रोत्रम्, शब्दस्य श्रवणं प्रति करणं शब्दाभिव्यञ्जकं श्रोत्रमिन्द्रियम्, तस्य श्रोत्रम् यस्त्वया पृष्ठः 'चक्षुः श्रोत्रं क उ देवो युनक्ति?' इति।

असावेवंविशिष्टः श्रोत्रादीनि नियुङ्क्त इति वक्तव्ये, नन्वेतदननुरूपं प्रतिवचनं श्रोत्रस्य श्रोत्रमिति। नैष दोषः, तस्याऽन्यथाविशेषाऽनवगमात्। यदि हि श्रोत्रादिव्यापारव्यतिरिक्तेन स्वव्यापारेण विशिष्टः श्रोत्रादिनियोक्ता अवगम्येत दात्रादिप्रयोक्तृवत्, तदेदमननुरूपं प्रतिवचनं स्यात्। न त्विह श्रोत्रादीनां प्रयोक्ता स्वव्यापारविशिष्टो लवित्रादिवदधिगम्यते। श्रोत्रादीनामेव तु संहतानां व्यापारेणाऽऽलोचन-सङ्कल्पाऽध्यवसायलक्षणेन फलावसान- लिङ्गेनाऽवगम्यते। अस्ति हि श्रोत्रादिभिरसंहतः, यत्प्रयोजनप्रयुक्तः श्रोत्रादिकलापः गृहादिवदिति। संहतानां परार्थत्वात् अवगम्यते श्रोत्रादीनां प्रयोक्ता। तस्मान् अनुरूपमेवेदं प्रतिवचनं 'श्रोत्रस्य श्रोत्रमि' त्यादि।

## पदभाष्यम्

*आत्मनः श्रोत्रादिप्रकाशकत्वम्*–कः पुनरत्र पदार्थः 'श्रोत्रस्य श्रोत्रमि' त्यादेः? नह्यत्र श्रोत्रस्य श्रोत्रान्तरेणाऽर्थः, यथा प्रकाशस्य प्रकाशान्तरेण।

NOTES

नैष दोषः। अयमत्र पदार्थः—श्रोत्रं तावत् स्वविषयव्यञ्जनसमर्थं दृष्टम्। तत्तु स्वविषयव्यञ्जनसामर्थ्यं श्रोत्रस्य चैतन्ये ह्यात्मज्योतिषि नित्येऽसंहते सर्वान्तरे सति भवति, न असति इति। अतः 'श्रोत्रस्य श्रोत्रमि' त्याद्युपपद्यते।

## पदभाष्यम्

तथा च श्रुत्यन्तराणि—'आत्मनैवाऽयं ज्योतिषाऽऽस्ते' (बृ.उ. ४।३।६), 'तस्य भासा सर्वमिदं विभाति' (क.उ. २।२।१५, श्वे. ६।१४, मु. २।२।१०) 'येन सूर्यस्तपति तेजसेद्धः' (तै.ब्रा. ३।१२।९।७) इत्यादीनि।

'यदादित्यगतं तेजो जगद् भासयतेऽखिलम्' (गी. १५।१२)

'क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत!' (गी. १३।३३) इति च गीतासु। काठके च—

'नित्या नित्यानां चेतनश्चेतनानाम्' (२।२।१३) इति।

श्रोत्राद्येव सर्वस्याऽऽत्मभूतं चेतनमिति प्रसिद्धम्, तदिह निवर्त्यते। अस्ति किमपि विद्वद्बुद्धिगम्यं सर्वान्तरतमं कूटस्थमजमजरममृतमभयं श्रोत्रादेरपि श्रोत्रादि तत्सामर्थ्यनिमित्तमिति प्रतिवचनं शब्दार्थश्चोपपद्यत एव।

## पदभाष्यम्

मनसो मनः—तथा मनसः=अन्तःकरणस्य मनः। न ह्यन्तकरणम् अन्तःकरणेन चैतन्यज्योतिषो दीधितिं स्वविषयसङ्कल्पाध्यवसायादिसमर्थं स्यात् तस्मात् मनसोऽपि मन इति। इह बुद्धिमनसी एकीकृत्य निर्देशो मनस इति।

यद वाचोऽह वाचम्—यच्छब्दो यस्मादर्थे श्रोत्रादिभिः सर्वैः सम्बध्यते। यस्माच्छ्रोत्रस्य श्रोत्रम्, यस्मान्मनसो मन इत्येवम्। वाचो ह वाचमिति द्वितीया प्रथमात्वेन विपरिणम्यते, प्राणस्य प्राण इति दर्शनात्।

वाचो ह वाचमित्येतदनुरोधेन प्राणस्य प्राणमिति कस्माद् द्वितीयैव न क्रियते?

न, बहूनामनुरोधस्य युक्तत्वात्। वाचमित्यस्य वागित्येतावद् वक्तव्यम् 'स उ प्राणस्य प्राण' इति शब्दद्वयानुरोधेन। एवं हि बहूनामनुरोधो युक्तः कृतः स्यात्।

## पदभाष्यम्

पृष्टं च वस्तु प्रथमतयैव निर्देष्टुं युक्तम्। स यस्त्वया पृष्टः प्राणस्य प्राणाख्यवृत्तिविशेषस्य प्राणः, तत्कृतं हि प्राणस्य प्राणनसामर्थ्यम्। न ह्यात्मनाऽनधिष्ठितस्य प्राणनमनुपपद्यते, 'को ह्येवाऽन्यात्, कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्' (तै.उ. २।७।९), 'ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति' (क.उ. २।२।३) इत्यादिश्रुतिभ्यः। इहापि च वक्ष्यते 'येन प्राणः प्रणीयते तदेव ब्रह्म त्वं विद्धि' (१।८) इति।

**शङ्का**–श्रोत्रादीन्द्रियप्रस्तावे प्राणस्य ननु युक्तं ग्रहणम्?

**समाधानं**–सत्यमेवम्, प्राणग्रहणेनैव तु घ्राणस्य ग्रहणं कृतमेव मन्यते श्रुतिः। सर्वस्यैव करणकलापस्य यदर्थप्रयुक्ता प्रवृत्तिः, तद् ब्रह्मेति प्रकरणार्थो विवक्षितः।

तथा चक्षुष्श्चक्षूरूपप्रकाशस्य चक्षुषो यद् रूपग्रहणसामर्थ्यं, तदात्मचैतन्या-धिष्ठितैव। अतः चक्षुषश्चक्षुः।

## पदभाष्यम्

*ब्रह्मवेतुः अमृतत्वप्राप्तिः*–प्रष्टुः पृष्टस्याऽर्थस्य ज्ञातुमिष्टत्वात् श्रोत्रादेः श्रोत्रादिलक्षणं यथोक्तं ब्रह्म 'ज्ञात्वा' इत्यध्याह्रियते; 'अमृता भवन्ति' इति फलश्रुतेश्च। ज्ञानाद्ध्यमृतत्वं प्राप्यते। 'ज्ञात्वा विमुच्यते' इति सामर्थ्यात् श्रोत्रादिकरणकलापमुज्झित्वा श्रोत्रादौ ह्यात्मभावं कृत्वा तदुपाधिः सन् तदात्मना जायते म्रियते संसरति च। अतः श्रोत्रादेः श्रोत्रादिलक्षणं ब्रह्म आत्मेति विदित्वा, अतिमुच्य = श्रोत्राद्यात्मभावं परित्यज्य, ये श्रोत्राद्यात्मभावं त्यजन्ति ते धीराः = धीमन्तः। न हि विशिष्टधीमत्वमन्तरेण श्रोत्राद्यात्मभावः शक्यः परित्यक्तुम्। प्रेत्य = व्यावृत्त्य, अस्माल्लोकात् = पुत्र-मित्र-कलत्र-बन्धुषु ममाहम्भावसंव्यवहार-लक्षणात्, त्यक्तसर्वेषणाः भूत्वेत्यर्थः। अमृताः अमरणधर्माणो भवन्ति।

## पदभाष्यम्

**'न कर्मणा न प्रजया धनेन**
**त्यागेनैके अमृतत्वमानशुः' (कैव.उ. १।२)**
**'पराञ्चि खानि व्यतृणत् स्वयम्भू-**
**स्तस्मात् पराङ् पश्यति नाऽऽन्तरात्मन्।**

**कश्चिद् धीरः प्रत्यगात्मानमैक्ष-**

**दावृत्तचक्षुरमृतत्वमिच्छन्॥' ( क.उ. २। १। १ )**

**'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।**

**................. अत्र ब्रह्म समश्नुते॥' ( क.उ. २। ३ । १ ४ )**

**इत्यादिश्रुतिभ्य।**

अथवा 'अतिमुच्ये'त्यनेनैव एषणात्यागस्य सिद्धत्वात् अस्माल्लोकात् प्रेत्य = अस्माच्छरीरादपेत्य, मृत्वेत्यर्थः।। २।।

## वाक्यभाष्यम्

श्रोत्रस्य श्रोत्रम् इत्यादि प्रतिवचनं निर्विशेषस्य निमित्तत्वात्यर्थम्। विक्रियादिविशेषरहिततस्याऽऽत्मनो मनआदिप्रवृतौ निमित्तत्वमित्येतच्छ्रोत्रस्य श्रोत्रम् इत्यादिप्रतिवचनस्यार्थः, अनुगमात्। तदनुगतानि ह्यत्राऽस्मिन्नर्थेऽक्षराणि। कथम्? शृणोत्यनेनेति श्रोत्रम्, तस्य शब्दावभासकत्वं श्रोत्रत्वम्। शब्दोपलब्धृरूपतयाऽव-भासकत्वं न स्वतः, श्रोत्रस्याऽचिद्रूपत्वात् आत्मनश्च चिद्रूपत्वात्। यच्छ्रोत्रस्योप-लब्धृत्वेनाऽवभासकत्वं तदात्मनिमित्तत्वाच्छ्रोत्रस्य श्रोत्रमित्युच्यते; यथा क्षत्रस्य क्षत्रं, यथा वोदकस्यौष्ण्यमग्निनिमित्तमिति दग्धुरप्युदकस्य दग्धाग्निरित्युच्यते, उदकमपि ह्यग्निसंयोगादग्निरुच्यते, तद्वद् अनित्यं यत्संयोगादुपलब्धृत्वं तत्करणं श्रोत्रादि। उदकस्येव दग्धृत्वमनित्यं हि तत्र तत्। यत्र तु नित्यमुपलब्धृत्वमग्ना-विवौष्ण्यं स नित्योपलब्धिस्वरूपत्वाद् दग्धेवोपलब्धा उच्यते श्रोत्रादिषु श्रोतृत्वाद्युपलब्धिरनित्या नित्या चाऽऽत्मनि, अतः श्रोत्रस्य श्रोत्रमित्याद्यक्षराणाम-र्थानुगमाद् उपपद्यते निर्विशेषस्योपलब्धिस्वरूपस्याऽऽत्मनो मनआदिप्रवृत्ति निमित्तत्वामिति मनआदिष्वेवं यथोक्तम्।

## वाक्यभाष्यम्

'वाचो ह वाचम्' 'प्राणस्य प्राणः' इति विभक्तिद्वयं सर्वत्रैव द्रष्टव्यम्। कथम्? पृष्टत्वात् स्वरूपनिर्देशः प्रथमयैव च निर्देशः। तस्य च ज्ञेयत्वात् कर्मत्वमिति द्वितीया। अतो 'वाचो ह वाचम्' 'प्राणस्य प्राण' इत्यस्मात् सर्वत्रैव विभक्तिद्वयम्।

NOTES

## वाक्यभाष्यम्

*आत्मज्ञानेन अमृतत्वम्*–यदेतत् श्रोत्राद्युपलब्धिनिमित्तं श्रोत्रमित्यादिलक्षणं नित्योपलब्धि स्वरूपं निर्विशेषमात्मतत्त्वम्, तद् बुद्ध्वा अतिमुच्य = अनवबोधनिमित्ताध्यारोपिताद् बुध्द्यादिलक्षणात् संसारात् मोक्षणं कृत्वा, धीराः = धीमन्तः, प्रेत्य अस्मात् लोकात् = शरीरात् प्रेत्य = वियुज्य, अन्य-स्मिन्नप्रतिसन्धीयमाने निर्निमित्तत्वादमृता भवन्ति।

सति ह्यज्ञाने कर्माणि शरीरान्तरं प्रतिसन्दधते। आत्मावबोधे तु सर्वकर्मारम्भ-निमित्ताऽज्ञानविपरीतविद्याग्निविप्लुष्टत्वात् कर्मणामनारम्भेऽमृता एव भवन्ति। शरीरादिसन्तानाविच्छेदप्रतिसन्धानाद्यपेक्षयाऽध्यारोपितमृत्युवियोगात् पूर्वमप्यमृताः सन्तो नित्यात्मस्वरूपत्वादमृता भवन्तीत्युपचर्यते।। २।।

न तत्र चक्षुर्गच्छति न वाग् गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यात्। अन्यदेव तद् विदितादथो अविदितादधि। इति शुश्रम पूर्वेषां ये नस्तद् व्याचचक्षिरे।। ३।।

## पदभाष्यम्

यस्माच्छ्रोत्रादेरपि श्रोत्राद्यात्मभूतं ब्रह्म, अतः न तत्र = तस्मिन् ब्रह्मणि चक्षुः गच्छति स्वात्मनि गमनासम्भवात्।

तथा न वाग् गच्छति–वाचा हि शब्द उच्चार्यमाणोऽभिधेयं प्रकाशयति यदा, तदाऽभिधेयं प्रति वाग् गच्छतीत्युच्यते। तस्य च शब्दस्य तन्निर्वर्तकस्य च करणस्याऽऽत्मा ब्रह्म। अतो न वाग् गच्छति।

यथाऽग्निर्दाहकः प्रकाशकश्चापि सन् न ह्यात्मानं प्रकाशयति दहति वा, तद्वत्।

नो मनः–मनश्चाऽन्यस्य सङ्कल्पयितृ अध्यवसायितृ च सत् नाऽऽत्मानं सङ्कल्पयत्यध्यवस्यति च, तस्याऽपि ब्रह्मात्मेति। इन्द्रियमनोभ्यां हि वस्तुनो विज्ञानम्। तदगोचरत्वात्र विद्मः तद् ब्रह्म ईदृशमिति।

अतो न विजानीयो यथा = येन प्रकारेण (तद्) एतद् ब्रह्म अनुशिष्यात् = उपदिशेत्, शिष्यायेत्यभिप्रायः। यद्धि करणगोचरं तदन्यस्मा (तदन्यस्मै) उपदेष्टुं शक्यं जाति-गुण-क्रियाविशेषणैः। न तज्जात्यादिविशेषणवद् ब्रह्म, तस्माद् विषमं शिष्यानुपदेशेन प्रत्याययितुमिति उपदेशे तदर्थग्रहणे च यत्नातिशयकर्तव्यतां दर्शयति।

NOTES

## पदभाष्यम्

'न विद्मो न विजानीमो यथैतदनुशिष्यात्' इति अत्यन्तमेव उपदेशप्रकारप्रत्याख्याने प्राप्ते पदपवादोऽयमुच्यते। सत्यमेवं प्रत्यक्षादिभिः प्रमाणैर्न परः प्रत्याययितुं शक्यः, आगमेन तु शक्यत एव प्रत्याययितुमिति तदुपदेशार्थमागममाह–'अन्यदेव तद् विदितादथो अविदितादधी'ति। अन्यदेव पृथगेव तद् यत् प्रकृतं श्रोत्रादीनां श्रोत्रादीत्युक्तम् अविषयश्च तेषाम्। तद् विदिताद् अन्यदेव हि। विदितं नाम यद् विदिक्रिययाऽतिशयेनाऽऽप्तं विदिक्रियाकर्मभूतं क्वचित् किञ्चित् कस्यचिद् विदितं स्यादिति। सर्वमेव व्याकृतं विदितमेव; तस्मादन्यदेवेत्यर्थः।

'अविदितमज्ञातं तर्हीं' ति प्राप्ते आह–अर्था अपि अविदिताद् विदितविपरीता-दव्याकृताऽविद्यालक्षणाद् व्याकृतबीजात्, 'अधि' इति उपर्यर्थे, लक्षणया अन्यत् इत्यर्थः। यद्धि यस्मादधि उपरि भवति, तत् तस्मादन्यदिति प्रसिद्धम्।

## पदभाष्यम्

*ब्रह्मण आत्माभिन्नत्वम्*–यद् विदितं तदल्पं मर्त्यं दुःख'चेति हेयम्। तस्माद् विदितादन्यद् ब्रह्म इत्युक्ते तु अहेयत्वमुक्तं स्यात्। तथा अविदितादधि इत्यक्ते अनुपादेयत्वमुक्तं स्यात्। कार्यार्थं हि कारणमन्यदन्येन उपादीयते। अतश्च न वेदितुः अन्यस्मै प्रयोजनाय अन्यदुपादेयं भवतीति। एवं विदिताविदिताभ्यामन्यदिति हेयोपादेयप्रतिषेधेन स्वात्मनोऽनन्यत्वाद् ब्रह्मविषया जिज्ञासा शिष्यस्य निर्वर्तिता स्यात्। न ह्यन्यस्य स्वात्मनो विदिताविदिताभ्याम् अन्यत्वं वस्तुनः सम्भवतीत्यात्मा ब्रह्मेत्येष वाक्यार्थः; 'अयमात्मा ब्रह्म' (माण्डू. २) 'य आत्माऽपहतपाप्मा' (छा.उ. ८।७।१), 'यत् साक्षादपरोक्षाद् ब्रह्म' (बृ.उ. ३।४।१), 'य आत्मा सर्वान्तरः' (बृ.उ. ३।४।१) इत्यादिश्रुत्यन्तरेभ्यश्चेति।

एवं सर्वात्मनः सर्वविशेषरहितस्य चिन्मात्रज्योतिषो ब्रह्मत्वप्रतिपादकस्य वाक्यार्थस्य आचार्योपदेशपरम्परया प्राप्तत्वमाह–'इति शुश्रूमे'त्यादि। ब्रह्म च एवमाचार्योपदेशपरम्परया एव अधिगन्तव्यं न तर्कतः; प्रवचन-मेधा-वहुश्रुत-तपोयज्ञादिभ्यश्च, इत्येवं शुश्रुम श्रुतवन्तो वयं पूर्वेषाम् आचार्याणां वचनम्, ये आचार्याः नः अस्मभ्यं तद् ब्रह्म व्याचचक्षिरे व्याख्यातवन्तः विस्पष्टं कथितवन्तः तेषाम् इत्यर्थः।। ३।।

## वाक्यभाष्यम्

'न तत्र चक्षुर्गच्छति' इत्युक्तेऽपि पर्यनुयोगे हेतुरप्रतिपत्तेः। 'श्रोत्रस्य श्रोत्रमि' त्येवमादिना उक्तेऽप्यात्मतत्त्वेऽप्रतिपन्नत्वात् सूक्ष्मत्वहेतोर्वस्तुनः पुनः पुनः पर्यनुयुयुक्षाकारणमाह–'न तत्र चक्षुर्गच्छती'ति। तत्र श्रोत्राद्यात्मभूते चक्षुरादीनि वाक्चक्षुषोः सर्वेन्द्रियोपलक्षणार्थत्वान्न विज्ञानमुत्पादयान्ति।

सुखादिवत् तर्हि गृह्येताऽन्तःकरणेनाऽत आह–'नो मनः'–न सुखादिवन्मनसो विषयस्तत्, इन्द्रियाविषयत्वात्।

'न विद्मो न विजानीमः'-अन्तःकरणेन यथैतद् ब्रह्म मन-आदि करणजातमनुशिष्याद् अनुशासनं कुर्यात् प्रवृत्तिनिमित्तं भवेत् तथा विषयत्वान्न विद्मो न विजानीमः।

## वाक्यभाष्यम्

अथवा 'श्रोत्रादीनां श्रोत्रादिलक्षणं ब्रह्म विशेषेण दर्शय' इत्युक्त आचार्य आह–'न शक्यते दर्शयितुम्।' कस्मात्? 'न तत्र चक्षुर्गच्छति' इत्यादि पूर्ववत् सर्वम्। अत्र तु विशेषो यथैतदनुशिष्यादिति। यथैतदनुशिष्यात् प्रतिपादयेत् अन्योऽपि शिष्यानितोऽन्येन विधिनेत्यभिप्रायः।

## वाक्यभाष्यम्

'सर्वथापि ब्रह्म बोधय' इत्युक्त आचार्य आह–'अन्यदेव तद् विदितादथो अविदितादधि' इत्यागमम् = विदिताविदिताभ्यान्यत्वम्। यो हि ज्ञाता स एव सः, सर्वात्मकत्वात्। अतः सर्वात्मनो ज्ञातुर्ज्ञात्रन्तराभावाद् विदितादन्यत्वम्।

'स वेत्ति वेद्यं न च तस्यास्ति वेत्ता' (श्वे.उ. ३। १९) इति च मन्त्रवर्णात्। 'विज्ञातारमरे केन विजानीयात्' (बृ.उ. २। ४। १४) इति च वाजसनेयके। अपि च, व्यक्तमेव विदितं तस्मादन्यदित्यभिप्रायः। यद् विदितं व्यक्तं तदन्यविषयत्वादल्पं सविरोधं ततोऽनित्यमत एव तद्विलक्षणं ब्रह्मेति सिद्धम्।

## वाक्यभाष्यम्

अथो अविदितादधि-तर्हि अविदितम्, न, विज्ञानानपेक्षत्वात्। यद्धि अविदितं तद् विज्ञानापेक्षम्। अविदितविज्ञानाय हि लोकप्रवृत्तिः। इदं तु

NOTES

विज्ञानानपेक्षम्। कस्मात्? विज्ञानस्वरूपत्वात्। न हि यस्य यत् स्वरूपम्, तत् तेनाऽन्यतोऽपेक्ष्यते। न च स्वत एवाऽपेक्षा, अनपेक्षमेव सिद्धत्वात्। प्रदीपः स्वरूपाभिव्यक्तौ न प्रकाशान्तरमन्यतोऽपेक्षते स्वतो वा। यद्धि अनपेक्षम्, तत् स्वत एव सिद्धम्, प्रकाशात्मकत्वात्। प्रदीपस्याऽपेक्षितोऽप्यनर्थकः स्यात्, प्रकाशे विशेषाभावात्। न हि प्रदीपस्य स्वरूपाभिव्यक्तौ प्रदीपप्रकाशोऽर्थवान्। न चैवमात्मनोऽन्यत्र विज्ञानमस्ति, येन स्वरूपविज्ञानेऽप्यपेक्ष्येत। विरोध इति चेन्न, अन्यत्वात्।

## वाक्यभाष्यम्

स्वरूपविज्ञाने विज्ञानस्वरूपत्वाद् विज्ञानान्तरं नाऽपेक्षत इत्येतदसत्। दृश्यते हि विपरीतज्ञानमात्मनि सम्यग् ज्ञानं च। न जानाम्यात्मानमिति। श्रुतेश्च 'तत् त्वमसि' (छा.उ. ६।८-१६), 'आत्मानमेवाऽवेत्' (बृ.उ. १।४।१०) 'एतं वै तमात्मानं विदित्वा' (बृ.उ. ६।५।१) इति च। सर्वत्र श्रुतिष्वात्मविज्ञाने विज्ञानान्तरापेक्षत्वं दृश्यते। तस्मात् प्रत्यक्षश्रुतिविरोध इति चेत्।

न; कस्मात्? अन्यो हि स आत्मा बुद्ध्यादिकार्यकरणसङ्घाताभिमानसन्ताना-विच्छेदलक्षणोऽविवेकात्मको बुद्ध्यवभासप्रधानः चक्षुरादिकरणो नित्यचित्स्व-रूपात्माऽन्तःसारो, यत्राऽनित्यं विज्ञानम् अवभासते बौद्धप्रत्ययानाम् आविर्भावतिरो-भावधर्मकत्वात् तद्धर्मतयैव विलक्षणमपि चाऽवभासते।

अन्तःकरणस्य मनसोऽपि मनोऽन्तर्गतत्वात् सर्वान्तरश्रुतेः। अन्तर्गतेन नित्यविज्ञानस्वरूपेण आकाशवदप्रचालितात्मनाऽन्तर्गर्भभूतेन बाह्यो बुद्ध्यात्मा तद्विलक्षणः अर्चिभिरिवाऽग्निः प्रत्ययैराविर्भावतिरोभावधर्मकैर्विज्ञानाभास-रूपैरनित्यविज्ञान आत्मा सुखी दुःखीत्यभ्युपगतो लौकिकैः। अतोऽन्यो नित्यविज्ञानस्वरूपादात्मनः। तत्र हि विज्ञानापेक्षा विपरीतज्ञानत्वं चोपपद्यते न पुनर्नित्यविज्ञाने।

## वाक्यभाष्यम्

'तत्वमसी'ति बोधोपदेशो न उपपद्यत इति चेत्। 'आत्मानमेवाऽवेत्' (बृ.उ. १।४।१०) इत्येवमादीनि च नित्यबोधात्मकत्वात्। न हि आदित्योऽन्येन प्रकाशते। अतस्तदर्थबोधोपदेशः अनर्थक इति चेत्।

## वाक्यभाष्यम्

न; लोकाध्यारोपापोहार्थत्वात्। सर्वात्मनि हि नित्यविज्ञाने सवितेति बुद्ध्याद्यनित्यधर्मा लोकैरध्यारोपिता आत्माऽविवेकतस्तदपोहार्थो बोधोपदेशो बोधात्मनः।

## वाक्यभाष्यम्

तत्र च बोधाबोधौ समञ्जसौ, अन्यनिमित्तत्वात्, उदक इवौष्ण्यम् अग्निनिमित्तम्, रात्र्यहनी इव आदित्यनिमित्ते। लोके नित्यौ औष्ण्यप्रकाशौ अग्न्यादित्ययोरन्यत्र भावाभावयोर्निमित्तत्वादनित्याविव उपचर्येते। धक्ष्यत्यग्निः, प्रकाशयति सवितेति, तद्वत्। एवं च सुखदुःख-बन्धमोक्षाद्यध्यारोपो लोकस्य तदपेक्ष्य 'तत्वमसि' 'आत्मानमेवावेत्' इत्यात्मावबोधोपदेशेन श्रुतयः केवलमध्यारोपापोहार्थाः।

## वाक्यभाष्यम्

यथा सविताऽसौ प्रकाशयति आत्मानम् इति तद्वत्, बोधाबोधकर्तृत्वं च नित्यबोधात्मनि। तस्मादन्यदविदितात्। अधिशब्दश्च अन्यार्थे। यद्वा-यद्धि यस्याऽधि, तत् ततोऽन्यत्सामर्थ्यात्। यथाऽधि भृत्यादीनां राजा। अव्यक्तमेव अविदितं ततोऽन्यदित्यर्थः।

विदितमविदितं च व्यक्ताव्यक्ते कार्यकारणत्वेन विकल्पिते, ताभ्यामन्यद् ब्रह्म विज्ञानस्वरूपं सर्वविशेषप्रत्यस्तमितम् इत्ययं समुदायार्थः। अत एव आत्मत्वान्न हेय उपादेयो वा। अन्यद्ध्यन्येन हेयमुपादेयं वा। न तेनैव तद् यस्य कस्यचिद् हेयमुपादेयं वा भवति। आत्मा च ब्रह्म सर्वान्तरात्मत्वादविषयम्, अतोऽन्यस्याऽपि न हेयमुपादेयं वा, अन्याभावाच्च।

'इति शुश्रुम पूर्वेषाम्' इत्यागमोपदेशः। 'व्याचचक्षिरे' इत्यस्वातन्त्र्यं तर्क-प्रतिषेधार्थम्। ये नः तद् ब्रह्म उक्तवन्तः, ते नित्यवेव आगमं ब्रह्मप्रतिपादकं व्याख्यातवन्तः, न पुनः स्वबुद्धिप्रभवेण तर्केण उक्तवन्तः इति आगमपारम्पर्याविच्छेदं दर्शयति विद्यास्तुतये। तर्कस्त्वनवस्थितो भ्रान्तोऽपि भवतीति।। ३।।

NOTES

## पदभाष्यम्

*अवतरणम्*–'अन्यदेव तद् विदितादथो अविदितादधि' इत्यनेन वाक्येन आत्मा ब्रह्मेति प्रतिपादिते श्रोतुराशङ्का जाता–'कथं नु आत्मा ब्रह्म? आत्मा हि नाम अधिकृतः कर्मणि उपासने च संसारी कर्म उपासनं वा साधनमनुष्ठाय ब्रह्मादिदेवान् स्वर्गं वा प्राप्तुमिच्छति। तत् तस्मादन्य उपास्यो विष्णुरीश्वर इन्द्रः प्राणो वा ब्रह्म भवितुमर्हति, न त्वात्मा: लोकप्रत्ययविरोधात्।' यथाऽन्ये तार्किका 'ईश्वरादन्य आत्मा' इत्याचक्षते, तथा कर्मिणः 'अमुं यज, अमुं यज' इत्यन्या एव देवता उपासते। तस्माद् युक्तं यद् विदितमुपास्यं तद् ब्रह्म भवेत्, ततोऽन्य उपासक' इति। तामेतामाशङ्कां शिष्यलिङ्गेन उपलक्ष्य तद्वाक्याद् वा आह–'मैवं शङ्किष्ठाः–'

**यद् वाचाऽनभ्युदिनं येन वागभ्युद्यते।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥ ४॥**

## भावार्थदीपिका

**अन्वयः–**यद् वाचा अनभ्युदितम्, येन वाग् अभ्युद्यते, त्वं तत् एव ब्रह्म विद्धि, इदं (ब्रह्म) न विद्धि, यत् इदम् उपासते॥ ४॥

## पदभाष्यम्

चैतन्यमात्रस्वरूपम्-यत् = चैतन्यमात्रसत्ताकम्, वाचा = वागिति जिह्वामूलादिषु अष्टसु स्थानेषु विषक्तम् विभक्तम् आग्नेयं वर्णानाम् अभिव्यञ्जकम् करणम्, वर्णाश्च अर्थसङ्केतपरिच्छिन्ना एतावन्त एवं क्रमप्रयुक्ता इति; एवं तदभिव्यङ्ग्यः शब्दः पदं वागिति उच्यते; 'अकारो वै सर्वा वाक्, सैषा स्पर्शान्तस्थोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति' (ऐ.आ. २। ३। ७। १३) इति श्रुतेः। मितममितं स्वरः सत्याऽनृते एष विकारो यस्यास्तया वाचा पदत्वेन परिच्छिन्नया करणगुणवत्या–अनभ्युदितम् अप्रकाशितम् अनभ्युक्तम्।

## पदभाष्यम्

*येन वागभ्युद्यते*–येन ब्रह्मणा विवक्षितेऽर्थे सकरणा वाक् अभ्युद्यते चैतन्यज्योतिषा प्रकाश्यते, प्रयुज्यत इत्येतद्। 'यद् वाचो ह वाक्' (के.उ. १। २) इत्युक्तम्, 'वदन् वाक्' (बृ.उ. १। ४। ७), 'यो वाचमन्तरो यमयति'

(बृ.उ. ३।७।१७) इत्यादि च वाजसनेयके। 'या वाक् पुरुषेषु, सा धोषेषु प्रतिष्ठिता, कश्चित् तां वेद ब्राह्मणः' इति प्रश्नमुत्याद्य प्रतिवचनमुक्तम्–'सा वाग् यया स्वप्ने भाषते' इति। सा हि वक्तुर्वक्तिर्नित्या वाक् चैतन्य-ज्योतिःस्वरूपा, 'न हि वक्तुर्वक्तेर्विपरिलोपो विद्यते' (बृ.उ. ४।३।२६) इति श्रुतेः।

## पदभाष्यम्

'तदेव ब्रह्म त्वं विद्धि' इत्यादि। तदेव = आत्मस्वरूपम्, ब्रह्म = निरतिशयं भूमाख्यं 'बृहत्वाद् ब्रह्मे'ति विद्धि = विजानीहि त्वम्। यैर्वागाद्युपाधिभिः 'वाचो ह वाक्, चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रं, मनसो मनः, कर्ता भोक्ता, विज्ञाता, नियन्ता, प्रशासिता, विज्ञानमानन्दं ब्रह्म' इत्येवमादयः संव्यवहारा असंव्यवहारे निर्विशेषे परे साम्ये ब्रह्मणि प्रवर्तन्ते, तान् व्युदस्य आत्मानमेव निर्विशेषं ब्रह्म विद्धीति एवशब्दार्थः। 'नेदं ब्रह्म यदिदम्' इत्युपाधिविशिष्टमनात्मेश्वरादि उपासते = ध्यायन्ति। 'तदेव ब्रह्म त्वं विद्धि' इत्युक्तेऽपि 'नेदं ब्रह्म' इत्यनात्मनोऽब्रह्मत्वं पुनरुच्यते नियमार्थम्, अन्यब्रह्मबुद्धिपरिसंख्यानार्थं वा।। ४।।

## वाक्यभाष्यम्

'यद्वाचे'ति मन्त्रानुवादो दृढप्रतीतेः। 'अन्यदेव तद्विदितादि'ति योऽयमागमार्थो ब्राह्मणोक्तोऽस्यैव द्रढिम्ने मन्त्रा 'यद्वाचा' इत्यादयः पठ्यन्ते। यद् = ब्रह्म, वाचा = शब्देन, अनभ्युदितम् = अनभ्युक्तम्, अप्रकाशितमित्येतत्। 'येन वागभ्युद्यत' इति वाक्प्रकाशहेतुत्वेनोक्तिः। येन प्रकाश्यत इति वाचोऽभिधानस्याऽभिधेय-प्रकाशकत्वस्य हेतुत्वमुच्यते ब्रह्मणः। उक्तं च–'केनेषितां वाचमिमां वदन्ति', 'यद् वाचो ह वाचिमि'ति। 'तदेव ब्रह्म त्वं विद्धी'त्यविषयत्वेन ब्रह्मण आत्मन्यवस्थापनार्थ आम्नायः। यद् वाचाऽनभ्युदितं वाक्प्रकाशनिमित्तं चेति ब्रह्मणोऽविषयत्वेन वस्त्वन्तरजिघृक्षां निवर्त्य स्वात्मन्येवाऽवस्थापयति आम्नायः, 'तदेव ब्रह्म त्वं विद्धी'ति यत्नत उपरमयति। 'नेदमि'त्युपास्यप्रतिषेधाच्च।। ४।।

**यन्मनसा न मनुते येनाऽऽहुर्मनो मतम्।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। ५।।**

## भावार्थदीपिका

**अन्वयः**–यत् मनसा न मनुते, मनः येन मतम् आहुः त्वं तदेव ब्रह्म विद्धि, न इदम्, यत् इदम् उपासते।। ५।।

NOTES

## पदभाष्यम्

'यन्मनसा न मनुते'–'मन' इत्यन्तःकरणं बुद्धिमनसोरेकत्वेन गृह्यते। 'मनुतेऽनेनेति मनः' सर्वकरणसाधारणम्, सर्वविषयव्यापकत्वात्। 'कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव' (बृ.उ. १।५।३) इति श्रुतेः कामादिवृत्तिमन्मनः। तेन मनसा, यत् = चैतन्यज्योतिर्मन- सोऽवभासकं न मनुते = न सङ्कल्पयति नाऽपि निश्चिनोति लोकः, मनसोऽवभासकत्वेन नियन्तृत्वात्। सर्वविषयं प्रति प्रत्यगेवेति, स्वात्मनि न प्रवर्ततेऽन्तःकरणम्। अन्तःस्थेन हि चैतन्यज्योतिषाऽवभासितस्य मनसो मननसामर्थ्यम्; तेन सवृत्तिकं मनो येन = ब्रह्मणा मतं = विषयीकृतं व्याप्तम्, आहुः = कथयन्ति ब्रह्मविदः। तस्मात् तदेव मनस आत्मानं प्रत्यक्चेतयितारं ब्रह्म विद्धि। 'नेदमि'त्यादि पूर्ववत्।। ५।।

## वाक्यभाष्यम्

'यन्मनसा' इत्यादि समानम्। 'मनो मतमि'ति येन ब्रह्मणा मनोऽपि विषयीकृतं नित्यविज्ञानस्वरूपेण इत्येतत्। सर्वकरणानामविषयम्, तानि च सव्यापाराणि सविषयाणि नित्यविज्ञानस्वरूपावभासतया येनाऽवभास्यन्त इति श्लोकार्थः। 'क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति' (गीता ९३ । ३३) इति स्मृतेः। 'तस्य भासा' (मु.उ. २ । ५ । १०) इति चाऽथर्वणे।। ५।।

**यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। ६।।**

## भावार्थदीपिका

**अन्वयः**–यत् चक्षुषा न पश्यति, येन चक्षूंषि पश्यति, तदेव ब्रह्म त्वं विद्धि, नेदम्, यदिदम् उपासते।। ६।।

## पदभाष्यम्

'यच्चक्षुषा न पश्यति न विषयीकरोति अन्तःकरणवृत्तिसंयुक्तेन लोकः, येन चक्षूंषि अन्तःकरणवृत्तिभेदभिन्नाश्चक्षुर्वृत्तीः पश्यति चैतन्यात्मज्योतिषा विषयीकरोति व्याप्नोति, तदेवे'त्यादि पूर्ववत्।। ६।।

NOTES

**यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। ७।।**

## भावार्थदीपिका

**अन्वयः–**यत् श्रोत्रेण न शृणोति, येन इदं श्रोत्रं श्रुतम्, तदेव ब्रह्म त्वं विद्धि, न इदम्, यत् इदम् उपासते।। ७।।

## पदभाष्यम्

'यच्छ्रोत्रेण न शृणोति'–दिग्देवताधिष्ठितेनाऽऽकाशकार्येण मनोवृत्तिसंयुक्तेन न विषयीकरोति लोकः। 'येन श्रोत्रमिदं श्रुतम्'–यत् प्रसिद्धं चैतन्यात्मज्योतिषा विषयीकृतम्, 'तदेवे'त्यादि पूर्ववत्।। ७।।

**यत् प्राणेन न प्राणिति येन प्राणः प्रणीयते।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। ८।।**

**।। इति केनोपनिषदि प्रथमः खण्डः।। १।।**

## पदभाष्यम्

यत्–'प्राणेन' = घ्राणेन पार्थिवेन नासिकापुटान्तरवस्थितेनाऽन्तः–करणप्राण–वृत्तिभ्यां सहितेन (न प्राणिति) गन्धवन्न विषयीकरोति, येन चैतन्यात्मज्योतिषाऽव–भास्यत्वेन स्वविषयं प्रति प्राणः प्रणीयते; 'दतेवे'त्यादि सर्वं समानम्।। ८।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादकृतौ
केनोपनिषत्पदभाष्ये प्रथमः खण्डः।। १।।

## वाक्यभाष्यम्

**'येन प्राण' इति क्रियाशक्तिरपि आत्मविज्ञाननिमित्ता इत्येतत्।। ८।।**

।। इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादकृतौ
केनोपनिषत्वाक्यभाष्ये प्रथमः खण्डः।। १।।

# केनोपनिषद्

## ॥ अथ द्वितीयः खण्डः॥

### पदभाष्यम्

ब्रह्मणोऽवेद्यत्वम्—एवं 'हेयोपादेयविपरीतस्त्वमात्मा ब्रह्मे'ति प्रत्यायितः शिष्यः 'अहमेव ब्रह्मे'ति, 'सुष्ठु वेदाऽहमि'ति मा गृह्णीयादित्याशयादाह आचार्यः शिष्यबुद्धिविचालनार्थम्—'यदी'त्यादि।

ननु इष्टैव 'सुवेदाऽहमि'ति निश्चिता प्रतिपत्तिः? सत्यम्, इष्टा निश्चिता प्रतिपत्तिः; नहि 'सु वेदाहमि'ति। यद्धि वेद्यं वस्तु विषयीभवति, तत् सुष्ठुवेदितुं शक्यम्, दाह्यमिव दग्धुम् अग्नेर्दग्धुः न तु अग्नेः स्वरूपमेव।

सर्वस्व हि वेदितुः स्वात्मा ब्रह्मे'ति सर्ववेदान्तानां सुनिश्चितोऽर्थः। इह च तदेव प्रतिपादितं प्रश्नपतिवचनोक्त्या 'श्रोत्रस्य श्रोत्रम्' इत्याद्यया। 'यद् वाचाऽनभ्युदितमि'ति विशेषतोऽवधारितम्। ब्रह्मवित्सम्प्रदायनिश्चयश्चोक्तः 'अन्यदेव तद् विदितादथो अविदितादधी'ति। उपन्यस्तमुपसंहरिष्यति च 'अविज्ञातं विज्ञानतां विज्ञातमविजानताम्' इति। तस्माद् युक्तमेव शिष्यस्य 'सु वेदे'ति बुद्धिं निराकर्तुम्।

न हि वेदिता वेदितुर्वेदितुं शक्यः अग्निर्दग्धुरिव दग्धमग्नेः। नर चाऽन्यो वेदिता ब्रह्मणोऽस्ति यस्य वेद्यमन्यत् स्याद् ब्रह्म। 'नाऽन्यदतोऽस्ति विज्ञातृ' (बृ. उ. ३. ८. ११) इत्यन्तो विज्ञाता प्रतिषिध्यते। तस्मात् 'सुष्ठुवेदाऽहं ब्रह्मे'ति प्रतिपत्तिर्मिथ्यैव। तस्माद् युक्तमेवाऽऽह आचार्यः 'यदी'त्यादि।

**यदि मन्यसे सुवेदिति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम्।**
**यदस्य त्वं यदस्य देवेष्वथ नु मीमाँस्यमेव ते मन्ये विदितम्॥ १॥**

### पदभाष्यम्

यदि = कदाचित् मन्यसे 'सुवेदि'ति = 'सुष्ठु वेदाऽहं ब्रह्मे'ति। कदाचिद् यथाश्रुतं दुर्विज्ञेयमपि क्षीणदोषः सुमेधाः कश्चित् प्रतिपद्यते, कश्चिन्न इति साशङ्कमाह 'यदी'त्यादि।

दृष्टं च 'य एषोऽक्षिणि पुरुषो दृश्यत एव आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्म' (छा. उ. ८. ७. ४) इत्युक्ते प्राजापत्यः पण्डितोऽप्यसुरराड् विरोचनः स्वभावदोषवशादनुपपद्यमानमपि विपरीतमर्थं शरीरमात्मे'ति प्रतिपन्नः।

NOTES

NOTES

तथेन्द्रो देवराट् सकृद् द्विस्त्रिरुक्तं चाऽप्रतिपद्यमानः स्वभावदोषक्षयमपेक्ष्य चतुर्थे पर्याये प्रथमोक्तमेव ब्रह्म प्रतिपान्नवान्।

लोकेऽपि एकस्माद् गुरोः शृण्वतां कश्चिद् यथावत् प्रतिपद्यते, कश्चिदयथावत्, कश्चिद् विपरीतं, कश्चिन्न प्रतिपद्यते। किमु वक्तव्यमतीन्द्रिय-मात्मतत्त्वम्? अत्र हि विप्रतिपन्नाः सदसद्वादिनस्तार्किकाः सर्वे। तस्माद् विदितं ब्रह्मेति सुनिश्चितोक्तमपि विषमप्रतिपत्तित्वाद् 'यदि मन्यसे' इत्यादि साशङ्कं वचनं युक्तमेव आचार्यस्व। दहरम् अल्पमेवापि नूनं त्वं वेत्थ जानीषे ब्रह्मणो रूपम्।

## पदभाष्यम्

*ब्रह्मण औपाधिकभेदाः*—किमनेकानि ब्रह्मणो रूपाणि महान्त्यर्भकाणि च, येनाऽऽह 'दहरमेवे'त्यादि?

बाढम्; अनेकानि हि नामरूपोपाधिकृतानि ब्रह्मणो रूपाणि, न स्वतः। स्वतस्तु 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्' (क. उ. १।३।१५, नृसिंहोत्तर. ९, मुक्तिक. २।७२) इति शब्दादिभिः सह रूपाणि प्रतिषिध्यन्ते।

ननु येनैव धर्मेण यद् रूप्यते, तदेव तस्य स्वरूपमिति ब्रह्मणोऽपि येन विशेषेण निरूपणं तदेव तस्य स्वरूपं स्यात्। अत उच्यते—चैतन्यं पृथिव्यादीनामन्यतमस्य सर्वेषां विपरिणतानां वा धर्मो न भवति, तथा श्रोत्रादीनामन्तः करणस्य च धर्मो न भवतीति ब्रह्मणो रूपमिति ब्रह्म रूप्यते चैतन्येन।

तथा चोक्तम्—'विज्ञानमानन्दं ब्रह्म' (बृ. उ. ३।९।२८) 'विज्ञानघन एव' (बृ. उ. २।४।१२) सत्यं ज्ञानमनन्तं ब्रह्म' (तै. उ. २।१।१) 'प्रज्ञानं ब्रह्म' (ऐ. उ. ५।३) इति च ब्रह्मणो रूपं निर्दिष्टं श्रुतिषु।

सत्यमेवम्; तथापि तदन्तःकरणदेहेन्द्रियोपाधिद्वारेणैव विज्ञानादिशब्दैर्निर्दिश्यते, तदनुकारित्वाद् देहादिवृद्धिसङ्कोचच्छेदादिषु नाशेषु च, न स्वतः। स्वतस्तु 'अविज्ञातं विजानतां विज्ञातमविजानताम्' (केन. उ. २।३) इति स्थितं भविष्यति।

## पदभाष्यम्

'यदस्य' 'ब्रह्मणो रूपमि'ति पूर्वेण सम्बन्धः। न केवलम् ['श्रोत्रस्य श्रोत्रम्' इत्यादि।] अध्यात्मोपाधिपरिच्छिन्नस्याऽस्य ब्रह्मणो रूपं तवमल्पं वेत्थ;

NOTES

यदप्यधिदैवतोपाधिपरिच्छिन्नस्याऽस्य ब्रह्मणो रूपं देवेषु वेत्थ त्वम्, तदपि नूनं दहरमेव वेत्थ इति मन्येऽहम्। यदध्यात्मं यदपि देवेषु यदधिदैवं तदपि च उपाधिपरिच्छिन्त्वाद् दहरत्वान्न निवर्तते। यत् तु विध्वस्तसर्वोपाधिविशेषं शान्तमनन्तमेकमद्वैतं भूमाख्यं नित्यं ब्रह्म, न तत् सुवेद्यमित्याशयः।

यत एवम् 'अथ नु' तस्मात् मन्ये अद्याऽपि 'मीमांस्यं' विचार्यमेव 'ते' तव ब्रह्म। एवमाचार्योक्तः शिष्य एकान्त उपविष्टः समाहितः सन् यथोक्तमाचार्येण आगमम‍र्थतो विचार्य, तर्कतश्च निर्धार्य, स्वानुभवं कृत्वा, आचार्यसकाशमुपगम्य उवाच–'मन्येऽहमथेदानीं विदितं (मया) ब्रह्मेति'।। १।।

## वाक्यभाष्यम्

'यदि मन्यसे सुवेद' इति शिष्यबुद्धिविचालना गृहीतस्थिरतायै। विदिताविदिताभ्यां निवर्त्य बुद्धिं शिष्यस्य स्वात्मनि अवस्थाप्य 'तदेव ब्रह्म त्वं विद्धी'ति स्वाराज्येऽभिषिच्य उपास्यप्रतिषेधेन अथास्य बुद्धिं विचालयति।

'यदि मन्यसे सुवेद अहं ब्रह्म' इति त्वं ततोऽल्पमेव ब्रह्मणो रूपं वेत्थ त्वमिति नूनं निश्चितं मन्यत इत्याचार्यः। 'सा पुनर्विचालना किमर्थे' त्युच्यते–पूर्वगृहीते वस्तुनि बुद्धेः स्थिरतायै। 'देवेष्वपि सुवेदाऽहमि'ति मन्यते यः, सोऽप्यस्य ब्रह्मणो रूपं दहरमेव वेत्ति नूनम्। कस्मात्? अविषयत्वात् कस्यचिद् ब्रह्मणः।

अथवाऽल्पमेवाऽस्याऽऽध्यात्मिकं मनुष्येषु देवेषु च। आधिदैविकमस्य ब्रह्मणो यद् रूपं तदिति सम्बन्धः। 'अथ न्वि'ति हेतुर्मीमांसायाः। यस्माद् दहरमेव सुविदितं ब्रह्मणो रूपम्, 'अन्यदेव तद् विदितादि' त्युक्तत्वात्। 'सुवेदे'ति च मन्यसे अतोऽल्पमेव वेत्थ त्वं ब्रह्मणो रूपं यस्मादथ नु मीमांस्यमेव अद्यापि ते तव ब्रह्म विचार्यमेव यावद् विदिताविदितप्रतिषेधागमार्थानुभव इत्यर्थः।

'मन्ये विदितमि'ति शिष्यस्य मीमांसानन्तरोक्तिः प्रत्ययत्रयसङ्गतेः। सम्यग्वस्तुविनिश्चयाय विचालितः शिष्य आचार्येण 'मीमांस्यमेव ते' इति चोक्त एकान्ते समाहितो भूत्वा विचार्य यथोक्तं सुपरिनिश्चितः सन्नाऽऽह आगमाऽऽचार्याऽऽत्मानुभव-प्रत्ययत्रयस्यैकविषयत्वेन सङ्गत्यर्थम्। एवं हि 'सुपरिनिष्ठा विद्या सफला स्यात्, न अनिश्चिता' इति न्यायः प्रदर्शितो भवति, 'मन्ये विदितामि'ति परिनिष्ठतनिश्चितविज्ञानप्रतिज्ञाहेतूक्तेः।। १।।

NOTES

**नाहं मन्ये सुवेदेति नो न वेदेति वे च।**
**यो नस्तद् वेद तद् वेद नो न वेदेति वेद च॥ २॥**

**अन्वयः**—अहं (ब्रह्म) सुवेद इति न मन्ये, न वेद इति नो; वेद च (न वेद च); नः यः तद् वेद (सः) तद् वेद, न वेद इति नो, वेद च॥ २॥

## पदभाष्यम्

**( विदितं ) कथमिति? शृणुत—**

'नाऽहं मन्ये सुवेदेति'—नेवाहं मन्ये सुवेद ब्रह्मेति। 'नैव तर्हि विदितं त्वया ब्रह्म' इत्युक्ते आह—'नो न वेदेति वे च।' 'वेद चे'ति च 'शब्दान्न' वेद च।' ननु विप्रतिषिद्धम्—'नाऽहं मन्ये सुवेदेति नो न वेदेति वेद च' इति। यदि न मन्यसे 'सुवेदे'ति कथं मन्यसे 'वेद चे'ति? अथ मन्यते वेदैवे'ति, कथं न मन्यसे 'सुवेदे'ति? एकं वस्तु येन ज्ञायते, तेनैव तदेव वस्तु सुविज्ञायत इति विप्रतिषिद्धं संशयविपयर्यौ वर्जयित्वा। न च ब्रह्म संशयितत्वेन ज्ञेयं विपरीतत्वेन वेति नियन्तुं शक्यम्। संशयविपर्ययौ हि सर्वत्राऽनर्थकत्वेनैव प्रसिद्धौ।

एवमाचार्येण विचाल्यमानोऽपि शिष्यो न विचचाल, 'अन्यदेव तद् विदितादथो अविदितादधि' इत्याचार्योक्तागमसम्प्रदायबलात् उपपत्त्यनुभवबलाच्च; जगर्ज च ब्रह्मविद्यायां दृढ़निश्चयतां दर्शयन्नात्मनः। कथमित्युच्यते—'यो यः कश्चिद् नः अस्माकं सब्रह्मचारिणां मध्ये तन्मदुक्तं वचनं तत्त्वतो वेद, स तद् ब्रह्म वेद।'

**किं पुनस्तद्वचनमित्यत आह**—'नो न वेदेति वेद च' इति। यदेव 'अन्यदेव तद् विदितादथो अविदितादधि' **इत्युक्तम् तदेव वस्तु, अनुमानानुभवाभ्यां संयोज्य निश्चितं वाक्यान्तरेण 'नो न वेदेति वेद च' इत्यवोचत् आचार्यबुद्धिसंवादार्थं मन्दबुद्धिग्रहणव्यपोहार्थं च। तथा च गर्जितमुपपन्नं भवति—'यो नस्तद् वेद तद् वेद' इति॥ २॥**

## वाक्यभाष्यम्

परिनिष्ठितं सफलं विज्ञानं प्रतिजानीत आचार्यात्मनिश्चययोः तुल्यतायै यस्माद्धेतुमाह 'नाऽह मन्ये सुवेद' इति। 'अहे'त्ववधारणार्थो निपातः, 'नैव मन्य' इत्येतत्। 'यावदपरिनिष्ठितं विज्ञानम्, तावत् सुवेद = सुष्ठु वेदाऽहं ब्रह्म' इति विपरीतो मम निश्चय आसीत्। स उपजगाम भवद्भिः विचालितस्य; यथोक्तार्थमीमांसाफलभूतात् स्वात्मब्रह्मत्वनिश्चयरूपात् सम्यक्प्रत्ययाद् विरुद्धत्वात्।

NOTES

अतो 'नाऽह मन्ये सु वेदे'ति। यस्माच्चैतन्नैव न वेद 'नो न वेदे'ति, 'मन्य' इत्यनुवर्तते, अविदितब्रह्मप्रतिषेधात्। कथं तर्हि मन्यस इत्युक्त आह–'वेच च'। 'च'शब्दाद् 'वेद च न वेद चे'त्यभिप्रायः, विदिताविदिताभ्यामन्यत्वाद् ब्रह्मणः। तस्मा'न्मया विदितं ब्रह्मे'ति मन्य 'इति' वाक्यार्थः।

अथवा–'वेद चे'ति नित्यविज्ञानब्रह्मस्वरूपतया नो न वेद, वेदैव चाऽहम्, स्वरूपविक्रियाभावात्। विशेषविज्ञानं च पराध्यस्तं, न स्वत इति 'परमार्थतो न च वेदे'ति।

'यो नस्तद् वेद तद् वेदे'ति पक्षान्तरनिरासार्थमाम्नाय उक्तार्थानुवादात्। यो योऽस्माकं मध्ये स एव तद् ब्रह्म वेद नाऽन्यः, उपास्य–ब्रह्मवित्त्वादतोऽन्यस्य यथाऽहं वेदेति। 'वेद चे'ति पक्षान्तरे ब्रह्मवित्त्वं निरस्यते। कुतोऽयमर्थोऽवसीयत इत्युच्यते–उक्तानुवादात्। उक्तं हि अनवदति 'यो न वेदेति वेद चेति'।। २।।

**यस्माऽमतं तस्य मतं मतं यस्य न वेद सः।**
**अविज्ञातं विजानतां विज्ञातमविजानताम्।। ३।।**

## भावार्थदीपिका

**अन्वयः–**यस्य अमतम्, तस्य मतम्। यस्य मतम्, सः न वेद। (यतः तत्) विजानताम् अविज्ञातम् अविजानतां विज्ञातम्।। ३।।

## पदभाष्यम्

शिष्याचार्यसंवादात् प्रतिनिवृत्य स्वेन रूपेण श्रुतिः समस्तसंवाद–निर्वृत्तमर्थमेव बोधयति–'यस्याऽमतमि'त्यादिना। 'यस्य' = ब्रह्मविदः, 'अमतम्' = अविज्ञातम् अविदितं ब्रह्मेति, 'मतम्' अभिप्रायः निश्चयः, 'तस्य मतं' = ज्ञातं सम्यग् ब्रह्मेत्यभिप्रायः।

'यस्य' पुनः 'मतं' = ज्ञातं विदितं ब्रह्मेति निश्चयः, 'न वेदैव सः' = न ब्रह्म विजानाति सः। विद्वदविदुषोर्यथोक्तौ पक्षौ अवधारयति–'अविज्ञातं विजानतामि'ति। 'अविज्ञातम्' = अमतम् अविदितमेव ब्रह्म, 'विजानताम्' = सम्यग् विदितवताम् इत्येतत्।

'विज्ञातं' = विदितं ब्रह्म, 'अविजानताम्' = असम्यग्दर्शिनाम् इन्द्रियमनोबुद्धिष्वेव आत्मदर्शिनामित्यर्थः। न त्वत्यन्तमेवाऽव्युत्पन्नबुद्धीनाम्। न हि तेषां विज्ञातम् अस्माभिः ब्रह्मेति मतिर्भवति। इन्द्रियमनोबुद्ध्युभुपाधिषु आत्मदर्शिनां तु ब्रह्मोपाधिविवेकानुपलम्भात्, बुद्ध्याद्युपाधेश्च विज्ञातत्वात्

NOTES

'विदितं ब्रह्मे'त्युपपद्यते भ्रान्तिरित्यतोऽसम्यग्दर्शनं पूर्वपक्षत्वेन उपन्यस्यते– 'विज्ञातमविजानतामि'ति। अथवा हेत्वर्थ उत्तरार्धोऽविज्ञातमि'त्यादि:।। ३।।

## वाक्यभाष्यम्

'यस्याऽमतम्' इति श्रौतम् आख्यायिकार्थोपसंहारार्थम्। शिष्याचार्योक्ति-प्रत्युक्तिलक्षणया अनुभूतियुक्तिप्रधानया आख्यायिकया योऽर्थ: सिद्ध:, स श्रौतेन वचनेनाऽऽगमप्रधानेन निगमनस्थानीयेन संक्षेपत उच्यते, सिद्ध:, स श्रौतेन वचनेनाऽऽगमप्रधानेन निगमनस्थानीयेन संक्षेपत उच्यते, यदुक्तं विदितादन्यद् वागादीनामगोचरत्वात् मीमांसितं चाऽनुभवोपपत्तिभ्याम्, ब्रह्म तत् तथैव ज्ञातव्यम्।

कस्मात? यस्याऽमतम्-यस्य = विविदिषाप्रयुक्तप्रवत साधकस्य, अमतम् = अविज्ञातम्, 'अविदितं ब्रह्म' इत्यात्मतत्त्वनिश्चयफलावसानावबोधतया विविदिषा निवृत्ता इत्यभिप्राय:, 'तस्य मतम्' = ज्ञातम्, तेन विदितं ब्रह्म। येनाऽविषयत्वेन आत्मत्वेन प्रतिबुद्धमित्यर्थ:। स सम्यग्दर्शी, यस्य विज्ञानानन्तरमेव ब्रह्मात्मभावस्याऽवसिततत्वात् सर्वत: कार्याभावो विपर्ययेण मिथ्याज्ञानी भवति।

कथम्? 'मतम्' = विदितं, 'ज्ञातं मया ब्रह्मे'ति यस्य विज्ञानम्, स: = मिथ्यादर्शी विपरीतविज्ञानी विदितादन्यत्वाद् ब्रह्मणो न वेद = स न विजानाति।

ततश्च सिद्धम् अवैदिकस्य विज्ञानस्य मिथ्यात्वम् अब्रह्मविषयतया निन्दितत्वात्। तथा कपिल-कणभुगादिसमयस्याऽपि विदितब्रह्मविषयत्वात् अनवस्थिततर्कजन्यत्वाद् विविदिषानिवृत्तेश्च मिथ्यात्वमिति। स्मृतेश्च–

**या वेदबाह्या: स्मृतयो याश्च काश्च कुदृष्टय:।**
**सर्वास्ता निष्फला: प्रोक्तास्तमोनिष्ठा हि ता: स्मृता:।।**

*(मनु. स्मृ. १२/९५)*

इति विपरीत-मिथ्याज्ञानयोर्नष्टत्वात्।

'अविज्ञातं विजानतां विज्ञातमविजानतामि'ति पूर्वहेतूक्ति: अनुवादस्य आनर्थक्यात्। अनुवादमात्रेऽनर्थकं वचनमिति, पूर्वोक्तयो: 'यस्याऽमतमि'त्यादिना ज्ञानाज्ञानयो: हेत्वर्थत्वेन इदमुच्यते।

'अविज्ञातम्' अविदितमात्मत्वेन अविषयातया ब्रह्म 'विजानतां' यस्मात् तस्मात् तदेव ज्ञानम्। यत् तेषां 'विज्ञातं' = विदितं व्यक्तमेव बुद्ध्यादिविषयं ब्रह्म 'अविजानताम्' = विदिताविदितव्यावृत्तम् आत्मभूतं नित्यविज्ञानस्वरूपम्

NOTES

आत्मस्थम् अविक्रियम् अमृतम् अजरम् अभयम् अनन्यत्वादविषयम् इत्येवम् अविजानतां बुद्ध्यादिविषयात्मतयैव नित्यं विज्ञातं ब्रह्म। तस्माद् विदिताविदित-व्यक्ताव्यक्तधर्माध्यारोपेण कार्यकारणभावेन सविकल्पकम्, अयथार्थविषयत्वात्। शुक्तिकादौ रजताद्यध्यारोपणज्ञानवत् मिथ्याज्ञानं तेषाम्।। ३।।

**प्रतिबोधविदितं मतममृतत्वं हि विन्दते।**
**आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्।। ५।।**

## पदभाष्यम्

'अविज्ञातं विजानताम्' इति अवधृतम्। 'यदि ब्रह्म अत्यन्तमेव अविज्ञातम्' (तर्हि) लौकिकानां ब्रह्मविदां च अविशेषः प्राप्तः, 'अविज्ञातं विजानताम्' इति च परस्परविरुद्धम्। कथं नु तद् ब्रह्म सम्यग् विदितं भवति? इत्येवमर्थमाह–

'प्रतिबोधविदितमि'ति। 'प्रतिबोधविदितम्' = बोधं बोधं प्रति विदितम्। 'बोध' शब्देन बौद्धाः प्रत्यया उच्यन्ते। सर्व प्रत्यया विषयीभवन्ति यस्य स आत्मा सर्वबोधान् प्रति बुध्यते। सर्वप्रत्ययदर्शी चिच्छक्तिस्वरूपमात्रः प्रत्ययैरेव प्रत्ययेषु अविशिष्टतया लक्ष्यते, नाऽन्यद् द्वारमन्तरात्मनो विज्ञानाय। अतः बौद्धप्रत्ययप्रत्यगात्मतया विदितं ब्रह्म यदा, तुदा तन्मतम्तत् सम्यग्दर्शनमित्यर्थः।

## पदभाष्यम्

*प्रत्ययसाक्षितया ब्रह्मणोऽभेदः*–सर्वप्रत्यदर्शित्वे च उपजननापाय-वर्जितदृक्स्वरूपता नित्यत्वं विशुद्धस्वरूपत्वम् आत्मत्वं निर्विशेषता एकत्वं च सर्वभूतेषु सिद्धं भवेत्; लक्षणभेदाभावाद् व्योम्न इव घट-गिरि-गुहादिषु। विदिताविदिताभ्याम् अन्यद् ब्रह्म इत्यागमवाक्यार्थ एवं परिशुद्ध एव उपसंहृतो भवति। 'दृष्टेर्द्रष्टा श्रुतेः श्रोता मतेर्मन्ता विज्ञातेर्विज्ञाता' इति हि श्रुत्यन्तरम्।

यदा पुनर्बोधक्रियाकर्तेति बोधक्रियालक्षणेन तत्कर्तारं विजानातीति बोधलक्षणेन विदितं प्रतिबोधविदितमिति व्याख्यायते, यथा यो वृक्षशाखाश्चालयति स वायुरिति तद्वत्; तदा बोधक्रियाशक्तिमान् आत्मा द्रव्यम्, न बोधस्वरूप एव। बोधस्तु जायते विनश्यति च। यदा बोधो जायते, तदा बोधक्रियया सविशेषः। यदा बोधो नश्यति, तदा नष्टबोधोद्रव्यमात्रं निर्विशेषः। तत्र एवं सति विक्रियात्मकः सावयवोऽनित्योऽशुद्ध इत्यादयो दोषा न परिहर्तुं शक्यन्ते।

NOTES

## पदभाष्यम्

*ब्रह्मणः स्वपरसंवेद्यताया औपाधिकत्वम्*–**यत्पुनः** 'स्वसंवेद्यता प्रतिबोधविदितमि'त्यस्य वाक्यस्याऽर्थो वर्ण्यते, तत्र भवति सोपाधिकत्वे आत्मनो बुद्ध्युपाधिस्वरूपत्वेन भेदं परिकल्प्य आत्मना आत्मनां वेत्तीति संव्यवहारः–'आत्मन्येवात्मानं पश्यति' (बृ. उ. ४। ४। २३), 'स्वयमेवाऽऽत्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम' (गीता १०। १५) इति। न तु निरुपाधिकस्याऽऽत्मन एकत्वे स्वसंवेद्यता परसंवेद्यता वा सम्भवति। संवेदनस्वरूपत्वात् संवेदनान्तरापेक्षा च न सम्भवति, यथा प्रकाशस्य प्रकाशान्तरापेक्षाया न सम्भवः तद्वत्।

बौद्धपक्षे स्वसंवेद्यतायां तु क्षणभङ्गुरत्वं निरात्मकत्वं च विज्ञानस्य स्यात्।

'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात्' (बृ. उ. ४। ३। ३०), 'नित्यं विभुं सर्वगतम्' (मु. उ. १। १। ६), 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयः' (बृ. उ. ४। ४। २५) इत्याद्याः श्रुतयो बाध्येरन।

## पदभाष्यम्

*प्रतिबोधार्थविचारः*–'यत् पुनः प्रतिबोधशब्देन निर्निमित्तो बोधः प्रतिबोधः यथा सुप्तस्य' इत्यर्थं परिकल्पयन्ति, 'सकृद् विज्ञानं प्रतिबोध' इत्यपरे, निर्निमित्तः सनिमित्तः सकृद्वाऽसकृद्वा प्रतिबोध एव हि सः।

## पदभाष्यम्

*'अमृतत्वं हि विन्दते'*–''अमृतत्वम् अमरणभावं स्वात्मनि अवस्थानं मोक्षं हि यस्माद् 'विन्दते' लभते यथोक्तात्' 'प्रतिबोधात्' प्रतिबोधविदितात्मकात्, तस्मात् 'प्रतिबोधविदितमेव मतमि'त्यभिप्रायः। बोधस्य हि प्रत्यगात्मविषयत्वं च मतममृतत्वे हेतुः। न ह्यात्मनोऽनात्मत्वममृतत्वं भवति। आत्मत्वादात्मनोऽमृतत्वं निर्निमित्तमेव, एवं मर्त्यत्वमात्मनो यदविद्यया अनात्मप्रतिपत्तिः।''

## पदभाष्यम्

*ज्ञानेनाऽमृतत्वप्राप्तिप्रकारः*–कथं पुनर्यथोक्तयाऽऽत्मविद्ययाऽमृतत्वं विन्दत इत्यत आह–'आत्मना' = स्वेन रूपेण, 'विन्दते' = लभते, 'वीर्यम्' = बलं सामर्थ्यम्। धनसहायमन्त्रौषधितपोयोगकृतं वीर्यं मृत्युं न शक्नोत्यभिभवितुम् अनित्यवस्तुकृतत्वात्; आत्मविद्याकृतं तु वीर्यमात्मनैव विन्दते, नाऽन्येन

इत्यतोऽनन्यसाधनत्वादात्मविद्यावीर्यस्य तदेव वीर्यं मृत्युं शक्नोत्यभिभवितुम्। यत एवमात्मविद्याकृतं वीर्यमात्मनैव विन्दते अतः 'विद्यया' आत्मविषयया 'विन्दतेऽमृतम्' अमृत्वम्। 'नायमात्मा बलहीनेन लभ्यः' (मु. उ. ३। २। ४) इत्याथर्वणे। अतः समर्थो हेतुः 'अमृतत्वं हि विन्दत' इति।।४।।

NOTES

## वाक्यभाष्यम्

'प्रतिबोधविदितं मतम् इति वीप्सा, प्रत्ययानाम् आत्मावबोधद्वारत्वात्। 'बोधं प्रति बोधं प्रती'ति वीप्सा सर्वप्रत्ययव्याप्त्यर्था। बौद्धा हि सर्वे प्रत्ययाः तप्तलोहवन्नित्यविज्ञानस्वरूपपात्मव्याप्तत्वाद् विज्ञानस्वरूपावभासाः, तदन्यावभासश्च आत्मा तद्विलक्षणोऽग्निवदुपलभ्यत इति तेन ते द्वारीभवन्ति आत्मोपलब्धौ। तस्मात् प्रतिबोधावभासप्रत्यगात्मतया यद् विदितं तद् ब्रह्म, तदेव मतं ज्ञातं सम्यग् ज्ञानवत् प्रत्यगात्मविज्ञानम्, न विषयविज्ञानम्। ''आत्मत्वेन प्रत्यगात्मानमैक्षदि'ति च काठके।''

## वाक्यभाष्यम्

*आत्मज्ञानं अमृतत्वनिमित्तम्*–अमृतत्वं हि विन्दते' इति हेतुवचनम्, विपर्यये मृत्युप्राप्तेः। विषयात्मविज्ञाने हि मृत्युः प्रारभत इति आत्मविज्ञान-ममृतत्वनिमित्तम् इति युक्तं हेतुवचन 'ममृतत्वं हि विन्दत' इति।

आत्मज्ञानेन किममृतत्वमुत्पाद्यते? न, कथं तर्हि? 'आत्मना विन्दते' स्वेनैव नित्यात्मस्वभावेनाऽमृतत्वं विन्दते, नाऽऽलम्बनपूर्वकम्। 'विन्दत्' इति आत्मविज्ञानापेक्षम्। यदि हि विद्योत्पाद्यममृतत्वं स्यात्, अनित्यं भवेत् कर्मकार्यवत्। अतो न विद्योत्पाद्यम्।

## वाक्यभाष्यम्

यदि चाऽऽत्मनैवाऽमृतत्वं विन्दते, किं पुनर्विद्यया क्रियत इत्युच्यते। अनात्मविज्ञानं निवर्तयन्ती सा तन्निवृत्त्या स्वाभाविकस्याऽमृतत्वस्य निमित्तमिति कल्प्यते। यत आह– 'वीर्यं विद्यया विन्दते।' 'वीर्यं' सामर्थ्यमनात्माध्यारोप-मायास्वान्तध्वान्तानभिभाव्यलक्षणं बलं 'विद्यया विन्दते।' तच्च किंविशिष्टम्? 'अमृतम्' अविनाशि। अविद्याजं हि वीर्यं विनाशि। विद्ययाऽविद्याया बाध्यत्वात्, न तु विद्याया बाधकोऽस्तीति विद्याजममृतं वीर्यम्। अतो विद्याऽमृतत्वे निमित्तमात्रं भवति। 'नाऽयमात्मा बलहीनेन लभ्यः' (मु. उ. ३। २। ४) इति

NOTES

चाथर्वणे। लोकेऽपि विद्याजमेव बलमभिभवति न शरीरादिसामर्थ्यम्, यथा हस्त्यादेः।

अथवा 'प्रतिबोधविदितं मतमि'ति सकृदेवाऽशेषविपरीतनिरस्तसंस्कारेण स्वप्नप्रतिबोधवद् यद् 'विदितं' तदेव 'मतं' ज्ञातं भवतीति, अथवा गुरूपदेशः 'प्रतिबोधः', तेन वा विदितं मतमिति। उभयत्र 'प्रतिबोध' शब्दप्रयोगोऽस्ति सुप्तप्रतिबुद्धो गुरुणा प्रतिबोधित इति। पूर्वं तु यथार्थम्।। ४।।

## पदभाष्यम्

*अवतरणम्*–कष्टा खलु सुर-नर-तिर्यक्-प्रेतादिषु संसारदुःख-बहुलेषु प्राणिनिकायेषु जन्म-जरा-मरणरोगादिसम्प्राप्तिरज्ञानात्। अतः–

**इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः।**
**भूतेषु भूतेषु विचित्य धीराः प्रेत्याऽस्माल्लोकादमृता भवन्ति।।५।।**

।। इति केनोपनिषदि द्वितीयाः खण्डः।।२।।

## पदभाष्यम्

(अतः) 'इहैव चे'न्मनुष्योऽधिकृतः समर्थः सन् यदि 'अवेदीत्' आत्मानं यथोक्तलक्षणं विदितवान् यथोक्तेन प्रकारेण, 'अथ' तदा 'अस्ति सत्यम्', मनुष्यजन्मन्यस्मिन् अविनाशोऽर्थवत्ता वा सद्भावो वा परमार्थता वा सत्यं विद्यते।

'न चेदिहाऽवेदीदि'ति। न चेदिह जीवंश्चेत् अधिकृतोऽवेदीत् = न विदितवान्, तदा 'महती' दीर्घाऽनन्ता 'विनष्टि' र्विनाशनं जन्म-जरा-मरणादिप्रबन्धविच्छेदलक्षणा संसारगतिः।

तस्मादेवं गुणदोषौ विजानन्तो ब्राह्मणाः 'भूतेषु भूतेषु' सर्वभूतेषु स्थावरेषु चरेषु च एकमात्मतत्त्वं ब्रह्म 'विचित्य' विज्ञाय साक्षात्कृत्य 'धीराः' धीमन्तः 'प्रेत्य' व्यावृत्त्य ममाहंभावलक्षणात् अविद्यारूपादस्मात् लोकात् उपरम्य सर्वात्मैकभावमद्वैतमापन्नाः सन्तः 'अमृता भवन्ति' ब्रह्मैव भवन्तीत्यर्थः। 'स यो ह वैतत् परं ब्रह्म वेद ब्रह्मैव भवति' (मु. उ. ३। २। ९) इति श्रुतेः।। ५।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादकृतौ
केनोपनिषत्पदभाष्ये द्वितीयः खण्डः ।। २।।

## वाक्यभाष्यम्

'इह चेदवेदीत्' इत्यवश्यकर्तव्यतोक्तिः, विपर्यये विनाशश्रुतेः। इह मनुष्यजन्मनि सति अवश्यमात्मा वेदितव्य इत्येतद् विधीयते। कथम्? 'इह चेदवेदीद्' विदितवान्? 'अथ सत्यं परमार्थतत्त्वम्' 'अस्ति' अवाप्तम्, तस्य जन्म सफलमित्यभिप्रायः। 'न चेदिहाऽवेदीत्' न विदितवान् वृथैव जन्म। अपि च 'महती विनष्टिः' महान् विनाशो जन्ममरणप्रबन्धाविच्छेदप्राप्तिलक्षणः स्याद् यतः, तस्मादवश्यं तद्विच्छेदाय ज्ञेय आत्मा।

ज्ञानेन तु किं स्यात्? इत्युच्यते–'भूतेषु भूतेषु' चराचरेषु सर्वेष्वित्यर्थः, 'विचित्य' पृथङ् निष्कृष्याऽऽत्मतत्त्वं संसारधर्मैरस्पृष्टमात्मभावेनोपलभ्येत्यर्थः। अनेकार्थत्वाद् धातूनाम्। न पुनश्चित्वेति सम्भवति, विरोधात्; 'धीराः' धीमन्तो विवेकिनो विनिवृत्तबाह्यविषयाभिलाषाः 'प्रेत्य' मृत्वा 'ऽस्माल्लोकात्' शरीराद्यनात्मलक्षणाद् व्यावृत्तममत्वाहंकाराः सन्त इत्यर्थः। 'अमृता' अमरणधर्माणो नित्यविज्ञानामृतत्वस्वभावा एव भवन्ति।। ५।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमच्छङ्करभगवत्पादकृतौ केनोपनिषत्वाक्यभाष्ये द्वितीयः खण्डः।। २।।

NOTES

# केनोपनिषद्

## ॥ अथ तृतीयः खण्डः॥

## यक्षोपाख्यानम्

**ब्रह्म ह देवेभ्यो विजिग्ये।**
**तस्य ह ब्रह्मणो विजये देवा अमहीयन्त॥ १॥**

## भावार्थदीपिका

**अन्वयः**–ब्रह्म ह देवेभ्यः विजिग्ये। तस्य ह ब्रह्मणः विजये देवाः अमहीयन्त।

## पदभाष्यम्

**आख्यायिकाप्रयोजनम्**
**अविज्ञातं विजानतां विज्ञातमविजानताम्' ( २। ९ )**

इत्यादिश्रवणाद् यदस्ति तद् विज्ञातं प्रमाणैः यन्नाऽस्ति तत् अविज्ञातं शशविषाणकल्पमत्यन्तमेवाऽसद् दृष्टम्; तथेदं ब्रह्माऽविज्ञातत्वादसदेवेति मन्दबुद्धीनां व्यामोहो मा भूदिति तदर्था इयमाख्यायिका आरभ्यते।

तदेव हि ब्रह्म सर्वप्रकारेण प्रशास्तृ देवानामपि परो देवः, ईश्वराणामपि परमेश्वरः, दुर्विज्ञेयः, देवानां जयहेतुः, असुराणां पराजयहेतुः; तत्कथं नास्तीत्येतस्याऽर्थस्याऽनुकूलानि ह्युत्तराणि वचांसि दृश्यन्ते।

अथवा ब्रह्मविद्यायाः स्तुतये। कथम्? ब्रह्मविज्ञानाद्धि अग्न्यादयो देवा देवानां श्रेष्ठत्वं जग्मुः। ततोऽप्यतितराम् इन्द्र इति।

अथवा दुर्विज्ञेयं ब्रह्मेत्येतत् प्रदश्र्यते। येनाऽग्न्यादयोऽतितेजसोऽपि क्लेशेनैव ब्रह्म विदितवन्तस्तथेन्द्रो देवानामीश्वरोऽपि सन्निति।

वक्ष्यमाणोपनिषद्विधिपरं वा सर्वम्, ब्रह्मविद्याव्यतिरेकेण प्राणिनां कर्तृव्य-भोक्तृत्वाद्यभिमानो मिथ्या इत्येतद्दर्शनार्थं वा आख्यायिका, यथा देवानां जयाद्यभिमानः तद्वदिति।

## पदभाष्यम्

'ब्रह्महे'ति। 'बह्म' यथोक्तलक्षणं परम्, 'ह' किल 'देवेभ्यः' अर्थाय

‘विजिग्ये’ जयं लब्धवत्, देवानामसुराणां च संग्रामेऽसुरान् जित्वा जगदरातीन् ईश्वरसेतुभेतॄन् देवेभ्यो जयं तत्फलं च प्रायच्छत् जगतः स्थेम्ने। तस्य ह किल ब्रह्मणो विजये ‘देवाः’ अग्न्यादयः ‘अमहीयन्त’ महिमानं प्राप्तवन्तः।। १।।

NOTES

## वाक्यभाष्यम्

*यक्षोपाख्यानस्य प्रयोजने विकल्पाः*–‘ब्रह्म ह देवेभ्य’ इति ब्रह्मणो दुर्विज्ञेयतोक्तिर्यत्नाधिक्यार्था। समाप्ता ब्रह्मविद्या, यदधीनः पुरुषार्थः। अत ऊर्ध्वमर्थवादेन ब्रह्मणो दुर्विज्ञेयतोच्यते। तद्विज्ञाने कथं नु नाम यत्नमधिकं कुर्यादिति।

शमाद्यर्थो वाऽऽम्नायोऽभिमानशातनात्। शमादि वा ब्रह्मविद्यासाधनं विधित्सितय्, तदर्थोऽयमर्थवादाम्नायः। न हि शमादिसाधनरहितस्याऽभिमानरागद्वेषयुक्तस्य ब्रह्मविज्ञाने सामर्थ्यमस्ति, व्यावृत्तबाह्यमिथ्याप्रत्ययग्राह्यत्वाद् ब्रह्मणः। यस्माच्च अग्न्यादीनां जयाभिमानं शातयति। ततश्च ब्रह्मविज्ञानं दर्शयत्यभिमानोपशमे। तस्माच्छमादिसाधनविधानार्थोऽयमर्थवाद इत्यवसीयते।

सगुणोपासनार्थो वाऽपोदितत्वात्। ‘नेदं यदिदमुपासत’ इत्युपास्यत्वं ब्रह्मणोऽपोदितमपोदितत्वादनुपास्यत्वे प्राप्ते तस्यैव ब्रह्मणः सगुणत्वेनाऽधिदैवत-मध्यात्मं चोपासनं विधातव्यमित्येवमर्थो वा। इत्यधिदैवतं ‘तद्वनमुपासितव्यमि’ति हि वक्ष्यति।

## वाक्यभाष्यम्

‘ब्रह्मे’ति परः, लिङ्गात्, न ह्यत्र परादीश्वरात् नित्यसर्वज्ञात् परिभूयाऽग्न्यादीस्तृणं वज्रीकर्तुं सामर्थ्यमस्ति। ‘तन्न शशाक दग्धुम्’ (३। ६) इत्यादिलिङ्गाद् ‘ब्रह्म’शब्दवाच्य ईश्वर इत्यवसीयते। न ह्यन्यथाऽग्निस्तृणं दग्धुं नोत्सहते, वायुर्वाऽऽदातुम्। ईश्वरेच्छया तृणमपि वज्रीभवतीत्युपपद्यते। तत्सिद्धिर्जगतो नियतप्रवृत्तेः।

श्रुतिस्मृतिप्रसिद्धिभिर्नित्यसर्वविज्ञान ईश्वरे सर्वात्मनि सर्वशक्तौ सिद्धेऽपि शास्त्रार्थनिश्चयार्थमुच्यते। तस्येश्वरस्य सद्भावसिद्धिः कुतो भवतीत्युच्यते।

## वाक्यभाष्यम्

यदिदं जगद् देव-गन्धर्व-यक्ष-रक्षः-पितृ-पिशाचादिलक्षणं द्युवियत्-पृथिव्यादित्य-चन्द्र-ग्रह-नक्षत्रविचित्रं विविधप्राण्युपभोगयोग्यस्थानसाधनसंबंधि तत् अत्यन्तकुशलशिल्पिभिरपि अत्यन्तं दुर्निर्माणं देशकालनिमित्तानुरूप-

NOTES

नियतप्रवृत्तिनृवृत्तिक्रममेतद् भोक्तृकर्मविभागज्ञप्रयत्नपूर्वकं भवितुमर्हति; कार्यत्वे सति यथोक्तलक्षणत्वात्, गृहप्रासाद रथशयनासनादिवत् विपक्ष आत्मादिवत्।

## वाक्यभाष्यम्

कर्मण एवेति चेत्, न; परतन्त्रस्य निमित्तमात्रत्वात्। यदिदमुपभोगवैचित्र्यं प्राणिनां तत्साधनवैचित्र्यं च देशकालनिमित्तानुरूपनियतप्रवृत्तिनिवृत्तिक्रमं च, तन्न नित्यसर्वज्ञकर्तृकम्। किं तर्हि? कर्मण एव तस्याऽचिन्त्यप्रभावत्वात् सर्वैश्च फलहेतुत्वाभ्युपगमात्। सति कर्मणः फलहेतुत्वे किमीश्वराधिककल्पनयेति न नित्यस्येश्वरस्य नित्यसर्वज्ञशक्तेः फलहेतुत्वं चेति चेत्।

## वाक्यभाष्यम्

न कर्मण एवोपभोगवैचित्र्यादि उपपद्येत। कस्मात्? कर्तृतन्त्रत्वात् कर्मणः। चितिमत् प्रयत्ननिर्वृतं हि कर्म तत्प्रयत्नोपरमादुपरतं सद् देशान्तरे कालान्तरे वा नियतनिमित्तविशेषापेक्षं कर्तुः फलं जनयिष्यतीति न युक्तमनपेक्ष्यान्यदात्मनः प्रयोक्तृ। कर्तैव फलकाले प्रयोक्तेति चेन्मया निर्वतितोऽसि त्वां प्रयोक्ष्ये फलाय यदात्मानुरूपं फलमिति।

## वाक्यभाष्यम्

न, देशकालनिमित्तविशेषानभिज्ञत्वात्। यदि हि कर्ता देशविशेषाभिज्ञः सन् स्वातन्त्र्येण कर्म नियुञ्ज्यात्, ततोऽनिष्टफलस्याऽप्रयोक्ता स्यात्। न च निर्निमित्तं तदनिच्छयाऽऽत्मसमवेतं तच्चमेवद् विकरोति कर्म।

न चाऽऽत्मकृतमकर्तृसमवेतमयस्कान्तमणिवदाक्रष्टृ भवति, प्रधानकर्तृसमवेतत्वात्कर्मणः।

## वाक्यभाष्यम्

भूताश्रयमिति चेत् न; साधनत्वात्। कर्तृक्रियायाः साधनभूतानि भूतानि क्रियाकालेऽनुभूतव्यापाराणि समाप्तौ च हलादिवत्कर्त्रा परित्यक्तानि न फलं कालान्तरे कर्तुमुत्सहन्ते। न हि हलं क्षेत्राद् व्रीहीन् गृहं प्रवेशयति। भूतकर्मणोश्चाऽचेतनत्वात् स्वतःप्रवृत्त्यनुपपत्तिः। वायुवदिति चेन्नाऽसिद्धत्वात्। न हि वायोरचितिमतः स्वतः प्रवृत्तिः सिद्धा, रथादिष्वदर्शनात्।

## वाक्यभाष्यम्

शास्त्रात् कर्मण एवेति चेच्छास्त्रं हि क्रियातः फलसिद्धिमाह नेश्वरादेः 'स्वर्गकामो यजेते'त्यादि। न च प्रमाणाधिगतत्वादानर्थक्यं युक्तम्, न चेश्वरास्तित्वे प्रमाणान्तरमस्तीति चेत्।

न; दृष्टन्यायहानानुपपत्तेः। क्रिया हि द्विविधा दृष्टफला अदृष्टफला च। दृष्टफलाऽपि द्विविधा-अनन्तरफला आगामिफला च। अनन्तरफला गतिभुजिलक्षणा। कालान्तरफला च कृषिसेवादिलक्षणा। तत्राऽनन्तरफला फलापवर्गिण्येव, कालान्तरफला तूत्पन्नप्रध्वंसिनी।

आत्मसेव्याद्यधीनं हि कृषिसेवादेः फलं यतः। न चोभयन्यायव्यतिरेकेण स्वतन्त्रं कर्म ततो वा फलं दृष्टम्। तथा च कर्मफलप्राप्तौ न दृष्टन्यायहानमुपपद्यते। तस्माच्छान्ते यागादिकर्मणि नित्यः कर्तृकर्मफलविभागज्ञः ईश्वरः सेव्यादिवद् यागाद्यनुरूपफलदातोपपद्यते। स चाऽऽत्मभूतः सर्वस्य सर्वक्रियाफलप्रत्ययसाक्षी नित्यविज्ञानस्वभावः संसारधर्मैरसंस्पृष्टः।

## वाक्यभाष्यम्

श्रुतेश्च–'न लिप्यते लोकदुःखेन बाह्यः' (क. उ. २। २। ११), 'जरां मृत्युमत्येति' (बृ. उ. ३। ५। १), 'विजरो विमृत्युः' (छा. उ. ८। ७। १), 'सत्यकामः सत्यसङ्कल्पः' (छा. उ. ८। ७। १), 'एष सर्वेश्वरः' (मा. उ. ६) 'साधु कर्म कारयति' (कौषी. ३।९), 'अनश्नन्नन्यो अभिचाकशीति' (श्वे उ. ४।६) 'एतस्य वा अक्षरस्य प्रशासने' (बृ. उ. ३। ८।९), इत्याद्या असंसारिण एकस्याऽऽत्मनो नित्यमुक्तस्य सिद्धौ श्रुतयः। स्मृतयश्च सहस्रशो विद्यन्ते। न चाऽर्थवादाः शक्यन्ते कल्पयितुम्। अनन्ययोगित्वे सति विज्ञानोत्पादकत्वात्। न चोत्पन्नं विज्ञानं बाध्यते।

## वाक्यभाष्यम्

अप्रतिषेधाच्च। न बेधरो नास्तीति निषेधोऽस्ति। प्राप्त्यभावादिति चेत्, न; उक्तत्वात्। 'न हिंस्यादि' तिवत् प्राप्त्यभावात् प्रतिषेधो नाऽऽरभ्यत इति चेत्, न; ईश्वर-सद्भावे न्यायस्योक्तत्वात्। अथवाऽप्रतिषेधादिति कर्मणः फलदान ईश्वरकालादीनां न प्रतिषेधोऽस्ति। न च निमित्तान्तरनिरपेक्षं केवलेन कर्त्रैव प्रत्युक्तं फलदं दृष्टम्। न च विनष्टोऽपि यागः कालान्तरे फलदो भवति।

NOTES

## वाक्यभाष्यम्

सेव्यबुद्धिवत् सेवकेन सर्वज्ञेश्वरबुद्धो तु संस्कृतायां यागादिकर्मणा विनष्टेऽपि कर्मणि सेव्यादिव ईश्वरात् फलं कर्तुर्भवतीति युक्तम्। न तु पुनः पदार्था वाक्यशतेनाऽपि देशान्तरे कालान्तरे वा स्वं स्वं स्वभावं जहति। न हि देशाकालान्तरेषु चाऽग्निरनुष्णो भवति।

## वाक्यभाष्यम्

एवं कर्मणोऽपि कालान्तरे फलं द्विप्रकारमेवोपलभ्यते। बीजक्षेत्रसंस्कार-परिरक्षाविज्ञानवत् कर्त्रपेक्षफलं कृष्यादि, विज्ञानवत्सेव्यबुद्धि संस्कारापेक्षफलं च सेवादि। यागादेः कर्मणस्तथाऽविज्ञानवत्कर्त्रपेक्षफलत्वानुपपत्तौ कालान्तर-फलत्वात् कर्मदेशकालनिमित्तविपाकविभागज्ञबुद्धिसंस्कारापेक्षं फलं भवितुमर्हति, सेवादिकर्मानुरूपफलज्ञसेव्यबुद्धिसंस्कारापेक्षफलस्येव। तस्मात् सिद्धः सर्वज्ञ ईश्वरः सर्वजन्तुबुद्धिकर्मफलविभागसाक्षी सर्वभूतान्तरात्मा। 'यत् साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः' (बृ. उ. ३। ४। १) इति श्रुतेः।

## वाक्यभाष्यम्

स एव चाऽत्राऽऽत्मा जन्तूनाम्। ''नाऽन्योऽतोऽस्ति द्रष्टा...श्रोता...मन्ता... विज्ञाता'' (बृ. उ. ३। ७। २३), ''नाऽन्यदतोऽस्ति विज्ञातृ'' (बृ. उ. ३। ८। ११) इत्याद्यात्मान्तरप्रतिषेधश्रुतेः, ''तत्त्वमसि'' (छा. उ. ६। ८। ७) इति चात्मत्वोपदेशात्। न हि मृत्पिण्डः काञ्चनात्मत्वेनोपदिश्यते।

## वाक्यभाष्यम्

ज्ञान-शक्ति-कर्मोपास्योपासक-शुद्धाशुद्ध-मुक्तामुक्तभेदादात्मभेद एवेति चेत्, न; भेददृष्ट्यपवादात्।

यदुक्तं संसारिण ईश्वरादनन्या इति, तत्र। किं तर्हि? भेद एव संसार्यात्मनाम्। कस्मात्? लक्षणभेदात्, अश्वमहिषवत्। कथं लक्षणभेद इत्युच्यते।

ईश्वरस्य तावन्नित्यं सर्वविषयं ज्ञानं सवितृप्रकाशवत्। तद्विपरीतं संसारिणां खद्योतस्येव। तथैव शक्तिभेदोऽपि। नित्या सर्वविषया चेश्वरशक्तिः विपरीता इतरस्य। कर्म च चित्स्वरूपात्मसत्तामात्रनिमित्तमीश्वरस्य। औष्ण्यस्वरूपद्रव्य-सत्तामात्रनिमित्तदहनकर्मवत्, राजायस्कान्तप्रकाशकर्मवच्च स्वात्माविक्रियारूपम्, विपरीतमितरस्य।

NOTES

'उपासीते'ति वचनादुपास्य ईश्वरो गुरुराजवत्। उपासकश्चेतरः शिष्यभृत्यवत्। अपहृतपाप्मादिश्रवणान्नित्यशुद्ध ईश्वरः। 'पुण्यो वै पुण्येने'ति वचनाद् विपरीत इतरः। अत एव नित्यमुक्तेश्वरः, नित्यशुद्धियोगात्। संसारीतरः। अपि च यत्र ज्ञानादिलक्षणभेदोऽस्ति तत्र भेदो दृष्टः, यथाऽश्वमहिषयोः। तथा ज्ञानादिलक्षणभेदादीश्वरादात्मनां भेदोऽस्तीति चेत्, न।

## वाक्यभाष्यम्

**(इति चेत्, न।) कस्मात्?** 'अन्योऽसावन्योऽहमस्तीति न स वेद' (बृ. उ. १। ४। १०), 'ते क्षय्यलोका भवन्ति' (छा. उ. ७।२५।२), 'मृत्योः स मृत्युमाप्नोति' (क. उ. २।१।१०), इति भेददृष्टिर्ह्यपोह्यते। एकत्वप्रतिपादिन्यश्च श्रुतयः सहस्रशो विद्यन्ते।

ज्ञानादिभेदस्य औपाधिकत्वम्—यदुक्तं ज्ञानादिलक्षणभेदादित्यत्रोच्यते—(१) न, अनभ्युपगमात्। बुद्ध्यादिभ्यो व्यतिरिक्ता विलक्षणाश्चेश्वराद् भिन्नलक्षणा आत्मानो न सन्ति। एक एवेश्वरश्चात्मा सर्वभूतानां नित्यमुक्तोऽभ्युपगम्यते। बाह्यश्चक्षुर्बुद्ध्यादिसमाहारसन्तानाहङ्कारममत्वादिविपरीतप्रत्ययप्रबन्धाविच्छेद-लक्षणो नित्यशुद्धबुद्धमुक्तविज्ञानात्मेश्वरगर्भोनित्यविज्ञानाभासः चित्तचैत्यबीज-बीजिस्वभावः कल्पितोऽनित्यविज्ञान ईश्वरलक्षणविपरीतोऽभ्युगम्यते, यस्याऽविच्छेदे संसारव्यवहारः विच्छेदे च मोक्षव्यवहारः।

## वाक्यभाष्यम्

(२) अन्यश्च मृत्प्रलेपवत् प्रत्यक्षप्रध्वंसो देवपितृमनुष्यादिभूतविशेषसमाहारः, न पुनश्चतुर्थोऽन्यो भिन्नलक्षणा ईश्वरादभ्युपगम्यते।

(३) बुद्ध्यादिकल्पितात्मव्यतिरेकाभिप्रायेण तु लक्षणभेदात् इत्याश्रयासिद्धो हेतुः, ईश्वरादन्यस्याऽत्मनोऽसत्त्वात्।

## वाक्यभाष्यम्

ईश्वरस्यैव विरुद्धलक्षणत्वमयुक्तमिति चेत् सुखदुःखादियोगश्च।

न, निमित्तत्वे सति लोकविपर्ययाध्यारोपणात् सवितृवत्। यथा हि सविता नित्यप्रकाशरूपत्वात् लोकाभिव्यक्त्यनभिव्यक्तिनिमित्तत्वे सति लोकदृष्टि-विपर्ययेणोदयास्तमयाहोरात्रादिकर्तृत्वाध्यारोपभाग् भवत्येवमीश्वरे नित्यविज्ञानशक्ति-रूपे 'लोकज्ञानापोहसुखदुःखस्मृत्यादिनिमित्तत्वे सति लोकविपरीतबुद्ध्याध्यारोपितं विपरीतलक्षणत्वं सुखदुःखाश्रयत्वं च न स्वतः।

NOTES

## वाक्यभाष्यम्

आत्मदृष्ट्यनुरूपाध्यारोपाच्च। यथा घनादिविप्रकीर्णेऽम्बरे येनैव सवितृप्रकाशो न दृश्यते स आत्मदृष्ट्यनुरूपमेवाऽध्यस्यति 'सवितेदानीमिह न प्रकाशयती'ति सत्येव प्रकाशेऽन्यत्र भ्रान्त्या। एवमिह बौद्धादिवृत्त्युद्भवाभिभवाकुलभ्रान्त्याध्यारोपित: सुखदु:खादियोग उपपद्यते।

तत्स्मरणाच्च। तस्यैवेश्वरस्यैव हि स्मरणम्–''मत्त: स्मृतिर्ज्ञानमपोहनं च'' (गीता १५। १५) ''नाऽदत्ते कस्यचित् पापम्'' (गीता ९। १५) इत्यादि। अतो नित्युक्त एकस्मिन् सवितरीव लोकाविद्याध्यारोपितमीश्वरे संसारित्वम्। शास्त्रादिप्रामाण्यादभ्युपगतमसंसारित्वमित्यविरोध इति।

## वाक्यभाष्यम्

एतेन प्रत्येकं ज्ञानादिभेद: प्रत्युक्त:; सौक्ष्म्यचैतन्यसर्वगत्वाद्यविशेषे च भेदहेत्वभावात्, विक्रियावत्त्वे चाऽनित्यत्वात्, मोक्षे च विशेषानभ्युपगमात्, अभ्युपगमे चानित्यत्वप्रसङ्गात्, अविद्यावदुपलभ्यत्वाच्च भेदस्य तत्क्षयेऽनुपपत्तिरिति सिद्धम् एकत्वम्।

तस्मात् शरीरेन्द्रियमनोबुद्धिविषयवेदनासन्तानस्य अहङ्कारसम्बन्धादज्ञान-बीजस्य नित्यविज्ञानान्यनिमित्तस्याऽऽत्मतत्त्वयाथात्म्यविज्ञानाद् विनिवृत्तावज्ञानबीजस्य विच्छेद आत्मनो मोक्षसंज्ञा; विपर्यये च बन्धसंज्ञा, स्वरूपापेक्षत्वादुभयो:।

## वाक्यभाष्यम्

'ब्रह्म ह' इत्यैतिह्यार्थ:। पुरा किल देवासुरसंग्रामे जगत् स्थितिपरिपि-पालयिषयाऽऽत्मानुशासनानुवर्तिभ्यो देवेभ्योऽर्थिभ्योऽर्थाय विजिग्येऽजैषीदसुरान्। ब्रह्मण इच्छानिमित्तो विजयो देवानां बभूवेत्यर्थ:। तस्य ह ब्रह्मणो–विजये देवा अमहीयन्त। यज्ञादिलोकस्थित्यपहारिष्वसुरेषु पराजितेषु देवा वृद्धिं पूजां वा प्राप्तवन्त:।। १।।

**त ऐक्षन्ता 'ऽस्माकमेवायं विजयीऽस्माकमेवाऽयं महिमे'ति। तद्धैषां विजज्ञौ, तेभ्यो ह प्रादुर्बभूव, तन्न व्यजानत–'किमिदं यक्षामि'।। २।।**

## वाक्यभाष्यम्

तदा आत्मसंस्थस्य प्रत्यगात्मन ईश्वरस्य सर्वज्ञस्य सर्वक्रियाफलसंयोजयितु: प्राणिनां सर्वशक्ते: जगत: स्थितिं चिकीर्षो: अयं जयो महिमा चेत्यजानन्त: ते

देवाः ऐक्षन्त ईक्षितवन्तः अग्न्यादिस्वरूपपरिच्छिन्नात्मकृतः 'अस्माकमेवाऽयं विजयः, अस्माकमेवाऽयं महिमा अग्नि-वाय्विन्द्रत्वादिलक्षणो जयफलभूतोऽस्मा-भिरनुभूयते; नाऽस्मत्प्रत्यगात्मभूतेश्वरकृतः।'

इत्येवं मिथ्याभिमानेक्षणवतां तत् ह किल एषां मिथ्येक्षणं विजज्ञौ विज्ञातवद् ब्रह्म। सर्वेक्षितृ हि तत् सर्वभूतकरणप्रयोक्तृत्वात् देवानां च मिथ्याज्ञानमुपलभ्य 'मैवाऽसुरवद् देवा मिथ्याभिमानात् पराभवेयुरि'ति तदनुकम्पया 'देवान् मिथ्याभिमानापनोदनेनाऽनुगृह्णीयामि'ति तेभ्यः देवेभ्यः ह किल अर्थाय प्रादुर्वभूव स्वयोगमाहात्म्यनिर्मितेनाऽत्यद्भुतेन विस्मापनीयेन रूपेण देवानामिन्द्रिय-गोचरे प्रादुर्बभूव प्रादुर्भूतवत्। तत् प्रादुभृतं ब्रह्म न व्यजानत नैव विज्ञातवन्तः देवाः 'किमिदम्? यक्षं पूज्यं महद्भूतमि'ति।। २।।

## वाक्यभाष्यम्

'त एक्षन्त' इति मिथ्याप्रत्ययत्वाद्धेयत्वख्यापनार्थमान्नायः। ईश्वरनिमित्ते विजये स्वसामर्थ्यनिमित्तो 'ऽस्माकमेवाऽयं विजयोऽस्माकमेवाऽयं महिमे'त्यात्मनो ज्यादि श्रेयोनिमित्तं सर्वात्मानमात्मस्थं सर्वकल्याणास्पदमीश्वरमेवाऽत्मत्वेन बुद्धवा पिण्डमात्राभिमानाः सन्तो यं मिथ्याप्रत्ययं चक्रुः, तस्य पिण्डमात्रविषयत्वेन मिथ्याप्रत्ययत्वात् सर्वात्मेश्वरयाथात्म्यावबोधेन हातव्यताख्यापनार्थ 'स्तद्धैषामि' 'त्याद्याख्यायिकाम्नायः।'

तद् ब्रह्म ह किलैषां देवानामभिप्रायं मिथ्याहङ्काररूपं विजज्ञौ विज्ञातवत्। ज्ञात्वा च मिथ्याभिमानशातनेन तदनुजिघृक्षया देवेभ्योऽर्थाय तेषामेवेन्द्रियगोचरे नाऽतिदूरे प्रादुर्बभूव। महेश्वरशक्तिमायोपात्तेनाऽत्यन्ताद्भुतेन प्रादुर्भूतं किल केनचिद् रूपविशेषेण। तत् किलोपलभमाना अपि देवा न व्यजानत न विज्ञातवन्तः 'किमिदम् यदेतद् यक्षं पूज्यामि'ति।। २।।

**तेऽग्निमब्रुव'ञ्जातवेद एतद् विजानीहि किमिदं' 'यक्षमि'ति 'तथे'ति।। ३।।**

## भावार्थदीपिका

**अन्वयः–**ते अग्निम् अब्रुवन्–'जातवेदः! एतद् विजानीहि, किम् इदं 'यक्षम्' इति। 'तथा' इति।। ३।।

NOTES

## पदभाष्यम्

ते तदजानन्तो देवाः सान्तर्भयास्तद्विजिज्ञासवः अग्निम् अग्रगामिनं जातवेदसं सर्वज्ञकल्पम् अब्रुवन् उक्तवन्तः–'हे जातवेदः! एतद् अस्मद्गोचरस्थं यक्षं विजानीहि विशेषतो बुध्यस्य त्वं नस्तेजस्वी किमेतद् यक्षमि'ति। 'तथास्तु' इति।। ३।।

## वाक्यभाष्यम्

**तदभ्यद्रवत् तमभ्यवदत्–'कोऽसी' 'त्यग्निर्वा जातवेदा व अहमस्मी'ति।। ४।।**

## भावार्थदीपिका

**अन्वयः–**तत् अभ्यद्रवत्, तम् अभ्यवदत्–'कः असि' इति, अग्निः वा अस्मि, जातवेदाः वा अस्मि' इति अब्रवीत्।। ४।।

## पदभाष्यम्

'तत्' यक्षम् अभ्यद्रवत् = तत् प्रति गतवानग्निः। तं च गतवन्तं पिपृच्छिषुं तत्समीपेऽप्रगल्भत्वात् तूष्णीभूतं तद् यक्षम् अभ्यवदत् = अग्निं प्रति अभाषत–'कोऽसी'ति। एवं ब्रह्मणा पृष्टोऽग्निः अब्रवीत्–'अग्निर्वै = अग्निर्नामाऽहं प्रसिद्धो 'जातवेदा' इति च नामद्वयेन प्रसिद्धतयाऽऽत्मानं श्लाघयन्।। ४।।

**'तस्मिँस्त्वयि किं वीर्यमि'त्य त्यपीदँसर्वं दहेयं यदिदं पृथिव्यामि'ति।। ५।।**

## भावार्थदीपिका

**अन्वयः–**'तस्मिन् त्वयि किं वीर्यम्?' इति, 'यदिदं पृथिव्याम्, सर्वमपि इदं दहेयम्' इति।। ५।।

## पदभाष्यम्

इत्येवमुक्तवन्तं ब्रह्माऽवोचत्–'तस्मिन् एवं प्रसिद्धगुणनामवति त्वयि किं वीर्यं सामर्थ्यम्?' इति। सोऽब्रवीत्–इंद जगत् सर्वं दहेयं भस्मीकुर्याम्, यदिदं स्थावरादि पृथिव्याम्' इति। 'पृथिव्यामि'त्युप लक्षणार्थम् यतोऽन्तरिक्षस्थमपि दह्यत एवाऽग्निना।। ५।।

**तस्मै तृणं निदधा 'वेतद् दहे'ति; तदुपप्रेयाय, सर्वजवेन तन्न शशाक दग्धुम्, स तत एव निववृते–'नैतदशकं विज्ञातुं यदेतद् यक्षमि'ति॥ ६॥'**

NOTES

## भावार्थदीपिका

**अन्वयः**–'एतद् दह' इति तस्मै तृणं निदधौ। तत् उपप्रेपाय। सर्वजवेन तत् दग्धुं न शशाक। सः तत एव निववृते, (अहम्) एतद् विज्ञातुं न अशकम्, यत् एतद् यक्षम्' इति।। ६।।

## पद्भाष्यम्

तस्मै एवमभिमानवते ब्रह्म तृणं निदधौ पुराऽग्नेः स्थापितवत्। ब्रह्मणा 'एतत् तृणमात्रं ममाऽग्रतो दह। न चेदसि दग्धुं समर्थः, मुञ्च दग्धृत्वाभिमानं सर्वत्र' 'इत्युक्तस्तत् तृणमुपप्रेयाय = तृणसमीपं गतवान्। सर्वजवेन = सर्वोत्साहकृतेन वेगेन गत्वा तत् न शशाक = नाऽशकद् दग्धुम्। स जातवेदाः तृणं दग्धुमशक्तो व्रीडितो हतप्रतिज्ञः तत एव यक्षादेव तूष्णीं देवान् प्रति निववृते निवृतः प्रतिगतवान्। 'नैतद् यक्षमशकं = शक्तवानहं विज्ञातुम्, विशेषतो यदेतद् यक्षमि'ति।। ६।।

**अथ वायुमब्रुवन्–'वायवेतद् विजानीहि, किमेतद् यक्षमि'ति। 'तथे'ति॥ ७॥**

## भावार्थदीपिका

**अन्वयः**–अथ वायुम् अब्रुवन्–'वायो! एतद् विजानीहि, एतद् यक्षं किम्' इति। 'तथा' इति।। ७।।

## पदभाष्यम्

'अथ वायुमि'ति। अथ अनन्तरं वायुमब्रुवन्–हे वायो! एतद् विजानीही'त्यादि समानार्थं पूर्वेण।। ७।।

**तदभ्यद्रवत् तमभ्यवदत्–'कोऽसी'ति, 'वायुर्वा अहमस्मी'त्यब्रवी'न्मातरिश्वा वा अहमस्मी'ति॥ ८॥**

## भावार्थदीपिका

**अन्वयः**–तत् अभ्यद्रवत्, तम् अभ्यवदत् 'कः असि?' इति। 'अहं वायुः वा अस्मि' इति, 'अहं मातारिश्वा वा अस्मि' इति अब्रवीत्।। ८।।

## पदभाष्यम्

'वायुर्वा' इति। वानाद् गमनाद् गन्धनाद् वायुः। मातरि अन्तरिक्षे श्वयतीति मातरिश्वा।। ८।।

**'तस्मिँस्त्वयि किं वीर्यमि' 'त्यपीद सर्वमाददीय यदिदं पृथिव्या-मि'ति।। ९।।**

## भावार्थदीपिका

**अन्वयः**–'तस्मिन् त्वयि किं वीर्यम्' इति, 'यदिदं पृथिव्यां सर्वमपीदम् आददीय' इति।। ९।।

## पदभाष्यम्

इदं सर्वमपि आददीय = गृह्णीयाम्, यदिदं पृथिव्यामित्यादि समानमेव।। ९।।

**तस्मै तृणं निदधा 'वेतदादत्स्वे'ति, तदुपप्रेयाय सर्वजवेन तन्न शशाकाऽऽदातुम्, स तत एव निववृते, 'नैतदशकं विज्ञातुं 'यदेतद् यक्षमि'ति।। १०।।**

## भावार्थदीपिका

**अन्वयः**–'एतद् आदत्स्व' इति तस्मै तृणं निदधौ। तत् उपप्रेयाय। सर्वजवेन तत् आदातुं न शशाक। सः तत एव निववृते। 'अहम् एतद् विज्ञातुं न अशकम् यत् एतद् यक्षम्' इति।। १०।।

## वाक्यभाष्यम्

तृणनिधानेऽयमभिप्रायोऽत्यन्तसम्भावितयोरग्निमारुतयोस्तृणदहनादानशक्त्याऽऽ-त्मसम्भावना शातिता भवेदिति।। १०।।

**अथेन्द्रमब्रुवन्–'मघवन्नेतद् विजानीहि, किमेतद् यक्षमि'ति।**
**'तथे'ति तदभ्यद्रवत्, तस्मात् तिरोदधे।। ११।।**

## भवार्थदीपिका

**अन्वयः–**अथ (देवाः) इन्द्रम् अब्रुवन्–'मघवन्! एतद् विजानीहि, एतद् यक्षं किम्?' तत् अभ्यद्रवत्, तस्मात् तिरोदधे इति।। ११।।

## पदभाष्यम्

'अथेन्द्रमि'ति। अथेन्द्रमब्रुवन्–'मघवन्! एतद् विजानीहि' इत्यादि पूर्ववत्। इन्द्रः परमेश्वरः मघवा बलवत्वात् 'तथे'ति तदभ्यद्रवत्। तस्मात् = इन्द्रादात्मसमीपं गतात् तद् ब्रह्म तिरोदधे = तिरोभूतम्। 'इन्द्रस्य' इन्द्रत्वाभिमानोऽतितरां निराकर्तव्यः इत्यतः संवादमात्रमपि नाऽदाद् ब्रह्म इन्द्राय।। ११।।

## वाक्यभाष्यम्

इन्द्र आदित्यो वज्रभृद् वा, अविरोधात्। इन्द्रोपसर्पणे ब्रह्म तिरोदधे इत्यत्राऽयमभिप्रायः–'इन्द्रोऽहमि'त्यधिकतमोऽभिमानोऽस्य 'सोऽहमग्न्यादिभिः प्राप्तं वाक्सम्भाषणमात्रमपि अनेन न प्राप्तोऽस्मी'त्यभिमानं कथं न नाम जह्यादि'ति तदनुग्रहायैवाऽन्तर्हितं तद् ब्रह्म बभूव।। ११।।

**स तस्मिन्नेवाऽऽकाशे स्त्रियमाजगाम बहुशोभमानामुमाँहैमवतीं ताँ होवाच 'किमेतद् यक्षमि'ति।। १२।।**

।। इति केनोपनिषदि तृतीयः खण्डः।। ३।।

## भावार्थदीपिका

**अन्वयः–**सः तस्मिन्ने आकाशे बहुशोभमानां स्त्रियं हैमवतीम् उमाम् आजगाम। तां ह उवाच–'एतद् यक्षं किम्?' इति।। १२।।

## पदभाष्यम्

तद् यक्षं यस्मिन्नाकाशे = आकाशप्रदेशे आत्मानं दर्शयित्वा तिरोभूतम्, इन्द्रश्च ब्रह्मणस्तिरोधानकाले यस्मिन्नाकाशे आसीत्, स इन्द्रः तस्मिन्नेवाऽऽकाशे तस्थौ 'किं तद् यक्षमि'ति ध्यायन्, न निववृते अग्न्यादिवत्।

तस्येन्द्रस्य यक्षे भक्तिं बुद्ध्वा विद्या उमारूपिणी प्रादुरभूत् स्त्रीरूपा। स इन्द्रः ताम् उमां बहुशोभमानां–सर्वेषां हि शोभमानानां शोभनतमा विद्या तदा 'बहुशोभमाने'ति विशेषणमुपपन्नं भवति; हैमवतीम् = हेमकृताभरणवतीमिव

बहुशोभमानामित्यर्थः; अथवा उमैव हिमवतो दुहिता हैमवती नित्यमेव सर्वज्ञेनेश्वरेण सह वर्तत इति ज्ञातुं समर्थेति कृत्वा ताम् उपजगाम।

इन्द्रस्तां ह उमां किल उवाच = पप्रच्छ–'ब्रूहि', 'किमेतद्', दर्शयित्वा तिरोभूतं यक्षमि'ति।। १२।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पाद्-
कृतौ केनोपनिषत्पदभाष्ये तृतीयः खण्डः।।३।।

## वाक्यभाष्यम्

स शान्ताभिमान इन्द्रोऽत्यर्थं ब्रह्म विजिज्ञासुर्यस्मिन्नाकाशे ब्रह्मणः प्रादुर्भाव आसीत् तिरोधानं च तस्मिन्नेव स्त्रियमतिरूपिणीं विद्यामाजगाम। अभिप्रायोद्बोध-हेतुत्वाद् रुद्रपत्नी उमा हैमवतीव सा शोभमाना विद्यैव। विरूपोऽपि विद्यावान बहु शोभते।। १२।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादकृतौ
केनोपनिषद्वाक्यभाष्ये तृतीयः खण्डः।।३।।

# केनोपनिषद्

## ।। अथ चतुर्थः खण्डः।।

**सा 'ब्रह्मे'ति होवाच, 'ब्रह्मणो वा एतद् विजये महीयध्वमि'ति, ततो हैव विदाञ्चकार 'ब्रह्मे'ति।। १।।**

## भावार्थदीपिका

**अन्वयः**–सा ह उवाच 'ब्रह्म' इति 'ब्रह्मणः वा विजये एतद् महीयध्वम्' इति ततः एव ह विदाञ्चकार–'ब्रह्म' इति।। १।।

## पदभाष्यम्

सा 'ब्रह्मे'ति होवाच–ह = किल ब्रह्मणो वा = ईश्वरस्यैव, विजये = 'ईश्वरेणैव जिताः असुराः, यूयं तत्र निमित्तमात्रम्, तस्यैव विजिये यूयं महीयध्वम् = महिमानं प्राप्नुथ।' 'एतदि'ति क्रियाविशेषणार्थम्। 'मिथ्याभिमानस्तु

युष्माकम्–'अस्माकमेवाऽयं विजयोऽस्माकमेवाऽयं महिमे'ति। ततः तस्मादुमावाक्यात् ह एव विदाञ्चकार 'ब्रह्मे'ति इन्द्रः; अवधारणात् ततो हैव इति, न स्वातन्त्रेण।। १।।

## वाक्यभाष्यम्

तां च पृष्ट्वा तस्या एव वचनाद् विदाञ्चकार विदितवान्। अतः इन्द्रस्य बोधहेतुत्वाद् विद्यैव उमा। 'विद्यासहायवान् ईश्वर' इति स्मृतिः।। १।।

**तस्माद् वा एते देवा अतितरामिवाऽन्यान् देवान् यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पृशुस्ते ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति।। २।।**

**अन्वयः**–तस्माद् वा एते देवाः यत् अग्निः वायुः इन्द्रः; अन्यान् देवान् अतितरामिव हि ते एनत् नेदिष्ठं पस्पृशुः। ते हि एनत् प्रथमः विदाञ्चकार ब्रह्म इति।। २।।

## पदभाष्यम्

यस्मादग्निवाय्विन्द्रा एते देवा ब्रह्मणः संवाददर्शनादिना सामीप्यमुपगताः, तस्मात् स्वैर्गुणैः अतितरामिव शक्तिगुणादिमहाभाग्यैः अन्यान् देवान् अतितराम् अतिशेरत इव एते देवाः। 'इव' शब्दोऽनर्थकोऽवधारणार्थो वा। यद् अग्निः वायुः इन्द्रः, ते हि देवा यस्मात् एनत् ब्रह्म नेदिष्ठम् अन्तिकतमं प्रियतमं पस्पर्शुः स्पृष्टवन्तो यथोक्तैर्ब्रह्मणः संवादादिप्रकारैः, ते हि यस्माच्च हेतोः एनद् ब्रह्म प्रथमः प्रथमाः प्रधानाः सन्त इत्येतत्, विदाञ्चकार विदाञ्चक्रुरित्येतद् ब्रह्मेति।। २।।

## वाक्यभाष्यम्

यस्मादिन्द्रविज्ञानपूर्वकम् अग्निवाय्विन्द्रास्ते ह्येनन्नेदिष्ठमतिसमीपं ब्रह्मविद्यया ब्रह्म प्राप्ताः सन्तः पस्पृशुः स्पृष्टवन्तः, ते हि प्रथमः प्रथमं विदाञ्चकार विदाञ्चक्रुरित्येतत्।। २।।

**तस्माद् वा इन्द्रोऽतितरामिवाऽन्यान् देवान् स ह्येनन्नेदिष्ठं पस्पर्श। स ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति।। ३।।**

## भावार्थदीपिका

**अन्वयः**–तस्माद् वा इन्द्रः अन्यान् देवान् अतितरामिव। स हि नेदिष्ठम् एनत् पस्पर्श, स ही एनत्। प्रथमाः विदाञ्चकार ब्रह्मेति।।३।।

## पदभाष्यम्

यस्मादग्निवायू अपि इन्द्रवाक्यादेव विदाञ्चक्रतुः, इन्द्रेण हि उमावाक्यात् प्रथमं श्रुतं 'ब्रह्मे'ति; तस्माद् 'वा' वै इन्द्रः अतितरामिव अतिशेरत इव अन्यान् देवान्। स ह्येनन्नेदिष्ठं पस्पर्श यस्मात् स ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेत्युक्तार्थं वाक्यम्।। ३।।

## वाक्यभाष्यम्

तस्मादतितराम् अतीत्याऽन्यानतिशयेन दीप्यन्ते अन्यान् देवान्। ततोऽपीन्द्रोऽतितरां दीप्यते, आदौ ब्रह्मविज्ञानात्।। ३।।

**तस्यैष आदेशो यदेतद् विद्युतो व्यद्युतदा ३, इतीन्न्यमीमिषदा ३, इत्यधिदैवतम्।। ४।।**

**अन्वयः**—तस्य एषः आदेशः। यत् एतत् विद्युतः व्यद्युतत् आ ३ इति। इत् न्यमीमिषत् आ ३। इति अधिदैवतम्।। ४।।

## पदभाष्यम्

तस्य प्रकृतस्य ब्रह्मण एष आदेश उपमोपदेशः। निरुपमस्य ब्रह्मणो येनोपमानेनोपदेशः सोऽयमादेश इत्युच्यते। किं तत्? यदेतत् प्रसिद्धं लोके विद्युतो व्यद्युतद् विद्योतनं कृतवदित्येनदनुपपन्नमिति विद्युतो विद्योतनमिति कल्प्यते। 'आ ३' इत्युपमार्थः। विद्युतो विद्योतनमिवेत्यर्थः। 'यथा सकृद् विद्युतम्' इति श्रुत्यन्तरे च दर्शनात्। विद्युदिव हि सकृदात्मानं दर्शयित्वा तिरोभूतं ब्रह्म देवेभ्यः।

अथवा विद्युतः 'तेजः' इत्यध्याहार्यम्। व्यद्युतद् विद्योतितवत् 'आ ३' इव। विद्युतस्तेजः सकृद् विद्योतितवदिवेत्यभिप्रायः। 'इति' शब्द आदेशप्रतिनिर्देशार्थः 'इत्ययमादेश' इति। इच्छब्दः समुच्चयार्थः।

अयं चाऽपरस्तस्याऽऽदेशः। कोऽसौ? न्यमीमिषद्, यथा चक्षुः न्यमीमिषद् निमेषं कृतवत्। स्वार्थे णिच्। उपमार्थ एवाऽऽकारः। चक्षुषो विषयं प्रति प्रकाशतिरोभाव इव चेत्यर्थः। इत्यधिदैवतं देवताविषयं ब्रह्मण उपमानदर्शनम्।। ४।।

## वाक्यभाष्यम्

तस्यैष आदेशः—तस्य ब्रह्मण एष वक्ष्यमाण आदेश उपासनोपदेश इत्यर्थः। यस्माद् देवेभ्यो विद्युदिव सहसैव प्रादुर्भूतं ब्रह्म द्युतिमत्। तस्माद् विद्युतो

विद्योतनम्–यथा यदेतद् ब्रह्म व्यद्युतद् विद्योतितवद्। 'आ' इवेत्युपमार्थ 'आ' शब्द:। यथा घनान्धकारं विदार्य विद्युत् सर्वत: प्रकाशत, एवं तद् ब्रह्म देवानां पुरत: सर्वत: प्रकाशवद् व्यक्तीभूतम्। अतो व्यद्युतदिवेत्युपास्यम्। 'यथा सकृद् विद्युतमि'ति वाजसनेयके। यस्माच्चेन्द्रो पसर्पणकाले न्यमीमिषत्–यथा कश्चिच्चक्षुर्निमेषणं कृतवानिति। 'इतीदित्य'नर्थकौ निपातौ। निमिषितवदिव तिरोभूतमित्येवमधिदैवतं देवताया अधि यद् दर्शनमधिदैवतं तत्।।४।।

**अथाऽध्यात्मम्-यदेतद् गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्णँ-सङ्कल्प:।। ५।।**

**अन्वय:–**अथ अध्यात्मम्। यत् मन: एतद् गच्छति इव। तथा च एतत् अनेन अभीक्ष्णम् उपस्मरति (इति) सङ्ल्प:।। ५।।

## पदभाष्यम्

अथ अनन्तरम्, अध्यात्मम् = प्रत्यगात्मविषय: आदेश उच्यते। यदेतद् गच्छतीव च मन:। एतद् ब्रह्म ढौकत इव विषयीकरोतीव। यच्च अनेन = मनसा, एतद् = ब्रह्म, उपस्मरति = समीपत: स्मरति साधक: अभीक्ष्णम् = भृशम्। सङ्कल्पश्च मनसो ब्रह्मविषय:। मनउपाधिकत्वाद्धि मनस: सङ्कल्पस्मृत्यादिप्रत्ययैरभिव्यज्यते ब्रह्म, विषयीक्रियमाणमिव। अत: स एष ब्रह्मणोऽध्यात्ममादेश:।

विद्युन्निमेषणवदधिदैवतं द्रुतप्रकाशनधर्मि, अध्यात्मं च मन: प्रत्यय-समकालाभिव्यक्तिधर्मि इत्येष आदेश:। एवमादिश्यमानं हि ब्रह्म मन्दबुद्धिगम्यं भवतीति ब्रह्मण आदेश उपदेश:। न हि निरुपाधिकमेव ब्रह्म मन्दबुद्धिभिराकलयितुं शक्यम्।। ५।।

## वाक्यभाष्यम्

अथ = अनन्तरम्, अध्यात्मम् = आत्मविषयमध्यात्मम्, उच्यत इति वाक्यशेष:। यदेतद् = यथोक्तलक्षणं ब्रह्म, गच्छतीव = प्राप्नोतीव, विषयीकरोतीवेत्यर्थ:। न पुनर्विषयीकरोति, मनसोऽविषयत्वाद् ब्रह्मण:। अत: मनो न गच्छति। 'येनाऽऽहुर्मनो मतमि'ति हि चोक्तम्। तु गच्छतीवे' ति मनसोऽपि मनस्त्वात्। आत्मभूतत्वाच्च ब्रह्मणस्तत्समीपे मनो वर्तत इति। 'उपस्मरत्य'नेन मनसैव तद् ब्रह्म विद्वान् यस्मात्, तस्माद् ब्रह्म गच्छतीवेत्युच्यते। अभीक्ष्णं = पुन: पुनश्च सङ्कल्पो ब्रह्मप्रेषितस्य मनस:। अत उपस्मरणसङ्कल्पादिभिर्लिङ्गैर्ब्रह्म मनोऽध्यात्मभूतमुपास्यमित्यभिप्राय:।। ५।।

NOTES

**तद्ध तद् वनं नाम। तद् 'वनमि'त्युपासितव्यम्। स य एतदेवं वेदाऽभिहैन् सर्वाणि भूतानि संवाञ्छन्ति॥ ६॥**

**अन्वयः**—तत् ह 'तद् वनं' नाम। तद् 'वनम्' इति उपासितव्यम्। सः यः एतद् एवं वेद। अभि ह एनं सर्वाणि भूतानि संवाञ्छन्ति।। ६।।

## पदभाष्यम्

किञ्च, तद् = ब्रह्म, ह = किल 'तद्वनं'नाम। 'तस्य वनं तद्वनम्।' तस्य प्राणिजातस्य प्रत्यगात्मभूतत्वाद्, 'वनम्' = वननीयम्, सम्भजनीयम्; अतः तद्वनं नाम। प्रख्यातं ब्रह्म 'तद्वनमि'ति यतः, तस्मात् तद्वनमित्यनेनैव गुणाभिधानेन उपासितव्यं चिन्तनीयम्।

अनेन नाम्नोपासनस्य फलमाह—स यः कश्चित् एतद् यथोक्तं ब्रह्म एवं = यथोक्तगुणं, वेद = उपास्ते। अभि ह एनं सर्वाणि भूतानि अभिसंवाञ्छन्ति ह प्रार्थयन्त एव यथा ब्रह्म।। ६।।

## वाक्यभाष्यम्

तस्य चाऽध्यात्ममुपासते गुणो विधीयते—'तद्ध तद्वनम्'—तदेतद् ब्रह्म तच्च तद्वनं च तत्परोक्षं वनं सम्भजनीयम्। वनतेस्तत्कर्मणस्तस्मात् तद्वनं नाम। ब्रह्मणो गौणं हीद नाम। तस्मादनेन गुणेन 'तद्वनमि'त्युपासितव्यम्। स यः कश्चिदेतद् यथोक्तमेवं यथोक्तेन गुणेन 'वनमि'त्यनेन नाम्नाऽभिधेयं ब्रह्म वेद उपास्ते, तस्यैतत, फलमुच्यते। सर्वाणि भूतान्येनमुपासकमभिसंवाञ्छन्ती-हाऽभिसम्भजन्ते सेवन्ते स्मेत्यर्थः। यथागुणोपासनं हि फलम्।। ६।।

**उपनिषदं भो! ब्रूही 'त्युक्ता त उपनिषद्। ब्राह्मीं वाव त उपनिषदमब्रूमे'ति॥ ७॥**

## भावार्थदीपिका

**अन्वयः**—'भो! उपनिषदं ब्रूहि इति, 'उक्ता' ते उपनिषद्। ब्राह्मीं वाव उपनिषदं ते अब्रूम' इति।। ७।।

## पदभाष्यम्

एवमनुशिष्टः शिष्य आचार्यमुवाच—'उपनिषदं रहस्यं यच्चिन्त्यम्, भो भगवन्! ब्रूहि' इति।

NOTES

एवमुक्तवति शिष्ये आहाऽऽचार्यः–‘उक्ता = अभिहिता, ते = तव उपनिषत्।’ का पुनः सेत्याह–‘ब्राह्मीम् ब्रह्मणः = परमात्मन इयं ब्राह्मी ताम् परमात्मविषयत्वादतीतविज्ञानस्य, वाव = एव ते उपनिषदमब्रूमे’ति उक्तामेव परमात्मविषयामुपनिषदमब्रूमे’ त्यवधारयत्युत्तरार्थम्।

परमात्मविषयामुपनिषदं श्रुतवतः ‘उपनिषदं भो! ब्रूही’ति पृच्छतः शिष्यस्य कोऽभिप्रायः? यदि तावच्छ्रुतस्याऽर्थस्य प्रश्नः कृतः, ततः पिष्टपेषणवत् पुनरुक्तोऽनर्थकः प्रश्न स्यात्। अथ सावशेषोक्ता उपनिषत् स्यात्, ततस्तस्याः फलवचनेनोपसंहारो न युक्तः ‘*प्रेत्याऽस्माल्लोकादमृता भवन्ति*’ (के. उ. २।५) इति। तस्मादुक्तोपनिषच्छेषविषयोऽपि प्रश्नोऽनुपपन्न एव, अनवशेषित्वात्। कस्तर्हि अभिप्रायः प्रष्टुः? इत्युच्यते–

## पदभाष्यम्

किं पूर्वोक्तोपनिषच्छेषतया तत्सहकारिसाधनान्तरापेक्षा, अथ निरपेक्षैव? सापेक्षा चेदपेक्षितविषयामुपनिषदं ब्रूहि। अथ निरपेक्षा चेत् अवधारय पिप्पलादवत् ‘नातः परमस्ती’त्येवमभिप्रायः। एतदुपपन्नमाचार्यस्याऽवधारणवचनम्–‘उक्ता त उपनिषत्’ इति।

## पदभाष्यम्

ननु नाऽवधारणमिदम्, यतोऽन्यद् वक्तव्यमाह–‘तस्यै तपो तद’ (४।८) इत्यादि।

सत्यम्, वक्तव्यमुच्यते आचार्येण न तूक्तोपनिषच्छेषतया तत्सहकारि-साधनान्तराभिप्रायेण वा; किं तु ब्रह्मविद्याप्राप्त्युपायाभिप्रायेण वेदैस्तदङ्गैश्च सहपाठेन समीकरणात् तपःप्रभृतीनाम्।

## पदभाष्यम्

न हि वेदानां शिक्षाद्यङ्गानां च साक्षाद् ब्रह्मविद्याशेषत्वं तत्सहकारिसाधनत्वं वा सम्भवति, सहपठितानामपि यथायोगं विभज्य विनियोगः स्यादिति चेत्; यथा सूक्तवाकानुमन्त्राणमन्त्राणां यथादैवतं विभागः, तथा तपो-दम-कर्म-सत्यादीनामपि ब्रह्मविद्याशेषत्वं तत्सहकारिसाधनत्वं वेति कल्प्यते। वेदानां तदङ्गानां चाऽर्थप्रकाश- कत्वेन कर्मात्मज्ञानोपायत्वमित्येवं ह्ययं विभागो युज्यते। अर्थसम्बन्धोपपत्तिसामर्थ्यादिति चेत्।

NOTES

न, अयुक्तेः। न ह्ययं विभागो घटनां प्राञ्चति। न हि सर्वक्रिया। कारकफलभेदबुद्धितिरस्कारिण्या ब्रह्मविद्यायाः शेषापेक्षा सहकारिसाधनसम्बन्धो वा युज्यते। सर्वविषयव्यावृत्तप्रत्यगात्मविषयनिष्ठत्वाच्च ब्रह्मविद्यायास्तत्फलस्य च निःश्रेयसस्य।

**''मोक्षमिच्छन् सदा कर्म त्यजेदेव ससाधनम्।**
**त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक् परं पदम्।।''इति।**

तस्मात् कर्मणां सहकारित्वं कर्मशेषापेक्षा वा न ज्ञानस्योपपद्यते। ततोऽसदेव सूक्तवाकानुमन्त्रवद्यथायोगं विभाग इति। तस्मादवधारणार्थतैव प्रश्नप्रतिवचनस्योपपद्यते। एतावत्येवेयम् उपनिषदुक्ताऽन्यनिरपेक्षाऽमृतत्वाय।। ७।।

## वाक्यभाष्यम्

'उपनिषदं भो ब्रूही'त्युक्तायामप्युपनिषदि शिष्येणोक्त आचार्य आह– 'उक्ता = कथिता, ते = तुभ्यम्, उपनिषत् = आत्मोपासनं च। अधुना ब्राह्मीं वाव ते तुभ्यं ब्रह्मणो ब्राह्मणजातेरुपनिषदमब्रूम वक्ष्याम इत्यर्थः। वक्ष्यति हि–ब्राह्मी नोक्ता उक्ता त्वात्मोपनिषत्। तस्मान्न भूताभिप्रायो'ऽब्रूमे'त्ययं शब्दः।। ७।।

**तस्यै तपो दमः कर्मेति प्रतिष्ठा। वेदाः सर्वाङ्गानि। सत्यमायतनम्।।८।।**

**अन्वयः**–तस्यै तपः दमः कर्म इति प्रतिष्ठा। वेदाः सर्वाङ्गानि सत्यम् आयतनम्।। ८।।

## पदभाष्यम्

यामिमां ब्राह्मीमुपनिषदं तवाग्रेऽब्रूमेति तस्यै तस्या उक्ताया उपनिषदः प्राप्त्युपायभूतानि तपआदीनि। 'तपः' = कायेन्द्रियमनसां समाधानम्। दमः = उपशमः। कर्म = अग्निहोत्रादि। एतैर्हि संस्कृतस्य सत्त्वशुद्धिद्वारा तत्वज्ञानोत्पत्तिर्दृष्टा दृष्टा। ह्यमृदितकल्मषस्योक्तेऽपि ब्रह्मण्यप्रतिपत्तिर्विपरीतप्रतिपत्तिश्च। यथा इन्द्रविरोचनप्रभृतीनाम्। तस्मादिह वाऽतीतेषु वा बहुषु जन्मान्तरेषु तपआदिभिः कृतसत्त्वशुद्धेर्ज्ञानं समुत्पद्यते यथाश्रुतम्;

**''यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।**
**तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।।''** *(श्वे. उ. ६/२३)*
**इति मन्त्रवर्णात्।**

**"ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः"** *(महा. शा. २०४।८)* **इति स्मृतेश्च।**

NOTES

## पदभाष्यम्

'इति' शब्दः उपलक्षणत्वप्रदर्शनार्थः। इत्येवमादि अन्यदपि ज्ञानोत्पत्तेरुपकारकम् 'अमानित्वमदम्भित्वम्' (गीता १३।७) इत्यादि उपदर्शितं भवति। 'प्रतिष्ठा' पादौ पादाविवाऽस्याः, तेषु हि सत्सु प्रतितिष्ठति ब्रह्मविद्या प्रवर्तते, पद्भ्यामिव पुरुषः। 'वेदा' श्चत्वारः (सर्वाङ्गानि) सर्वाणि चाऽङ्गानि शिक्षादीनि षट्, कर्मज्ञानप्रकाशकत्वाद् वेदानाम्। तद्रक्षणार्थत्वादङ्गानां प्रतिष्ठात्वम्। अथवा 'प्रतिष्ठा' शब्दस्य पादरूपकल्पनार्थत्वाद् वेदास्तु इतराणि सर्वाङ्गानि शिरआदीनि। अस्मिन् पक्षे शिक्षादीनां वेदग्रहणेनैव ग्रहणं कृतं प्रत्येतव्यम्। अङ्गिनि हि गृहीतेऽङ्गानि गृहीतान्येव भवन्ति, तदायतनत्वादङ्गानाम्।

सत्यमायतनम्—यत्र तिष्ठत्युपनिषत् तदायतनम्। सत्यमिति अमायिताऽकौटिल्यं वाङ्मनः कायानाम्। तेषु ह्याश्रयति विद्या, ये अमायाविनः साधवः, न असुरप्रकृतिषु मायाविषु। 'न येषु जिह्ममनृतं न माया च' (प्र. उ. ९।१६) इति श्रुतेः। तस्मात् 'सत्यमायतनमि'ति कल्प्यते। तपआदिष्वेव प्रतिष्ठात्वेन प्राप्तस्य सत्यस्य पुनरायतनत्वेन ग्रहणं साधनातिशयत्वज्ञापनार्थम्।

**"अश्वमेधसहस्रं च सत्यं च तुलया धृतम्।**
**अश्वमेधसहस्राच्च सत्यमेकं विशिष्यते।।"** *(विष्णुस्मृ. ८)*
**इति स्मृतेः।। ८।।**

## वाक्यभाष्यम्

तस्या वक्ष्यमाणाया उपनिषदस्तपो ब्रह्मचर्यादि, दम उपशमः कर्म अग्निहोत्रादीत्येतानि प्रतिष्ठाऽऽश्रयः। एतेषु हि सत्सु ब्राह्म्युपनिषत् प्रतिष्ठिता भवति। वेदाश्चत्वारोऽङ्गानि च सर्वाणि। प्रतिष्ठेत्यनुवर्तते। ब्रह्माश्रया हि विद्या। सत्यं यथाभूतवचनमपीडाकरम्, आयतनं निवासः। सत्यवत्सु हि सर्वं यथोक्तमायतनमिवाऽवस्थितम्।।८।।

**यो वा एतामेवं वेदाऽपहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति।। ९।।**

।। इति केनोपनिषदि चतुर्थः खण्डः।। ४।।

।। इति सामवेदीयतलवकारोपनिषत् (केनोपनिषत्) समाप्ता।

NOTES

**अन्वयः**–यः वा एताम् एवं वेद, (सः) पाप्मानम् अपहत्य अनन्ते ज्येये स्वर्गे लोके प्रतितिष्ठति प्रतितिष्ठति।। ९।।

## पदभाष्यम्

'यो वै एताम्' ब्रह्मविद्यां 'केनेषितम्' (१।१) इत्यादिना यथोक्ताम् 'एवं' महाभागां 'ब्रह्म ह देवेभ्यः' (३।१) इत्यादिना स्तुतां सर्वविद्याप्रतिष्ठां 'वेद'–'अमृतत्वं हि विन्दते' '२।४' इत्युक्तमपि ब्रह्मविद्याफलमन्ते निगमयति–'अपहत्य पाप्मानम्' = अविद्याकामकर्मलक्षणं संसारबीजं विधूय, 'अनन्ते' = अपर्यन्ते स्वर्गे लोके = सुखात्मके ब्रह्मणीत्येतत्। 'अनन्ते' इति विशेषणान्न त्रिविष्टपे। अनन्तशब्द औपचारिकोऽपि स्याद् इत्यत आह–'ज्येये' इति। 'ज्येये' ज्यायसि सर्वमहत्तरे स्वात्मनि मुख्ये एव प्रतिष्ठिति। न पुनः संसारमापद्यत इत्यभिप्रायः।। ९।।

इति श्रीमत्परमहंसपरिव्राजकाचार्य–श्रीमच्छङ्करभगवत्पादकृतौ
केनोपनिषत्पदभाष्ये चतुर्थः खण्डः।। ४।।

समाप्तमिदं श्रीमच्छङ्कराचार्यविरचितं तलवकारोपनिषद् पदपर्यायकेनोपनिषत्पदभाष्यम्।

## वाक्यभाष्यम्

तामेतां तपआद्यङ्गां तत्प्रतिष्ठा ब्राह्मीमुपनिषदं सायतनाम् आत्मज्ञानहेतुभूतामेवं यथावद् यो वेद अनुवर्ततेऽनुतिष्ठति। तस्यैतत् फलमाह–अपहत्य पाप्मानम् अपक्षीय धर्माधर्मावित्यर्थः। अनन्तेऽपारेऽविद्यमानान्ते स्वर्गे लोके सुखप्राये निर्दुःखात्मनि परे ब्रह्मणि ज्येये महति सर्वमहत्तरे प्रतितिष्ठति सर्ववेदान्तवेद्यं ब्रह्माऽऽत्मत्वेनाऽवगम्य तदेव ब्रह्म प्रतिपद्यत इत्यर्थः।। ९।।

।। इति केनोपनिषदो वाक्यभाष्ये चतुर्थः खण्डः।। ४।।
।। इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्य–
श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवतः कृतौ
तलवकारोपनिषदपरपर्यायकेनोपनिभाष्ये क्षुद्रगणवाक्यविवरणं समाप्तम्।।

❑❑❑